No. १४०८

Title अनु. गुण प्रकाशटीका माथुरी गुणदीधिति रहस्यम्

Author मथुरानाथः

Extent २०४ Age ×

Subject न्यायशास्त्रम्

अनुमानदीधितिरहस्यटीका गुणप्रकाशमाथुरी
गुणदीधितिरहस्यं वा

पत्राणि २०८

१५०८

[illegible] प्रकाशयाख्य[illegible]

५४६८ ज्ञानमातदी[illegible]ता रहस्य टीका

श्रीगणेशाय नमः॥ कुंचिताधरपुटेन पूरयन्वंशिकां प्रचलदंगुलिपंक्तिः। मोहयन्नखिलवामलोचनाः पातु कोपि नवनीर
दच्छविः। श्रीमन्तामप्युरन्नापतर्कवागीशधीमता। गुणप्रकाशदीधितेर्भावो व्याख्यायते स्फुटं। निर्विघ्नं प्रारिप्सित
ग्रंथसमाप्तिकामनया कृतं भगवन्नमस्काररूपं मंगलं शिष्यशिक्षायै ग्रंथतो निबध्नाति। श्रीनृसह इति। ग्रंथानुमानदी
धितिरहस्यप्रपंचिततत्वमेतत्। यद्यपि तिबधकीभूतद्रव्यतत्वे त्वाद्युक्ताशंकामवतारयति। विनापीति।
निरूपणस्य शाब्दप्रयोगरूपत्वादिति भावः। तथाच द्रव्यनिरूपणगुणनिरूपणयोर्हेतुहेतुमद्भावो बाधित इति ह
दयं। शंकते तद्धर्मत्वेन निरूपणमिति शिष्याणां द्रव्यधर्मत्वप्रकारकगुणनिरूपणमित्यर्थः। तन्निरूपणाधीन
मिति परंपरया ग्रंथकर्तुः द्रव्यनिरूपणप्रयोजकमित्यर्थः। वाक्यप्रयोगं प्रति वाक्यार्थज्ञानं प्रयोजकं तत्र च विशे
षणीभूतद्रव्यज्ञानद्वारा द्रव्यनिरूपणस्य प्रयोजकत्वात् इति भावः। तद्धर्मित्वेनेति शिष्याणां गुणधर्मित्वप्रका
रेण द्रव्यनिरूपणमित्यर्थः। तन्निरूपणाधीनमिति। उक्तक्रमेण परंपरया ग्रंथकर्तुर्गुणनिरूपणप्रयोजकमित्यर्थः। तथा

(गुरोर्द्रव्यनिरूपणं विनापि द्रव्यधर्मत्वेन निरूपणासंभवादाह शिष्याणामिति शिष्यान्प्रतीत्यर्थः ७)
ग्रंथकर्त्रा द्रव्यनिरूपणे कृते सति शिष्याणां विशेषणीभूतद्रव्यज्ञानसंपत्तेः तैः स्वशिष्यान्प्रति द्रव्यधर्मत्वेन गुणनिरूपणं सुकरमिति तत्र परंपरया ग्रंथ
राम १ कर्त्तृनिरूपणं प्रयोजकमित्यर्थः ४

चयत्किंचित्निरूपणेयोर्यथाकथंचित्प्रयोज्यप्रयोजकभावस्याविशेषात्गुणनिरूपणानंतरमेव द्रव्यनिरूपणं
कुतो न कृतमितिभावः। ननु गुणधर्मित्वेन द्रव्यनिरूपणमेवासिद्धमित्यत आह। निरूपितानि चेति चोऽवधारणे
॥ निरूपितानि चेति चोऽवधारणे निरूपितान्येवेत्यर्थः। आचार्यादिभिरिति शेषः। तद्विशेषवत्तयेति तद्विशेषो गुणविशे
षः रूपरसादिरूपः इदं च प्रसिद्धिप्राचुर्यदर्शनाय। इत्यत आह। इत्यस्वरसादाह। ननु द्रव्य एव प्रपंचितं ज्ञा
न गुण इत्यत्र किं नियामकं इत्यत आह। आत्मन इति। तत्त्वज्ञानविषयतयेति। निर्विकल्पात्मकचरमतत्त्वज्ञा फा
नविषयतयेत्यर्थः। तेन भेदप्रतियोगितया गुणानामप्याप्ततत्त्वज्ञानविषयत्वेपि न क्षतिः। तत्त्वज्ञानविषयतया
तत्त्वज्ञानमुख्यविशेष्यतयेत्यर्थ इति कश्चित्। इदमुपलक्षणं निश्रेयसभागितयेत्यपि द्रष्टव्यं। हेतुतासंभवा
दिति। निरूपणस्य सजातीयविजातीयभिन्नत्वानुमित्यनुकूलशाब्दप्रयोगरूपत्वादिति भावः। ननु निरू
पणपदार्थैकदेशे सजातीयविजातीयभिन्नत्वानुमितौ जन्यत्वस्य तृतीयार्थस्यान्वयः स्यादिति वाच्यं। ज्ञायमा

गु.शि.टी.
२

नलिंगस्याकरणेतथासजातीयविजातीयभिन्नत्वानुमितेरपिसाधर्म्यवैधर्म्याजन्यत्वादितिहृदयं।साधर्म्य
वैधर्म्यप्रकारकमितिप्रकारितावच्छापारत्वंविवक्षितंतेननिरूपणस्यनिरुक्तशाब्दप्रयोगरूपस्यसप्रकारक
त्वाभावेपिनक्षतिरितिभावः।इतीतिशब्दान्वयबोधइतिशेषः।ननुसजातीयविजातीयव्यावृत्तत्वेनज्ञानेयदि
निरूपणंतुतत्साधर्म्यवैधर्म्याभ्यामितिपनान्वितंसजातीयविजातीयव्यावृत्तत्वेनज्ञानस्यानुमितिरूपस्यापत्त
त्वावच्छेदकतयागुणत्वरूपसाधर्म्यवैधर्म्यप्रकारकत्वेपिलिंगोपहितलैंगिकभाननिरासेनइव्याप्तित
त्वादिरूपसाधर्म्यवैधर्म्यप्रकारकत्वात्तत्सायमानलिंगस्याकरणेतथासाधर्म्यवैधर्म्याजन्यत्वाच्चेत्यतो
व्याचष्टे।ज्ञापनमिति।तच्चसाधर्म्यवैधर्म्यात्मकलिंगज्ञानद्वारासाधर्म्यवैधर्म्यबोधकशब्दप्रयोगएवेतिभा
वः।केचित्तुघटंजानातीत्यर्थेघटंनिरूपयतीतिप्रयोगादाह।ज्ञापनमितीत्याहुः।ननुरूपादिपदोपादानेपि
गुणाशब्दस्याप्रधानार्थकतयारूपादीनामप्रधानानांगुणत्वाभिसंवंधइत्यर्थोवृत्तस्तथाचरूपादिस्वरूपेणक राम

१आह्निनाकमादिस्यासं २

र्म्मादिष्वप्यप्रधानेषु गुणत्वसंबंधभ्रमो दुर्वार इत्यतो भावार्थं स्फुटयति । तथा च इति । समभिव्याहारादिति उपस्था
पयतीत्यनेनान्वितेऽस्य हेतुमाह । संस्कारस्य तदुद्बुद्धत्वादिति संस्कारस्य गुणत्वजातिविशिष्टविषयकसंस्कार
मात्रस्य तदुद्बुद्धत्वात् । गुणपदनिष्ठरूपादिपदसमभिव्याहारेणोद्बुद्धत्वादित्यर्थः । इदमुपलक्षणं । रूपादिपद
समभिव्याहारेण गुणपदस्य गुणत्वजातिविशिष्टमात्रे तात्पर्यग्रहान्न प्रधानत्वरूपेणान्यत्र गुणत्वसंबंधभ्रम
इत्यपि बोध्यं । गुणत्वेनोपस्थित इति गुणपदाद्गुणत्वरूपेण गुणे उपस्थिते सतीत्यर्थः । गुणत्वविधानं गुणत्व
संबंधविधानं । असंगतमिति व्यर्थमित्यर्थः । पक्षीभूतगुणत्वविशिष्टविशेष्यकसाधनीभूतगुणत्ववत्तामा
नसज्ञानस्योत्तरभेदानुमित्यर्थमुद्देश्यस्य गुणपदजन्यगुणत्वप्रकारकोपस्थितिं तदेव संभवादिति भावः । स्वरू
पेण किंचित्प्रकारेण । तद्वत्त्वे लब्धेऽपि गुणत्वेनोपस्थितेऽपि । हेतुतावच्छेदकविशिष्टेति हेतुतावच्छेदकगुणत्ववत्त्वविशि
ष्टेत्यर्थः । अलाभादिति । पक्षीभूतगुणत्वविशिष्टमानसज्ञानासंभवादित्यर्थः । गुणत्वेनानुपस्थितेरिति भावः । न

गु. टि.
२

नुकिं तादृशज्ञानेनेत्यत आह। तादृशेति। पक्षविशेष्यकहेतुतावच्छेदकविशिष्टहेतुमत्ताबुद्धेरित्यर्थः। यद्धर्माव
च्छिन्नाभाववत्त्वेन साध्याभावव्यापकता गृह्यते तेन धर्मेणहेतुमत्ताग्रहस्य व्यतिरेकिण्यनुमितिहेतुत्वादिति भावः
। ननु उद्देश्यविधेयतावच्छेदकप्रकारयोरित्यस्य उद्देश्यं विधेयतावच्छेदकप्रकारो विधेयतावच्छेदकधर्मस्तयो
रित्यर्थः। भेदोन्वय इत्यादावुद्देश्यस्य विधेयतावच्छेदकाभिन्नत्वेपन्वयबोधात्। प्रकृते प्रथमान्तपदोपस्थापि
तस्य गुणत्वस्य विशेष्यत्वेनोद्देश्यतया सकलगुणवृत्तित्वस्य च विशेषणतावच्छेदकत्वेन विधेयतावच्छेद
कतया तयोरभेदस्यात्यन्तमसंभावितत्वात् ज्ञानवा उद्देश्यतावच्छेदकविधेयतावच्छेदकधर्मयोरित्यर्थः। घटो घट
इत्यादावभेदान्वयबोधवारणाय तयोरभेदे अन्वयबोधस्यानुत्पन्नत्वेपि प्रकृते गुणत्वत्वस्योद्देश्यतावच्छेदकत
या सकलगुणवृत्तित्वत्वस्य च विधेयतावच्छेदकतयोरभेदस्यात्यन्तमसंभावितत्वादिसंगतो व्याचष्टे। उद्देश्यता
वच्छेदकेति भवति च प्रकृते गुणत्वत्वस्य सकलगुणवृत्तित्वघटितत्वेन सकलगुणवृत्तित्वमुद्देश्यतावच्छेदकं स

कलगुणवृत्तित्वमेव च विधेयं सर्वेषां गुणानामपि त्वयत्र वृत्तित्वस्य वस्यपर्णत्वादिति तयोर्भेदः न च साकल्यस्य व्या
पकत्वादस्य दुर्वचत्वात् तथा गुणत्वत्वघटकसकलगुणवृत्तित्वस्य गुणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमर्थस्त
थाच कथमभेद इति वाच्यं। साकल्यस्य व्यापकत्वादन्यस्य दुर्वचत्वात् तथा सर्वेषां गुणानां मिलितस्यापि तदर्थकत्वे नाभे
दस्य दुर्वारत्वात्। एतेन सर्वपदस्य प्रातिपदिकतया सकलाभिन्नगुणवृत्तित्वं विधेयं साकल्यं च गुणवृत्तित्वं च गुण
त्वत्वघटकतयोद्देश्यतावच्छेदकमिति नाभेद इत्यपि निरस्तं। साकल्यस्य व्यापकत्वादन्यस्य दुर्वचत्वात् तथा निरुक्तप्रति
योगितानवच्छेदकत्वस्यैव विधेयत्वादुद्देश्यतावच्छेदकत्वाच्च सर्वपदस्य तात्पर्यग्राहकता। न चोद्देश्यतावच्छेदक
विधेययोरभेदे निराकाङ्क्षतेत्यत्र किं मानमिति वाच्यं। पचन्पचति तण्डुलं पचन्पचतीत्यादावन्वयबोधवारणा
य तत्र निराकाङ्क्षत्वस्यावश्यकत्वादिति भावः। केचित्तु गुणानां गुणत्वमिलित्वं गुणपदार्थस्य गुणत्वविशिष्टस्योद्देश्य
तया गुणत्वमुद्देश्यतावच्छेदकं तस्यैव च गुणत्वपदार्थत्वेन विधेयत्वमिति तयोरभेदः। न चोद्देश्यत्वस्य विशेष्यतावशे

गु.ग.टी. षरूपतया विशेषणीभूतगुणत्वविशिष्टस्य कर्ममुद्देश्यतेकरूपं वा विधेयत्वस्य प्रकारताविशेषरूपतया विशे
४ ष्यीभूतस्य गुणत्वपदार्थस्य गुणत्वस्य विधेयत्वमिति वाच्यं कृद्धूमाभाववदित्यादि साध्यविशेष्यकानुमितौ वि
५ शेषणीभूतस्यापि पक्षस्योद्देश्यतायाः विशेष्यीभूतस्यापि साध्यस्य विधेयतायाश्च कृद्धूमाभाववदनुमितौ सिद्धत्वानुव्य
वसायबलात् सर्वसिद्धत्वेन विधेयत्वोद्देश्यत्वयोर्नियमेन प्रकारत्वविशेष्यत्वरूपत्वासंभवात् किं तु विधेयत्वमनुभवसि
द्धो विषयताविशेषः । तच्च क्वचित्प्रकारतारूपं क्वचिद्विशेष्यतादिरूपं । एवमुद्देश्यत्वमप्यनुभवसिद्धो विषयताविशे
षः । तच्च क्वचिद्विशेष्यतारूपं क्वचित्प्रकारतादिरूपमपीत्याहुः । तदसत् । तथापि स्वरूपतो गुणत्वस्योद्देश्यतावच्छेद नत्वमनानुरो
कत्वात् गुणत्वत्वरूपेण च विधेयत्वान्निराकांक्षत्वासंगतेः अन्यथा द्रव्यं जातिमत् द्रव्यं जातिरित्यादावपि निराकांक्ष धेने दं=४
त्वापत्तेः । पच्यते तण्डुलं पचतीत्यादावपि निराकांक्षत्वापत्तेः । एतेन उद्देश्यतावच्छेदकविधेययोरैक्याभिधानेन प्रकृता
वाक्यजन्यज्ञानाभिप्रायेण परं तु गुणत्वहेतुकेतरभेदानुमित्यौपयिकोपनयवाक्यजन्यज्ञानाभिप्रायेण तत्र मत

राम
४

उपनयनग्रहे स्योद्देश्यतावच्छेदकविधेयद्वैस्याद्दोषग्रस्तत्वादेव = १

र्थसंबंधेन गुणत्वमेव विधेयमिति पर्यवसितत्वेऽपि समानात् तएव तत्र मतुबर्थः संबंधः संबंधी वा विधेयो न तु
गुणत्वमित्यभिप्रायेणाऽऽह माधास्येति प्रकारे गुणत्वसंबंधस्य तल्लक्षणत्वस्य वेति तल्लक्षणत्वस्येत्यस्य च तत्र गु
णत्वसंबंधेन लक्षणत्वं यस्येति व्युत्पत्त्या गुणत्वसंबंधिन इत्यर्थः। न चात्र गुणपदेन गुणत्वजात्योपस्थापने पुपन
यस्याथ्यंपदेन तेन रूपेणोपस्थितत्वनियमात् तद्रूपं तत्र तयोरभेद इति वाच्यं। लक्षणवाक्यघटकेन रूपेण लक्ष्योप
स्थितिः तेनैव रूपेणेतरभेदानुमितौ पक्षत्वनियमादुपनयस्थाथ्यंपदस्य गुणत्वरूपेणोपस्थितेरिति तत्स्यवि
ध्याख्यानमप्यपास्तं। तत्रापि स्वरूपतो गुणत्वस्योद्देश्यतावच्छेदकतया गुणात्वत्वरूपेण साध्यव्याप्यत्वप्रकारेण च वि
धेयतया निराकांक्षत्वासंगतेः। अन्यथा द्रव्यं जातिमदित्याद्युपनये तंडुलं पचतीत्यादौ च निराकांक्षत्वापत्तेरिति
दिक्। तेनेतीति। एवं च तेनेत्यस्य भाष्यकारेणेत्यर्थः। लक्षणमित्यस्येतरभेदानुमानमित्यर्थः। उक्तमित्यस्य चाभि
प्रायविषयीकृतमित्यर्थः इति भावः। न क्वापि कृता गुणत्वाभिसंबंधादित्यत्र अभिसंबंधपदं व्यर्थमित्युक्तं तन्नासंगतं

गुणत्वं चेत्समवायसंबंधेन वर्त्तते तदा गुणत्वप्रकारिकानुगतमतिः गुणत्वस्य मत्कारणतावच्छेदकत्वं च स्यादिति रूपादिषु गुणत्वप्रका
रिकानुगतमतिर्नास्त्येवेति प्रकाशपसंगतिरित्यर्थः=१

गु.टी. धर्मप्रागभाववत्त्वमिन्नधर्मिकत्वेन वैयर्थ्याभावादित्यतः स्यात्तेषामेण व्याचष्टे। गुणत्वामिति संबंधेति। नन्वनुगुणत्वस्य हेतु
५ त्वे समवायसंबंधो हेतुतावच्छेदको वाच्य इति तदपेक्षया गुणत्वसमवायस्यैव हेतुत्वमुचितमित्यत आह। सम
५ वायस्येति संबंधविशेषेण विशेषणताविशेषसंबंधेन तथा च संबंधविशेषस्य हेतुतावच्छेदकत्वानुधावनमुभ
यत्र अविशिष्टमिति भावः। यद्रूपावच्छिन्नं इत्यस्य यद्रूपावच्छेदेन संपर्षे तद्रूपप्रमामानाधिकरण्यमात्रे त्वग्रिमग्रंथविरोधः
तद्रूपव्यापकत्वस्यैव लाभादित्यत आह। यद्रूपेति। नन्वनुगुणत्वस्य स्वरूपतः सिद्धत्वेपि तस्यैकेन रूपेण प्रज्ञात्वनंतावद्गु
णत्वेन तद्भिन्नगुणेतरासमवेतत्वे सति सकलगुणसमवेतत्वं गुणत्वे समवेतत्वस्यैवासिद्धेः परंतु नयेअखंडोपाधेः तरस्य
समवायेन च संबंधेन वृत्तित्वोपगमेपि गुणत्वरूपाखंडोपाधेः स्वरूपसंबंधेनैव वृत्तित्वोपगमादन्यथाप्रकाशोक्तौ अत्रा
हुरित्यादिना वक्ष्यमाणसमाधानासंगतेः अखंडोपाधिरूपस्यैव गुणत्वस्य समवायसंबंधेन कारणतावच्छेदकत्वे
संभवात्। नाविविशेषणताविशेषसंबंधेन गुणेतरावृत्तित्वे सति तेन संबंधेन सकलगुणवृत्तित्वं न्यायनये गुणत्वेत

=स्वरूपसंबंधस्य च तत्तत्स्वरूपत्वेनाननुगतसमानतेन कारणतावच्छेदकत्वमिति भावः=२ राम
५

एकपुरुषीयसंख्यासंतेन नामापुरुषीयपस्य समादाय गोसत्वादौ व्यभिचारः ॥ ८ ॥

द्सिद्धिः । न वा सामान्यतो गुणत्वं तद्वृत्तित्वे सति सकलगुणवृत्तित्वं गुणत्वस्यैकार्थसमवायकालिकविशेषणतादि
नागुणेतरस्मिन्नपि सत्त्वादित्यतः सिद्धमित्यनंतरं पश्यति । गुणपदप्रवृत्तिनिमित्ततयेति गुणपदप्रवृत्तिनिमित्तत्वप्र
कारेण सिद्धमित्यर्थः । तथा च गुणपदप्रवृत्तिनिमित्तत्वमेव पक्षतावच्छेदकमिति भावः । ननु अननुगतत्वेन लक्ष्ययाव
त्स्वाश्रयवृत्तित्वेनेत्यर्थः । यावत्स्वाश्रयांशे च लौकिकत्वं विवक्षितं तेन नासिद्धिः तथा च समवायविशेषणतावि
शेषान्यतरसंबंधेन लौकिकप्रत्यक्षाविषयवृत्तित्वादिति समुदितहेत्वर्थः । स च लौकिकप्रत्यक्षाविषयभगवदा
त्मवृत्तावात्मत्वे मनस्त्वादौ च व्यभिचारी न च स्वाश्रयवृत्तिविषयकलौकिकप्रत्यक्षाविषयजातित्वाभावस्य साध्य
त्वान्न व्यभिचार इति वाच्यं मनस्त्वादिवदतींद्रियजातित्वमादायापि तदसत्तापत्तेरित्यत आह । आत्मेति आत्मेतींद्रिय
मात्रवृत्तित्व इति मात्रपदं स्वरूपासिद्धिवारणाय ऐंद्रियकासमवेतत्वे सति यत्समवेतं तदन्यत्व इत्यर्थः । न चैंद्रियक
वृत्तित्वमेव सम्यगिति वाच्यं वृत्तित्वं हि येन केनचित्संबंधेन विवक्षणीयं समवायसंबंधेन वा नाद्यः । मनस्त्वादेरपि तथा

=३ गुणेनाहृशं जातित्वं स्वीकृत्येत्यर्थः =३

ज्ञातित्वानंगीकर्तारं=१ अन्यतरसंबंधेनवृत्तित्वोक्तौलुगौरवं

गु.टी. त्वात्तानां त्वः। गुणत्वस्य जातित्वे विप्रतिपन्नं प्रति स्वरूपासिद्धिः। तन्नये अखंडोपाध्यंतरस्य समवायसंबंधेन वृत्तित्वोपग
६ मेपि गुणत्वस्य तथात्वानभ्युपगमादन्यथाप्रकाशकारीयवक्ष्यमाणसमाधानासंगतेरित्युक्तत्वात् त्यवधोक्तविशि
ष्टाभावस्य समवेतत्वाभावादेव तन्मते गुणत्वे सिद्धिः। मनस्त्वादीति आदिपदात् द्रव्यत्वादिपरिग्रहः। एतन्नये चक्षुर्भा
त्वादपि त्वादिकं न जातिः अवयवावयविवृत्ति धर्मस्य तन्नये जातित्वाभावात् किंतु सति धर्मिणि प्रमाणे अखंडोपा
धिरेवेति न तत्राव्यभिचार इति भावः। ननु सत्तायाः अपि सत्ताव्याप्यत्वात् तत्र व्यभिचारस्तदवस्थः सत्ताभिन्नत्वेस
ति सत्ताव्याप्यत्वोक्तौ च सत्ताव्याप्यत्वदलवैयर्थ्यमित्यत आह। सत्तासमानाधिकरणेति विशिष्टाभावादिव्युदासा
य संसर्गाभावेति संसर्गाभावत्वं प्रतियोगिव्यधिकरणाभावत्वं स्वसमवाय्यवृत्तित्वमिति यावत् स्वपदं प्रतियोगि
परं सन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतामिति तु न्यायः। ननु सामान्यवान गुणो गुण इति पर्यवसन्नस्यापि क
र्मण्येति व्याप्तत्वात् तत्कर्मपदं स्वलेनूमण्येति व्यर्थत्वप्रिकं सिद्धितेत्यत आह। मलइति। चेन चकारेण अतएवेति अ राम ६

न्यथासामान्यवत्त्वे सति द्रव्याश्रितत्वादिकं त्वित्येव ब्रूयादिति भावः। प्रभादीति। प्रभा हि तेजसो रूपमिति न ये प्रभाया
अविलक्षणत्वादिति दोषाभावं तेन च त्रसरेणुतत्कर्मणोः परिग्रहः। ननु तथापि चक्षुर्मात्रग्राह्ये त्रसरेणुपरिमाणे
दोषाभावः संयोगादौ चातिव्याप्तिः। न च गुणत्वं नित्यसमवेतत्वमिति वाच्यं तथा सति रूपत्वाद्यखंडोपाधिसत्ते तत्रा
तिव्याप्तेरित्यत आह। योग्यायोग्येति। अत्रायोग्यसमवेतत्वमात्रोपादाने त्रसरेणावतिव्याप्तिस्तदवस्थ्यं योग्यस
मवेतत्वमात्रोपादाने च त्रसरेणुकर्मण्यतिव्याप्तिस्तादवस्थ्यमत उभयोपादानं योग्यत्वं च लौकिकविषयतासंबंधे
न साक्षात्कारवत्त्वं तद्भिन्नत्वं चायोग्यत्वं यद्यपि त्रसरेण्वादिसाधारण्येपि कर्मण्यत्वानुयोगितावच्छेदकत्वसंभवान्न द्वा
रणफलं तथापि रूपत्वादिसमनियतस्यैवानुयोगितावच्छेदकस्य वक्तुं तेऽपेक्षिततया तद्वारणमावश्यकमिति
भावः। नन्वेवमसंभवः कस्यापि रूपस्योभयसमवेतत्वाभावादित्यत आह तेषामिति। परेषामित्यर्थः। नन्वेवं चक्षु
रादेरपि प्रसङ्गापत्तिः तद्वृत्तिरूपस्य सौरालोकादिवृत्तिरूपाभिन्नतया तस्याप्युद्भूतरूपवत्त्वादित्यत आह। च
=रूपत्वमखंडोपाधिरिति मतमभिप्रेत्येदं तेनाग्रे रूपत्वरसत्वादिसामान्यधर्मानुपगमेपीत्यनेन विरोधः तत्समनियतं च

कि॰ प्र॰ टी॰ गुणादि॰ ३

मु.टी
७
7

क्षुरादेश्चेति।अदोषः नासंभवः परमाणुवृत्तिरूपघटादिवृत्तिरूपयोरभिन्नतया सर्वत्रैव रूपे योग्यायोग्योभयसमवेतत्व
सत्त्वादत एव रूपत्वाद्यखण्डोपाधिविनाभिति व्याप्तिः रूपमात्रस्यैव योग्यत्वेन तत्र योग्यायोग्योभयसमवेतत्वाभावादिति
भावः।संयोगत्वादौ सत्त्वादिपदार्थसंख्यात्वपरिमाणत्वादिसामान्यगुणवृत्तिधर्मस्य स्नेहत्वद्रवत्वादेः परिग्रहः।न च रू
पादिरवियमनोग्राह्यत्वतया चक्षुर्मात्रग्राह्यत्वमप्रसिद्धमिति वाच्यं।मात्रपदेन त्वगिन्द्रियमात्रव्यवच्छेदात्।तथा च त्वग
ग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं ग्राह्यं तात्पर्यं।रसत्वादौ सत्तानवयत्वेत्वादौ चातिव्याप्तिवारणाय चक्षुरिति।न च परनये सं
योगत्वादीनामखण्डोपाधितया समवेतत्वाभावेन योग्यायोग्यसमवेतत्वाभावादेव नातिप्रसंगः।किं मात्रपदेनेति वा
च्यं।परनये तेषामखण्डोपाधित्वेपि समवेतत्वाभ्युपगमात् न चैवं किमपरम विशिष्यते तज्जातित्व इति वाच्यं।अनुगतव्यं
जकव्यंग्यत्वस्यापेतन्नये जातित्वघटकत्वादिति भावः।वस्तुतस्तु तन्नये नीलपीतादिवत् स्नेहद्रवत्वयोरप्येकैकत्वा
तज्जातिव्याप्तिवारणाय मात्रपदं रसादेरप्येकत्वात् तज्जातिव्याप्तिवारणाय चक्षुःपदमित्येव तत्त्वं।घण्डकवत्परमाणोरप्य
राम
७

प्रभात्वस्य द्रव्यत्वव्याप्यजातित्वे आप्यतया परमाणावसत्वान्न पूर्वकल्पेऽतिव्याप्तिः =२

नभ्युपगम इति पाठः। तथा च रूपस्यायोग्यसमवेतत्वाभावात् प्रागुक्तलक्षणं प्रसक्तमपीति भावः। द्व्यणुकाभ्युपगमेत
दुक्तिप्रभात्वेति व्याप्त्यापत्त्यापर्वलक्षणापत्ते द्व्यणुकानभ्युपगमस्यावश्यं वाच्यतया द्व्यणुकवदिति दृष्टान्तता तु
चिन्तु द्व्यणुकपरमाण्वोरनभ्युपगम इति पाठः। तत्र प्रथमविपर्वलक्षणे च द्व्यणुकपरमाण्वोरुभयोरेवाभ्युपगमोऽस्ती
ति लभ्यते तथा च तत्र प्रभात्वखण्डोपाधावतिव्याप्तिस्तथापि तन्नये प्रभात्वं नाखण्डधर्मोऽपि तु निःस्पर्शरूपवत्तेजस्त्वं
प्रभात्वं तत्र तेजस्त्वानतिरिक्तत्वेन चक्षुर्ग्राह्यमिति नातिव्याप्तिरिति पूर्वमतेऽभिप्रायो बोध्यः। ग्राह्यत्वे ग्रहणयो
ग्यमिति चक्षुर्मात्रग्राह्यपदं चक्षुर्मात्रग्रहणयोग्यपरमित्यर्थः। अन्यथा चक्षुस्त्वगुभयग्राह्यस्नेहद्रवत्वयोर
तिव्याप्तिवारणाय मात्रपदोपादानेऽपि स्नेहद्रवत्वयोर्ना [redacted] नात्वनये दे वात्व चक्षुर्मात्रगृहीतस्नेहद्रवत्वव्यक्तावर
तिव्याप्त्यापत्तेः पूर्वमते तु तयोर्योग्यायोग्योभयसमवेतत्वाभावादेवातिव्याप्तिविरहादिति भावः। चक्षुर्मात्रग्र
हणयोग्यत्वं च त्वग्ग्राह्यचक्षुर्ग्राह्यधर्मसमवायित्वं तादृशधर्मश्च प्रकृते नीलत्वपीतत्वादिकमेव परेषां रूपत्व

गु.टी. रसत्वादिसामान्यधर्मानभ्युपगमेपि मधुरत्वतिक्तत्वादिवदनुभवसिद्धतया नीलत्वपीतत्वादेरभ्युपगमादतए
८ वाग्रेदीधितिकारो मधुरत्वादिवदितिदृष्टांतीकृत्यतदितिध्येयं। त्रसरेणुपरिमाणमात्रवृत्तिचक्षुर्मात्रग्राह्य
१ त्वमनुभवसिद्धमवांतरवैजात्यमादाय त्रसरेणुपरिमाणेऽव्याप्तिवारणायाह। गुणोविशेषगुणइतिवि
वृति शेषगुणत्वं चप्रकृते वायुवृत्तिगुरुत्ववृत्तिधर्मस्यन्यूनत्वं वक्ष्यमाणविशेषगुणत्वस्यप्रवेशप्रयोजनविरहात्गो
रवाद्युक्ततागुणत्वमादायासंभववारणाय गुरुत्वावृत्तीतिप्रभायां तादृशपरिमाणविशेषमादाय त्रसरेणौ
देवा चक्षुर्मात्रग्राह्यते स्नेहादिव्यक्तिविशेषवृत्तं चादाय तदधिकरणद्रव्ये च नातिव्याप्तिः। तत्रवायुवृत्तिवृत्तिता
दृशधर्मस्य द्व्यणुकत्वस्य सत्वात्चक्षुर्मात्रग्राह्यत्वस्य समवायित्वघटितत्वात् तादृशधर्मस्यान्येपि प्रभावे त्रसरे
णुपरिमाणमात्रवृत्त्यवांतरवैजात्येपि नातिव्याप्तिरिति भावः। केचित्तु चक्षुर्मात्रग्रहणयोग्यत्वं त्वाचसाक्षात्का
रप्रतिबंधकतावच्छेदकधर्मसमवायित्वे सति चक्षुर्ग्राह्यत्वं। स्नेहद्रवत्वयोश्च न तादृशधर्मसमवायित्वमिति

तद्व्युदासः रूपस्य नु तादात्म्यसंबंधेन त्वाचसाक्षात्कारप्रतिबंधकतया तादृशधर्मवत्त्वमतो न तदसंग्रहः त्रसरेणुमा
त्रवृत्तिपरिमाणविशेषस्यापि तादात्म्यसंबंधेन त्वाचसाक्षात्कारप्रतिबंधकत्वेन तद्धसवांतरवैलक्षण्यस्य त्वाचसा
क्षात्कारप्रतिबंधकतावच्छेदकत्वात् तत्रातिव्याप्तिवारणायमाह। गुणेविशेषगुणइति विशेषगुणत्वं च परंवि
द्ध्यं। न च त्रसरेणुस्नेहद्रवत्वयोरतिव्याप्तिः त्रसरेणुवृत्तिस्नेहत्वादिनापि तादात्म्यसंबंधेन प्रतिबंधकत्वादि
ति वाच्यं। प्रतिबंधकतावच्छेदकपदेन निरवच्छिन्नप्रतिबंधकतावच्छेदकत्वपर्याप्त्यधिकरणस्य विवक्षितत्वा
त् त्रसरेणुनिष्ठस्नेहद्रवत्वयोश्च नावांतरवैलक्षण्यं येन तदेव तादृशप्रतिबंधकतावच्छेदकं भवेत्। प्रभाया
श्चोद्भूतस्पर्शविरहादेव त्वाचसाक्षात्कारानुत्पादात्तत्र त्वाचसाक्षात्कारप्रतिबंधकत्वं नवा तेजोत्क्रमेण विशे
षगुणत्वमिति न तत्राप्यतिव्याप्तिरित्याहुः। यत्तु स्नेहद्रवत्वान्यत्वे सति चक्षुर्ग्राह्यत्वं नता इत्थं च संख्यापरिमा
णादावतिव्याप्तिवारणायमाह। गुणेविशेषगुणइति विशेषगुणत्वं च वायुवृत्तिवृत्तिगुरुत्वावृत्तिधर्मवदन्यत्वेसति

गु.टी समवायित्वं समवायित्वोपादानानुभूतत्वसंख्यात्वपरिमाणत्वादेरनुगतस्य त्वग्ग्राह्यत्वाद्। योग्यताविवक्षायाः प्रयो-
५ जनं स्वयमेव स्फुटयति। देवादिति। त्वक्संन्निकर्षादिविरहवशादित्यर्थः। सांसिद्धिकेति। सर्वस्मिन्विशेषगुण-
९ त्वोपदर्शनाय ग्रन्थपाने मितिक द्रवत्वेपि यत्नो न विशेषगुणत्वव्रतेन सांसिद्धिकेत्यस्य व्यर्थत्वापत्तेः। विशेषप-
दं च संपातायातं द्रष्टव्यमिति। न त्वगग्राह्यत्र स्फुटग्राह्यधर्मवानित्यर्थः। चक्षुरादिप्रतिसंधाने पिरूपत्वादिप्रतीतेरनु-
नुभविकत्वादाह वक्ष्य[illegible]स्फुटतस्त्विति समवायत्वादीत्यादिपदात्तित्वत्वादनीलपीतत्वादिसुरभित्वादीनां परि-
ग्रहः। रूपत्वादपदं त्वादिपदाद्रसत्वगंधत्वादेपरिग्रहः। प्रसंकोचापादनमेवेति। चक्षुरादिप्रतिसंधाने रूपाकारा-
नुगतमतेरनुभवसिद्धत्वादिति भावः। केचित्तु रूपादेस्तादात्म्यसंबंधेन त्वात्वसाक्षात्कारप्रतिबंधकतया तदवच्छे-
दकत्वेन रूपत्वादिसिद्धिः। नीलत्वपीतत्वादेस्तथात्वे बहुतरप्रतिबध्यप्रतिबंधकभावापत्तेः। तच्च रूपत्वादिकं पर-
न्त्वेद्रुपाधिरूपमेवानुगतव्यंजकव्यंग्यत्वाभावादनुगतव्यंजकव्यंग्यत्वस्यापितन्मते जातिलक्षणघटकत्वादि राम

५

स्यात्॥ तदसत्। त्वाचसाक्षात्कारत्वजातिवंधकतावच्छेदकतया रूपरसगंधगुरुत्वस्थितिस्थापकेषु पंचसु लाघवात् एक
जातिसिद्धेः। पालक्षत्वस्य साक्षात्कार्यकत्वभ्रमनिरासाय व्याख्याः। अनुयोगितावच्छेदकत्वादिति वक्ष्यति जातिसि
द्धेः। वृत्तित्वेन विपक्षत्वनिरासाय स्यात्किंचित्कारत्वादाह॥ किंच मानाण्यामिति॥ सिद्धेः॥ वृत्तिविषयत्वाभावादाह॥ किंच मानवृत्तीति।
साधारणां भावि प्रत्यक्षविषयीभूततां कर्मव्यावृत्तजातिप्रत्यक्षस्यामिप्रत्यक्षत्वाभावितादृशव्यामिति यावत्तादेवलस्या
न्यत्वस्यव्यवस्थापकत्वेनानुक्तत्वादाह॥ अन्यत्वविशिष्टमिति भवत्येव भवन्मतेपि भवत्येवं अन्यत्वविशिष्टस्य व्याप्य
त्वाभावे तत्कथं स्यादिति भावः॥ ननु रूपत्वस्य तत्वेन दृष्टत्वे वृत्तिरूपादिरत्नत्वं वाद्वयोरेव प्रत्यक्षे उपदेशस्यासहकारित्वा
त्त्वनवारत्नत्वं रत्नत्वव्याप्यजातिः रत्नत्वव्याप्यघटत्वादेः प्रत्यक्षेपि उपदेशस्यासहकारित्वादित्यतो व्याचष्टे॥ रत्नत
त्वमिति जातिविशेषः पद्मरागत्वादिरूपः॥ वक्ष्यमाणयुक्त्या उपदेशस्य प्रत्यक्षसहकारित्वासंभवाद्व्याचष्टे॥ उपदेशे
तिवाक्यार्थज्ञानेति ज्ञानं च स्मृत्यनुभवसाधारणं तेन सर्वत्र शाब्दबोधस्याप्रागसत्वेपि न क्षतिः॥ यथाश्रुतेदोषं स्फुट
यथातादृशघटत्वादिप्रसक्तेनोपदेशः सहकारी तथातादृशपद्मरागत्वादिप्रसक्तेनो
पदेशः सहकारित्वेः॥ ३

गु.दी यति।आवश्यकेति।प्रत्यक्षपूर्वकाले सर्वज्ञशब्दस्यासत्त्वादिति भावः।ननु स्मृत्यनुभवसाधारणमुपदेशजं ज्ञानं सहकारि
१० वक्तव्यमत आह।वाक्यार्थज्ञानस्येति।अन्यथा उपदेशात्प्रमाविदुषोऽप्युपदेशज्ञानानुत्पत्तिप्रत्यक्षापत्तेरिति भावः।न
10 चोपदेशार्थयोगो वा संस्कारद्वारा सहकारीति प्रकाशितस्य वृर्णपरित्या गदति वा च्यं।तत्संस्कारस्य सहकारित्वे अनुद्बुद्धसं
स्कारतो विप्रत्यक्षापत्तेः।उद्बोधकानामपि विशिष्यहेतुत्वे च गौरवापत्तेरिति निगर्वितार्थ।प्रकाशकृता वस्तुतस्त्वादिनोद
पदिशब्दस्य धर्मविशेषज्ञानस्य च द्वयोरेव प्रत्यक्षहेतुत्वं निराकृतं तच्चायुक्तं रूपविशेषादिज्ञानं विनापघ्राणगत्वादिग्र
हणस्यानुभवसिद्धत्वादित्यभिप्रायेणाह।रूपेति।तद्विशिष्टस्य जातिविशेषविशिष्टस्य ग्रहे उपमितोऽत्र सामान्य
नियतपदस्य यथाश्रुतार्थत्वे तद्ग्रेनवेत्यादिना सामान्यनियतत्वेन गृहीतधर्मातत्भावेनोपदेशस्य सहकारितानिराकरण
मसंगतं न चाग्रे विसामान्यनियतपदं यथाश्रुतमेवेति वाच्यं सामान्यनियतधर्मातत्भावेनोपदेशस्य सहकारितानिरा
कृत्यलाघवात्सामान्यानतिप्रसक्तधर्मातत्भावेनोपदेशस्य सहकारितान्यवस्थापनस्यासंगतत्वापत्तेः अनतिप्रसक्तप

राम
१०

दनियतपदयोरेकार्थत्वादित्यतो व्याचष्टे। सामान्यनियतत्वेन गृहीतइति सामान्यव्याप्यत्वं गुणत्वरूपसामान्यव्याप्य
त्वं तत्र गुणत्वप्रत्यक्षात्पूर्वं गुणत्वस्याप्यनुपस्थितेरितिभावः। ननु तस्योपाधेः गुणत्वव्याप्यताग्रहे तत्र गुणत्वव्याप्य
तायामेव विशेषणविधया तत्र आह। गृहीतायां चेति। जातौ गुणत्वजातौ वस्तुतः इत्यादिनाऽव्यवधानेनोपदेशज्ञान
स्य जातिप्रत्यक्षहेतुताया निराकृतत्वाद्यथाश्रुतासंगतेराह। इंद्रियमिति। ज्ञानं गुणत्वविशिष्टउक्तोपाधिज्ञानं
गुणत्वविशिष्टस्येति एवं च प्रकारोऽनगमयिष्यतीत्यस्य उपमापयिष्यतीत्यर्थः। न चोपमितौ कथमुक्तोपाधिज्ञाना
पेक्षेति वाच्यं यद्धर्मविशिष्टे पदवाच्यताग्रहः समानधर्मितावच्छेदकतद्धर्मवत्ताज्ञानस्यापि तत्पदवाच्यत्वोप
मितौ हेतुत्वादिति [redacted] भावः। एवंविक्तपक्षस्यैवेति। उपदेशजशाब्दज्ञानमेवेत्यादिग्रहे इंद्रियस्य सहकारीति
पक्षस्यैवेत्यर्थः। वदंतीत्यस्वरसोद्भावनं तद्बीजं तु व्यवहितोक्तं विहाय व्यवहितोक्तस्योपसंहारे संदर्भविरोध इ
ति स्वनत्तां परिहर्तुमुपरयति। सहजेतावेति। इंद्रियसंनिकर्षादिसामान्यसामग्रीमात्रसत्वे इत्यर्थः। ननु एवं मवि

=यद्धर्मः कर्मीमत्वादिः ४

गु.दी. गुणत्वधर्मिणस्तत्त्वलक्षणस्य चाभ्युपगमादिदमसंगतमित्यत आह । मतभेदेनेति । यन्नये गुणत्वधर्म्यैवासिद्ध
११ स्तन्मतेनैतदित्यर्थः । सामान्यवत्त्वे कार्यनाश्यत्वे च सति कर्मान्यत्वरूपोक्तव्यवस्थापकस्य गुणेऽपि नेति प्रस क्रि२
क्तिविरहादाहतुल्येति । तथा चानभिमतजात्यन्तरसिद्ध्यापत्तिरेव प्रकृते तत्प्रसंगशब्दार्थ इति भावः । ननु क
र्मणो विभागजनने द्रव्यसंयोगयोः संयोगजनने च पूर्वसंयोगनाशद्रव्ययोरपेक्षणादसंभव इत्यतो व्याचष्टे ।
स्वेति । स्वलक्षणत्वेनाभिमतं तदधिकरणीभूतो यः कालस्तत्स्वाधिकरणस्वलोपातिक्रमोभावस्तदनपेक्षत्वे त
दसहकृतत्वमित्यर्थः । तादृशभावाजन्यसंयोगविभागोभयजनकत्वमिति तु समुदितनिष्कर्षः । इत्थं च द्रव्यसंयो
गयोरेतादृशापेक्षणेऽप्यतिरिक्ताभावात् संयोगनाशस्य भावत्वाभावात्तस्यापेक्षत्वेऽपि न दोष इति भावः । अत्र तादृशक्ष
णवृत्तिभावेऽनुक्ते वसंभवः कर्मणो विभागोभयजनने तोऽतरवृत्तिद्रव्यस्यैवापेक्षणादत उत्पत्तिक
लपर्यन्तं तादृशकालोत्पत्तिकेत्युक्तावपि द्रव्यमादायासंभवः द्रव्यस्यापि कर्माधिकरणकालध्वंसाधिकरणका
राम
११

लो महाकालः वत्सरादिनाप्यालम्बकस्य लकालोपाधित्वं तदुत्पत्तिकत्वादतः क्षणेति स्वाधिकरणक्षणोत्पत्तिक
भावाभावे क्षणत्वमात्रोक्तावप्यसंभवः कर्मणोपि तदुभयजनने स्वाधिकरणक्षणोत्पत्तिकस्य स्वस्यैवापेक्षणा
दतः स्वाधिकरणकालध्वंसाधिकरणत्वपर्य्यन्तं क्षणविशेषणं स्वाधिकरणध्वंसाधिकरणेत्युक्तावप्यसंभ
वः कर्मणोपि तदुभयजनने विषयितासंबंधेनाव्याप्यत्वादिसंबंधेन वा स्वाधिकरणीभूतातीतक्षणादिध्वंसाधि
करणक्षणोत्पत्तिकस्य द्रव्यस्य स्वस्य वापेक्षणादतः कालपदं कालिकविशेषणतासंबंधेन स्वाधिकरणत्वला
भाय ननु स्वाधिकरणक्षणोत्पत्तिकस्वभिन्नभावानपेक्षत्वमित्येव सम्यक् किं स्वाधिकरणकालध्वंसाधिक
रणत्वेन क्षणविशेषणेन नैवं यत्कर्मव्यक्त्या स्वाधिकरणक्षणोत्पन्नोत्तरदेशेन संयोगो जनितः स्वाधिकरण
क्षणोत्पन्नसंयोगाभावेण वा विभागो जनितस्तत्कर्मण्यव्याप्तिः तेन संयोगजनने तादृशस्वभिन्नभावस्योत्तरदेश
स्याविभागजनने तादृशस्वभिन्नभावस्य संयोगस्यापेक्षणादिति वाच्यं स्वोत्तरोत्पन्नोत्तरदेशाभिष्ठसंयोगजनिका

>पूर्वकर्मणास्वाधिकरणक्षणोउत्पन्नः पूर्वदेशसंयोगएतत्क्रियाजन्यविभागजनकः >२

यां क्रियायामुत्तरसंयोगविभागोभयाजनिकायां विनश्यदवस्थघटादिक्रियायां चाव्याप्तिवारणाय लक्षणस्य जातिघ
टितत्वावश्यकत्वेनाव्याप्तिदानस्यैवाज्ञानविलसितत्वादिति चेन्न। तस्यापि लक्षणांतरत्वेन प्रकृते दोषाभावात्। अत एव
स्ववृत्तिप्रागभावप्रतियोग्यनपेक्षत्वे वास्तु क्रियात्वादिप्रवेशेन प्रागभावस्य भावस्मिन्नोत्प्राप्त्यः तेन संयोगनाशापेक्ष
त्वेविना संभवद्वृत्तिकस्यचित् प्रलपितमपास्तं। तस्यापि लक्षणांतरत्वेन प्रकृते दोषाभावादिति ध्येयं। ननु स्वाधिकर
णकालध्वंसाधिकरणक्षणोत्पत्तिकभावानपेक्षसंयोगजनकत्वं तादृशक्षणोत्पत्तिकानपेक्षविभागजनकत्वं वा
लक्षणमस्तु किं संयोगविभागोभयप्रवेशेनेत्यत आह। एकैकेति। संयोगविभागयोरिति तादृशक्षणोत्पत्तिकभा
वानपेक्षसंयोगजनकत्वमात्रोक्तौ च संयोगजनकसंयोगेतिव्याप्तिः तादृशक्षणोत्पत्तिकानपेक्षविभागजनक
त्वमात्रोक्तौ च विभागजविभागमादाय विभागेतिव्याप्तिरित्यर्थः। ननु अस्तु संयोगविभागोभयप्रवेशस्तथाप्युभय
त्वतादृशभावाजन्यत्वविशेषणमसंगतं कारणाकारणसंयोगस्य कार्याकार्यसंयोगं प्रति स्वोत्तरोत्पन्नकर्मसहका

(=यत्र कारणाकारणसंयोगस्ततः कार्याकार्यसंयोगः क्रिया च। ततो विभागस्तत्रेत्यर्थः=१)

=१ संयोगजनकत्वे सति विभागजनकं यत्कर्म तत्त्वं अलक्ष्ये ... त्यव्याप्तिरतेस्तादृशभावाजन्यत्वमावश्यकं तत्र संयोग एव तद्घटेनेऽलक्ष्ये संयोग एवातिव्या
प्तिः रतः विभाग एव तद्वयं तथासति विभागस्य स्वोत्तरोत्पन्नकर्मजन्यतया न कारणाकारणसंयोगेऽतिव्याप्तिरित्यर्थः =१

(=२ तत्र पूर्वसंयोगनाशस्य स्वाधिकरणक्षणध्वंसा

कारणा
(=३ कार्याकार्यसंयोगस्य कारणौ विभागस्य च जनके कारणाकारणसंयोगे=१)

रणविभागे प्रति च जनकतया तत्रातिव्याप्तिवारणाय विभागेतादृशभावाजन्यत्वविशेषणस्यावश्यकत्वेन संयोगे तद्वि
शेषणस्य । व्यर्थतातान्न तु नदेयमेव संयोगत द्विशेषणमिति वाच्यं । तथासति भावे पदवैयर्थ्यापत्तेरिति चेन्नाप त्रां
गुलीशाखासंयोगः शाखायां च कर्मेत्येकः कालः ततोंगुलीशाखाविभागो हस्तस्य जन्मेत्येकः कालः ततोंगुली
शाखासंयोगनाशो विनश्यदवस्थांगुलीशाखासंयोगा हस्तशाखासंयोगश्च युगपज्जायते तत्रांगुलीशाखा
(विभा)गो हस्तस्य जन्मेत्येकः कालः ततोंगुलीशाखासंयोगनाशो विनश्यदवस्थांगुलीशा(खा)(सं)योगा हस्तशा
(खा) संयोगश्च युगपज्जायते तत्रांगुलीशा(खा) संयोगे तादृशांगुलीशाखासंयोगजातीये संयोगमात्रेवातिव्याप्ति
वारणाय संयोगेपि तद्विशेषणस्यावश्यकतया तासंर्वत्रासमवायिकारणस्य कार्येसहभावे नाहेतु तया विनश्य
दवस्थांगुलीशाखासंयोगादपि हस्तशाखासंयोगोत्पत्तौ वाधकाभावात् । परंतु संयोगविशेषणेभावत्वं निवेश
नीयं विभागविशेषणे तु न तन्निवेशनीयमित्येव विशेषइति भावः । ननु पत्रांगुलीशाखासंयोगः शाखायां च कर्मेत्येकः

(=६ = स्वाधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकाभावस्य हस्तस्यापेक्षणालातिव्याप्तिरिति भावः =६)

(=७ घटादौ समवायिकारणनाशेन द्रव्यनाशात्प्रसात्स्य कार्येसह भजनसेवहे)
तुल्यसमस्ततत्रत्वम्यत्र तथा च द्व्यस्थलद्वत्तत्तीयक्षणावृत्तिध्वंसप्रतियो(गि)
(त्व) नापत्तिसंयोगाभावमिति मर्थः =७)

=५ प्रत्यक्षादौ ... तत्संयोगस्य विभागाजन्यत्वं ... संयोगादिभिन्नत्वे सति ... कर्मजन्यतामादाय ... विभागोत्पत्तेर्भावे ...
ताकजातीयत्वमर्थः तत्र चयथोक्तानपेक्षत्वस्य द्विधा प्रवेशाभा
वे भयपर्याप्तजन्यतायाः प्रसिद्ध्या पसेकजन्यतामादाय संगमस्थलेसं
योगे तु भयदिव्यवतादृशानपेक्षजन्यतानिवेशावश्यकत्वादिति =५

=२ धिकरणक्षणोत्पत्तिकत्वाभावेनाद्यघटकाभावः =२)

कालः ततोंगुलीशाखासंयोगाद्धस्तशाखासंयोगः पूर्वोत्पन्नशाखाकर्मणा शाखांगुलीविभागश्चेत्येकः कालः त
त्रांगुलीशाखासंयोगेतिप्रसंगः तेन हस्तशाखासंयोगजनने शाखांगुलीविभागजनने च स्वोत्तरोत्पन्नानपेक्षत्वादि
त्यत आह । यद्यपीति । शाखाकर्मजनितशाखांगुलीविभागजनने च स्वोत्तरोत्पन्नानपेक्षत्वादित्यत आह । यद्यपीति
शाखाकर्मजनितशाखांगुलीसंयोगस्थले शाखांगुलीसंयोगोत्पत्तिकाले शाखायां कर्मोत्पत्त्यसंभवः कर्मवति
कर्मान्तरानुत्पत्तेरत उक्तं अंगुलीकर्मेति । स्वसमानेति स्वसमानकालोत्पन्नेन शाखाकर्मणा जनितेनेत्यर्थः । स्वोत
रोत्पन्नशाखाकर्मापेक्षायां न स्वोत्तरोत्पन्नभावानपेक्षत्वमित्यतः स्वसमानकालोत्पन्नेत्युक्तं । स्वसमानकालोत्पन्न
त्वं च स्वोत्पत्तिक्षणोत्पत्तिकत्वं तेन स्वोत्तरोत्पन्नस्यापि स्थलकालमादाय न स्वसमानकालोत्पन्नत्वं । एतच्चोपल
क्षणं स्वपूर्वोत्पन्नेत्यपि बोध्यं । स्वपश्चाद्भावीति स्वपश्चाद्भाव्यनपेक्षः स्वपश्चाद्भाव्यजन्यो यः स्वजन्यविभाग
स्तदधीनेत्यर्थः । स्वं लस्थले नाभिमतं उक्तस्थले अंगुलीशाखासंयोगजन्यहस्तशाखासंयोगेनांगुलीशाखा

विभागाधीन इति नातिप्रसंग इति भावः। अप्रवद्धचेति व्याप्तिवारणाय जन्यांतं विभागविशेषणं इत्थं च तस्य स्व
पश्चाद्भाव्यजन्यो न विभागः तत्पश्चाद्भाविनोः कर्मसंयोग[illegible]योरेव विभागजनकत्वादिति नातिव्याप्तिः। त
स्य संयोगविशेषणत्वे तु संभवः क्रियायाः स्वपश्चाद्भाविपूर्वसंयोगनाशजन्यसंयोगस्यैव जनकत्वात् स्वपश्चाद्भा
व्यजन्यत्वं तु स्वाधिकरणसमयध्वंसवृत्तिप्रागभावाप्रतियोगित्वं लाघवात् ध्वंसवृत्तित्वं च कालिकविशेषणतासंब
धेन स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणसमयवृत्तित्वं वा तेन प्रागभावानभ्युपगमेऽपि न क्षति
ः। यत्रैव घटक्रिया ततो घटपूर्वदेशविभागः उत्तरदेशावच्छिन्नपटोत्पत्तिश्चैकः कालः ततो घटपूर्वदेशसंयोगनाशः
ततो विभागकालोत्पन्नपटावच्छेदकोत्तरदेशेन समं घटसंयोगस्ततो उत्तरदेशावच्छिन्नपटेऽतिप्रसंगवारणाय स्वजन्येति विभाग
विशेषणं। यत्तु। स्वजन्यत्वविशेषणानुपादाने पूर्वसंयोगनाशवातिव्याप्तिरिति। तन्न। लक्षणस्य जातीयत्वघटित
तयानाशेति व्याप्त्यसंभवात्। स्वोत्तरवृत्तीत्युक्तावपि संदोषस्तदवस्थ इति स्वजन्यत्वपर्यंतं। स्वोत्तरोत्पत्तिकेत्युक्तावपि

= स्वयं स्वजन्यत्वप्रवेशफलमाह = ५

१ = यत्र घटक्रियासमकालमुत्तरदेशावच्छिन्नपटोत्पत्तिः ततो विभागस्ततः घ टपूर्वदेशसंयोगनाशः पटघटसंयोगनाशः ततः सूक्ष्मं ॥

घटादौ क्रियाकाल एवोत्तरदेशात्मकपटोत्पत्तिदशायां [illegible]मुक्तस्थल एवातिप्रसंगः। न च स्वजन्यत्वोपादानेपि तत्राति
प्रसंगो दुर्वारः घटक्रियासमकालोत्पन्नोत्तरदेशात्मकपटस्यापि कालत्वेन द्रव्यत्वेन च घटपूर्वदेशविभागजनक
त्वादिति वाच्यं। स्वजन्येत्यत्राश्रयाधारत्वप्रलोपधानस्वजन्यताया विवक्षितत्वात्। स्वपश्चाज्जाय जन्यविभागवृत्त
मात्रवृत्तौ विभागजविभागमादाय विभागेऽतिव्याप्तिरतः स्वजन्यविभागाधीनसंयोगजनकत्वमिति विभागाधीनत्वं च न
विभागजन्यत्वं विभागस्य पूर्वसंयोगनाशेनान्यथासिद्धतया उत्तरसंयोगाहेतुत्वात् नापि विभागजन्यजन्यत्वं जन्यताव
यप्रवेशे गौरवात् व्यर्थत्वाच्च। अपि तु विभागजनकत्वे सति कत्वं नैवं वपुत्रांगुलीकर्मजनितपाश्वांगुलीसंयोगः शाखायां
च कर्मोत्पत्तेः कालस्ततः पाश्वाकर्मणा शाखांगुल्योर्विभागः हस्तोत्पत्तिश्चैककालः इदानींत्वंगुलिशाखासंयोगा
द्धस्तशाखासंयोगो नोत्पद्येत समवायिकारणस्य हस्तस्य पूर्वं विरहात् ततो विनश्यदवस्थांगुलीशाखासंयोगाद्धस्त
शाखासंयोगो ~~[illegible]पद्येत समवायिकारणस्य हस्तस्य पूर्वं वि[illegible]~~ हस्तांगुलीशाखासंयोग इति व्याप्तिः तस्य तादृशविभागो

तदुत्पत्तिकस्य हस्तशाखासंयोगस्य जनकत्वादिति वाच्यं । असमवायिकारणस्य कार्यसहभावेन हेतुतया विन-
श्यदवस्थांगुलीशाखासंयोगाद्धस्तशाखासंयोगोत्पादासंभवात् । यदि च द्रव्यस्य लए वा समवायिकारण-
स्य कार्यसहभावेन हेतुत्वं नान्यत्र तदा तु विभागाधीनत्वं विभागप्रयोज्यत्वं तच्च कारणकारणव्यावृत्तान्यथा
सिद्धिचतुष्टयानिरूपककालत्वातिरिक्तानियतपूर्ववर्तितावच्छेदकधर्मवत्विभागकत्वं कालत्वातिरिक्तेत्युपा-
दानादंगुलीशाखाविभागस्यापि कालत्वेन हस्तशाखासंयोगजनकतया न तद्दोषतादवस्थ्यं । ननु स्वपश्चाज्ज-
न्यजन्यस्वजन्याधीनसंयोगजनकत्वमित्येवास्तु किं विभागपदेनेति चेत् । यत्र घटोत्पत्तिः ततस्तत्र गुरुत्वोत्पत्तिः
ततो गुरुत्वात्पतनं ततः पतनेन घटभूतलसंयोगः तत्र घटेतिप्रसंगापत्तेः तत्स्वपश्चाज्जन्यजन्यस्वजन्यगुरुत्वमेव
तदधीनो घटभूतलसंयोगस्तज्जनकत्वात् । एवं रूपेण द्रवत्ववेगादिजन्यकर्माधीनसंयोगजनकतयापि द्रव्येऽति
व्याप्तेश्च । किंच पटांगुलीतंतुसंयोगः पटोत्पत्तिश्चेत्येककालः ततो अंगुलीतंतुसंयोगात्पटांगुलीसंयोगः ततः पटहस्त

गु.टी संयोगस्ततः पटहस्तसंयोगात् पटशरीरसंयोगस्तत्र पटे इति व्याप्तिः तस्य स्वपक्ष्माद्धाव्यजन्यत्वजन्यः पटांगुलीसंयोगः प
१५ टहस्तसंयोगद्वारा तदधीनः पटशरीरसंयोगस्तज्जनकत्वात् । ननु तथापि स्वपक्ष्मात् भाव्यजन्यत्वा । जन्यविभागा
15 धीनजनकत्वमित्येवास्तु । कृतं संयोगपदेनेति चेन्न । तर्हि पत्रांगुलीकर्म्मजनितशाखांगुलीसंयोगः शाखायां चक
र्मेत्येकः कालः ततश्च शाखाकर्म्मणा शाखांगुलीविभागः ततो विभागेनांगुलीशाखासंयोगनाशः तत्रांगुलीशाखा
संयोगे प्रतियोगिविधयाताद्दशविभागाधीनत्वनाशजनकेऽतिप्रसंगापत्तेः । किं च पत्रांगुलीशाखासंयोगः शाखा
यां च कर्मेत्येकः कालः ततः शाखाकर्मणा शाखांगुलीविभागः ततः संयोगे तद्विभागयोः प्रत्यक्षं तत्र शाखांगुलीसं
योगेऽतिप्रसंगः तस्य स्वपक्ष्माद्धाव्यजन्यः स्वजन्यो विभागः शाखांगुलीविभागः तदधीनस्य तदुभयवाच्युत्पस्य ज
नकत्वात् । अधीनत्वं स्वजन्यजन्यत्वमित्युक्तावपि तदानेपत्रांगुलीशाखाविभागानंतरं हस्तशाखाविभागः ततो
हस्तशाखापूर्वसंयोगनाशः ततोंगुलीशाखाविभागपूर्वसंयोगनाशयोस्साम्युपं तत्रांगुलीशाखाविभागेऽतिप्रसं

राम
१५

स्त गस्य स्वपश्चाद्भाविध्वजन्यः स्वजन्यो विभागः हस्तशाखाविभागः तज्जन्यो हस्तशाखापूर्वसंयोगनाशः तज्जन्यं तदुभ
यत्राप्युत्तरं तस्यैव विषयविधयाजनकत्वात् विनश्यदवस्थावयवस्य त्वन्नक्रियायां संयोगविभागजनिकायामव्या
प्तिवारणाय जातीयत्वमिति। एतन्मात्रे स्वयमेव वक्ष्यति। तज्जातीयत्वं च तद्वृत्तिसत्तान्यधर्मसमवायित्वं तेन स
त्तामादाय द्रव्यादौ नातिप्रसंग इति दिक्। ननु पत्रपूर्वदेशसंयुक्तांगुल्यां क्रिया हस्तोत्पत्तिक्षणे त्वेकः कालः ततो
संयोगज = ऽंगुलीक्रियया अंगुलिपूर्वदेशविभागो हस्ते पूर्वदेशसंयोगक्षणे ततोंगुलीपूर्वदेशसंयोगनाशो हस्तेपूर्वदेशविभाग
क्षणे त्वेकः कालः ततोंगुल्या वृक्षात्मकोत्तरदेशासंयोगः हस्तपूर्वदेशसंयोगनाशक्षणे त्वेकः कालः ततो हस्तस्यापि वृ विभागजः =
क्षात्मकोत्तरदेशसंयोगः तत्रांगुलीवृक्षसंयोगेति प्रसंगः तस्य स्वपश्चाद्भाविध्वजन्यो विभागो हस्तपूर्वदेशविभा
गः तदधीनो हस्तवृक्षसंयोगः तज्जनकत्वात्। यदि च संयोगमात्रजं संयोगं प्रति पूर्वसंयोगस्याप्रतिबंधकत्वन्न येन त
त्र हस्तवृक्षसंयोगस्यैव विभागाधीनत्वं तदापि पत्रांगुलीशाखासंयोगो हस्तोत्पत्तिः शाखायां च कर्मत्वेकः कालः

ततः शाखाकर्मणा शाखाङ्गुलीविभागो हस्तशाखासंयोगश्च ततोऽङ्गुलीशाखासंयोगनाशो हस्तशाखाविभागश्च त
तो हस्तशाखासंयोगनाशः शाखाकर्मसमकालोत्पन्नाङ्गुल्यन्तरक्रियाधीनोऽङ्गुल्यन्तरशाखासंयोगश्च ततोऽङ्गु
ल्यन्तरशाखासंयोगशाखाकर्मभ्यां हस्तशाखासंयोगस्तत्राङ्गुल्यन्तरशाखासंयोगेति व्याप्तिरित्यत आह । अङ्गु
लीति नाङ्गुलीति तथा च स्वजन्यो यो विभागस्तदधीनसंयोगजनकत्वाभावान्नातिप्रसंग इति भावः । एतेन स्वज
न्यपदस्य दलतो व्यावृत्तिर्दर्शिता न च तथापि पत्राङ्गुलीशाखाविभागादङ्गुलीतरुविभागः ततोऽङ्गुलितरुसंयोगना
शः ततोऽङ्गुल्या उत्तरदेशसंयोगः तत्राङ्गुलीशाखाविभागेति व्याप्तिः । तस्य स्वजन्याङ्गुलीतरुविभागाधीनाङ्गुल्यु
त्तरदेशसंयोगं प्रति कालविधया जनकत्वादिति वाच्यं संयोगं प्रति कालविधया जनकत्वादिति वाच्यं । संयोगं प्रत्य
साधारणजनकतया विवक्षितत्वादिति भावः । इदं तु सपक्षाद्व्यनपेक्षत्वादिप्रवेशेन गुरुरत्र स्वरसासिद्धं चातो ल
घुभूतं स्वरससिद्धं लक्षणमाह । संयोगेति । संयोगासमवायिकारणतावच्छेदकं सघटितविभागासमवायिकारणतावच्छेदकं

तद्रूपवत्त्वमित्यर्थः। केचित्तु पूर्वसंयोगध्वंसो नोत्तरसंयोगहेतुः तथा सति पूर्वसंयोगवत्यपि पूर्वसंयोगांतरध्वंसस
त्त्वेनोत्तरसंयोगोत्पत्त्यापत्तेः तत्तत्संयोगव्यक्तौ तत्तत्संयोगनाशव्यक्तेः विशेष्य हेतुत्वे चानेन कार्यकारणभावापत्तेरपि तु व
क्ष्यमाणरूपेण पूर्वसंयोगसामान्याभाववत्त्वं हेतुरिति मते विभागप्रयोज्यत्वस्यैवोत्तरसंयोगे सिद्धत्वादसंभव इत्य
रुचेराह। संयोगेति। अर्थस्तु पूर्ववदित्याहुः। न व्यासज्यवृत्तित्वस्यानुगतस्याभावेन स्वपदस्य यत्किंचित्कर्मव्यक्तिपरत
या तत्कर्मणि स्वाश्रयमात्रजन्यतत्कर्मजन्यविभागाधीनसंयोगजनकजातीयत्वमर्थः तथा च द्रव्यादावतिव्याप्तिः। न
च तादृशसंयोगजनकतत्कर्मजातीयत्वमर्थ इति वाच्यं। जनकांतवैयर्थ्यापत्तेरित्यरुचेराह। संयोगेति। अर्थ
स्तु पूर्ववदित्याहुः। अत्र विभागजविभागमादाय विभागेऽतिव्याप्तिवारणाय प्रथममवच्छेदकांतं संयोगजन्मा संयोग
दाय संयोगेति व्याप्तिवारणाय द्वितीयं तदुभयसमवायिकारणतावच्छेदकं द्रव्यत्वमादाय द्रव्येति व्याप्तिवारणाय
समवायीति। अजनितसंयोगविभागस्य कर्मणः संग्रहायावच्छेदकगर्भता। ननु संयोगेति व्याप्तिवारणाय विभाग

अन्यथा विभागजनकविभागे कालविधयसंयोगजनकेऽतिव्याप्तेः २

गु.दी दिशि वक्ष्यमाणरूपासमवायिकारणत्वप्रवेशस्यावश्यकत्वेन तत एव द्रव्येति व्याप्तिविरहात् संयोगदिशि तादृशास
१२ मवायिकारणत्वपर्यंतप्रवेशो व्यर्थः। असाधारणजनकतामात्रस्यैव सम्यक्त्वात् न च विभागजविभागमादाय
17 विभागे अतिव्याप्तिरिति वाच्यं। विभागस्य पूर्वसंयोगनाशेनान्यथासिद्धतया संयोगाहेतुत्वादित्यरूचेराह। सं
योगजनकेति संयोगजनकसंघट्टविभागासमवायिकारणं तज्जातीयत्वमित्यर्थः संयोगजनकत्वमत्र संयोगा
साधारणजनकत्वं तच्च समवायसंबंधावच्छिन्नसंयोगजनकत्वं तेन विभागस्यापि कालोपाधितया संयोगज
नकत्वे नातिव्याप्तिः। ननु सूत्रे अनपेक्षकारणं कर्मेत्येव वर्तते असमवायिकारणत्वपर्यंतं कुतो लभ्यत इत्य
त आह। अनपेक्षेति। असमवाय्यंतरेति स्वभिन्नासमवायिकारणनिरपेक्षकारणत्वरूपस्येत्यर्थः। अनपेक्ष
कारणमित्यत्रानपेक्षकारणत्वं स्वभिन्नासमवायिकारणनिरपेक्षकारणत्वं। तच्चासमवायिकारणत्वमेवप
र्यवसन्नं निमित्तकारणादीनां कार्यजननीये ऽवश्यं स्वभिन्नासमवायिकारणसापेक्षतया निमित्तकारणत्वादी राम

१२

नाशेनादृशत्वाभावादिति भावः। ननु द्वितीयतृतीयलक्षणयोः कारणाकारणसंयोगेति व्याप्तिः तस्य कार्याकार्यसं
योगं कारणाकारणविभागे च प्रत्यसमवायिकारणत्वादित्यत आह। संयोगस्येति। ननु तथापि तृतीयलक्षणं विभा
गेति व्याप्तं तस्य पूर्वसंयोगनाशद्वारा उत्तरसंयोगं प्रति जनकत्वाद्विभागं प्रति जनकत्वाद्विभागजविभागं प्र
त्यसमवायिकारणत्वाच्चेत्यत आह। प्रतिबंधकेति। अपनयनेन अभावेन तृतीयवार्त्तिकादाविति सुव्यक्तमिति
प्रागुक्तेनान्वयः एतेन त्वमग्रे विवेचयिष्यामः। ननु तथापि संयोगस्य विभागासमवायिकारणत्वनये कारणाकारणसं
योगे उक्तक्रमेणेति व्याप्तिः उभयलक्षण एव दुर्वारेत्यत आह। संयोगस्येति। यद्यपि विभागासमवायिकारण
त्वपदेन संयोगावृत्तिसमवायसंबंधावच्छिन्नविभागकारणत्वविवक्षणे संयोगस्य विभागासमवायिकारण
त्वनयेपि पूर्वोक्तलक्षणद्वयमेव सम्यक् तथापि स्फुटत्वात्तदुपेक्ष्य लक्षणांतरमाह। प्रयोज्येति। उत्तरसंयोगो
विभागप्रयोज्यः पूर्वदेशविभागस्तत्प्रयोजक इति तादृशोभयासमवायिकारणत्वं कर्मण एव ननु कारणाकारणसं

गु.टी. योगस्य तज्जन्यकार्याकार्यसंयोगकारणकारणविभागयोः परस्परं प्रयोज्यप्रयोजकभावानापन्नत्वादिति भावः। अत्र
१८ द्रव्यकारणयासमवायीति। ननु प्रयोज्यप्रयोजकभावापन्नत्वं यदि प्रयोज्यत्वप्रयोजकत्वान्यतरत्वं तदा उक्ताति व्याप्तिस्तद
18 वस्थैव कार्याकार्यसंयोगकारणकारणविभागयोरपि कस्यचित् प्रयोज्यत्वप्रयोजकत्वान्यतरत्वात्। अथ यावत्त्वेन तद्वि
शेषणे वैयर्थ्यं च यदि च संयोगप्रयोजको यो विभागः विभागप्रयोज्यश्च यः संयोगस्तदुभयासमवायिकारणत्वमर्थः। तद
प्युक्ताति व्याप्तिस्तदवस्थैव कारणकारणसंयोगजन्यकार्याकार्यसंयोगस्यापि कार्यद्रव्यदेशविभागप्रयोज्यत्वात्। एवं त
ज्जन्यकारणकारणविभागस्यापि कारणाकारणान्यतरसंयोगप्रयोजकत्वात्। न च परस्परप्रयोज्यप्रयोजकभावापन्नसं
योगविभागोभयासमवायिकारणत्वं विवक्षितमिति वाच्यं। परस्परत्वस्य दुर्वचत्वात् इति चेन्न। स्वासमवायिकारणक
विभागप्रयोज्यसंयोगासमवायिकारणजातीयत्वस्य स्वासमवायिकारणकसंयोगप्रयोजकविभागासमवायिकार
णजातीयत्वस्य वा विवक्षितत्वात्। अत्र प्रथमे कार्याकार्यसंयोगमादाय कारणकारणसंयोगेति व्याप्तिवारणाय प्रयोज्यां

राम
१८

=कारणपूर्वदेशसंयोगनाशकारणकार्यसंयोगद्वारा=१

तं संयोगविशेषणं एवमपि कार्याकार्यसंयोगस्यापि परंपरया कारणपूर्वदेशविभागप्रयोज्यत्वात्तद्दोषतादवस्थ्यं यदि
च प्रयोज्यत्वं जन्यजन्यत्वं तदापि पत्रांगुलीशाखासंयोगो हस्तोत्पत्तिः शाखायां च कर्मोत्पत्तेकः कालः ततः शाखाकर्मणा
शाखांगुलीविभागो हस्तशाखासंयोगश्च ततोंगुलीशाखासंयोगनाशो हस्तशाखाविभागः ततो हस्तशाखासंयो
गनाशः शाखाकर्मसमकालोत्पन्नांगुल्यंतरक्रियाधीनोंगुल्यंतरेशाखासंयोगश्च ततोंगुल्यंतरशाखासंयोगशा
खाकर्मभ्यां हस्तात्मकोतरदेशे शाखायाश्चित्रसंयोगस्तत्रांगुल्यंतरशाखासंयोगेति व्याप्तिः। यदि च चित्रसंयोगो ना
भ्युपेयते तदापि पत्रांगुल्योः शाखायां संयोगाभ्यां एकैकं एव शाखापाणिसंयोगो जनितः ततः एकांगुलीक्रियया विभागा
द्विकर्मसमकालोक्तांगुलीसंयोगनाशोंऽगुलीशाखाविभागजः शाखापाणिविभागश्चेत्येकः कालः ततः शाखापाणिसंयोगना
शः ततोऽवस्थितांगुलीशाखासंयोगे न पुनः शाखापाणिसंयोगस्तत्रावस्थितांगुलीशाखासंयोगेति व्याप्तिरतः स्वासमवा
यि कारणकेति विभागविशेषणं यदि च प्रयोज्यत्वं जन्यजन्यत्वं चित्रश्च न संयोगः उत्पन्नस्य तत्प्यंगुलीद्वयावच्छेदेन संयो

=पाणेशाखासंयोगद्वयं=[redacted]

गु.ए.८ गद्यं संयोगमात्रजसंयोगे च पूर्वसंयोगानपेक्षत्वं ध्वस्तमिति मतं तत्तदनुरुध्य समवायिकारणत्वेति नोपादेयमेव । स्वजन्य
१९ त्वमात्रोक्तौ च तन्त्वाकाशसंयोगानन्तरं तन्त्वन्तरे पटारंभकसंयोगविरोधिविभागः ततः पटनाशो खंडपटोत्पत्तिरनंतरं प्रा पी२
19 थमिकतंत्वाकाशसंयोगात् खंडपटाकाशसंयोगस्तत्र प्राथमिकतंत्वाकाशसंयोगेति व्याप्तिः । तस्य स्वासमवायिका
रणक खंडपटाकाशसंयोगप्रयोजकपूर्वपटनाशकारंभकसंयोगप्रतिद्वंद्वितंतुद्वयविभागं प्रति कालविधयाजनकत्वात् । यदि
प्रयोज्यत्वं जन्यजन्यत्वं तदापि पत्रांगुलीसंयुक्तशाखा कर्मण्यंगुलीसंयुक्तशाखापूर्वदेशविभागो न त्वंगुलीशाखाविभागः
अंगुल्या अविचलत्वात् अंगुलीसंयुक्तशाखापूर्वदेशसंयोगनाशोंगुल्यां हस्तोत्पत्तिक्षणे कः कालः ततः शाखायामग
नाशोत्तरदेशसंयोगवदंगुलीशाखासंयोगशाखाकर्मभ्यां हस्तशाखासंयोगश्च ततोंगुलीशाखासंयोगेति व्याप्तिः तस्य
कालत्वेन शाखापूर्वदेशविभागंजनकत्वात् । अतोऽसमवायिकारणत्वानुधावनं असमवायिकारणत्वे च समवायसंबं
धावच्छिन्नकारणत्वमात्रेन त्वाधिकं गौरवात् व्यर्थत्वाच्च । न च स्वासमवायिकारणकविभागकत्वे सति संयोगासमवा
राम
१९

यिकारणत्वमित्येवास्तु तत्तिं प्रयोज्यत्वप्रवेशेनेति कार्यं। कारणाकारणसंयोगस्यापि कारणाकारणविभागं कार्यका
यिसंयोगं च प्रत्यसमवायिकारणतया तत्राति व्याप्तिवारणाय प्रयोज्यत्वप्रवेशस्यावश्यकत्वात्। विभागप्रयोज्यत्वं च
नविभागजन्यत्वं असंभवात्। न वा जन्यजन्यत्वं गौरवात्। नापि तदुत्तरोत्पत्तिकत्वं पत्रांगुलीशाखासंयोगः शाखायां च
कर्मेत्येकः कालः ततः शाखाकर्मणा शाखांगुलीविभागो हस्तोत्पत्तिश्चेत्येकः कालः ततो विनश्यद्द्रव्यस्यांगुलीशाखा
संयोगाद्धस्तशाखासंयोगस्तत्रांगुलीशाखासंयोगेति व्याप्तिः। किं तु कारणाकारणादिव्यावृत्तान्यथासिद्धिचतुष्टयानि
रूपककालत्वातिरिक्तनियतपूर्ववर्तितावच्छेदकधर्मवद्विभागकत्वं कालत्वातिरिक्तस्योपादानात् अंगुलीशाखाविभा
गस्यापि कालत्वेन हस्तशाखासंयोगजनकतया न तदोषतादवस्थ्यं स्वासमवायिकारणकविभागप्रयोज्यसंयोगजनक
जातीयत्वमात्रेण तु स्वासमवायिकार[illegible]णकविभागप्रयोज्योत्तरसंयोगप्रतिकालविधया जनके कारणाका
रविभागेति व्याप्तिः। एवं पत्रांगुलीशाखासंयोगो हस्तोत्पत्तिः शाखायां च कर्मेत्येकः कालः ततः शाखाकर्मणा शाखांगुली

=कपालद्वयविभागः ततः कपालाकाशविभागः ततः कपालोत्तरदेशसंयोगः तत्र कपालद्वयविभागो ८२

गु.टी. विभागो हस्तशाखासंयोगश्च ततोंगुलीशाखासंयोगनाशोंगुलीशाखाविभागशाखाकर्मभ्यामेको हस्तशाखाविभागो
२० विभागद्वयं चैत्येकः कालः ततो हस्तशाखासंयोगनाशः ततः शाखाया उत्तरसंयोगस्तत्र कालविधया शाखा तद्देशसं
योगजनके शाखांगुलीविभागे चातिव्याप्तिः। अतो समवायिकारणत्वानुधावनं असमवायिकारणत्वं चात्रापि समवा
यसंबंधावच्छिन्नकारणत्वमात्रं लाघवात्। द्वितीयलक्षणे तु कार्याकार्यविभागमादाय कारणाकारणविभागे कारणा
कारणविभागमादाय कारणमात्रविभागे चातिव्याप्तिवारणाय प्रयोजकांते विभागविशेषणं कारणाकारणविभागस्या
पि कारणे तद्देशसंयोगप्रयोजकत्वात् कारणमात्रविभागेति व्याप्तिताद्वस्थ्यमेवमुपदर्शितशाखांगुलीविभागे शाखो
तरदेशसंयोगसंयोगप्रयोजकहस्तशाखाविभागजनके [illegible] चातिव्याप्तिरतः स्वासमवायिकारणकेति संयोगविशे
षणं। इत्थं च कारणे तद्देशसंयोगेन कारणमात्रविभागासमवायिकारणकः शाखोतद्देशसंयोगोपि न शाखांगुली
विभागासमवायिकारणक इति नातिव्याप्तिः। कारणे तद्देशसंयोगस्यापि कालविधया कारणमात्रविभागजन्यत्वादेवं शा

४=कारणाकारणविभागो बोध्यः=

राम
२०

खोत्तरदेशसंयोगस्यापि कालविधया शाखांगुलीविभागजन्यत्वात्तद्दोषतादवस्थ्यं ॥ अतो समवायीकारणत्वानुधावनं
तच्च पूर्ववद्बोध्यं। स्वासमवायिकारणकसंयोगकत्वे सति विभागासमवायिकारणत्वोक्तौ कारणाकारणसंयोगस्या
पि कार्याकार्यसंयोगं कारणाकारणविभागं च प्रत्यसमवायिकारणत्वादिति व्याप्तिरतः प्रयोजकत्वप्रवेशः। प्रयोजकत्वं
च न जनकत्वं ॥ असंभवात् न वा जनकजनकत्वं गौरवात् नापि पूर्ववर्त्तित्वमात्रं पूर्ववदुपदर्शितशाखांगुलीसंयोगेतिव्या
प्तेः किंतु कारणाकारणादिव्यावृत्तान्यथासिद्धिचतुष्टयानिरूपकोयः कालत्वातिरिक्तनियतपूर्ववर्त्तितावच्छेदको धर्म
स्तद्वत्वं स्वासमवायिकारणकसंयोगप्रयोजकविभागकजातीयत्वमात्रोक्तौ कार्याकार्यसंयोगस्यापि परंपरया कारण
पूर्वदेशविभागप्रयोज्यत्वात् कारणाकारणसंयोगेतिव्याप्तिः। यदि च प्रयोजकत्वं जनकजनकत्वं तदापि पूर्ववदंगुल्यंत
रशाखासंयोगेतिव्याप्तिरतो विभागासमवायिकारणत्वप्रवेशः। विभागजनकत्वमात्रोक्तावपि पूर्ववत् कालविधया
खंडपटकाशसंयोगप्रयोजके तंतुद्वयविभागजनके आद्यमिकतंत्वाकाशसंयोगे कालविधया शाखापूर्वदेशविभागजनके

गु.टी (क्रिया)व्यमिकतत्वाकाशसंयोगकालविधया शाखापूर्वदेशविभागजनकश्चाङ्गुलीशाखासंयोगश्चातिव्याप्तिरतो सम
२१ वायित्वानुधावनं च समवायिकारणत्वं च पूर्ववद्बोध्यं। यदि च प्रयोजकत्वं जनकजनकत्वं चित्रमनसंयोगोऽङ्गुलीद्रव्य
१) देहेन च यावलोनैकः शाखासंयोगः किंतु संयोगद्वयं संयोगमात्रजसंयोगं च पूर्वसंयोगेन प्रतिबंधक इति मतं तदा चात्राऽवि
ताद्दशविभागजनकजातीयत्वमेवच तव्यं न तु विभागादिश्यसमवायिकारणत्वप्रवेशः। ननु स्वासमवायिकारणकप्र
योज्यासमवायिकारणजातीयत्वं स्वासमवायिकारणकप्रयोजकासमवायिकारणजातीयत्वं वा लक्षणमस्तु किमु
भयलक्षणे एवं संयोगविभागपदाभ्यां न चैवं खंडपटजनके अवस्थिततंतुसंयोगेतिव्याप्तिः। तस्य स्वासमवायिकारण
को महापटः स्वनाशद्वारा तत्प्रयोज्यः खंडपटस्तदसमवायिकारणत्वादिति वाच्यं। तथापि तु मयोपादाने वैयर्थ्यादन्यतरो
पादानेनैव तद्दोषवारणसंभवादिति चेन्न। अवयहितं तुतुरीसंयोगात् तंतुक्रिया ततस्तंतुक्रियया पूर्वदेशविभागादिक्रमेण तंतुद्वय
संयोगः ततः पटोत्पत्तिः ततः तंतुतुरीसंयोगात्पटतुरीसंयोगस्तत्र तंतुतुरीसंयोगेतिव्याप्तिः तस्य स्वासमवायिकारणकतंतु

जन्म

क्रियाप्रयोज्यपटतुरीसंयोगासमवायिकारणत्वात्तन्निरुक्तप्रयोज्यत्वस्य जन्यैव जन्यजन्यजन्येपि सत्त्वात् अतस्तद्वार
णाय विभागपदं। अत्र वंशदलावयवाकाशविभागाद्वंशदलाकाशविभागस्ताभ्यां वंशशब्दारंभस्तत्र वंशदलावय
वविभागस्यासमवायिकारणत्वं वंशदलाकाशविभागप्रयोज्यशब्दासमवायिकारणेति व्याप्तिवारणाय च संयोगप
दं। निरुक्तप्रयोज्यत्वस्य जन्यवत् साक्षात् जन्येपि सत्त्वात्। यदि च प्रयोज्यत्वं जन्यजन्यत्वं तदापि यत्र शाखायामंगु
ल्योः संयोगाभ्यां एक एव शाखापाणिसंयोगो जनितः तत एकांगुलीक्रियाविभागादिक्रमेणैकांगुलीसंयोगनाशोंऽगु
लीशाखाविभागजः शाखापाणिविभागश्चेत्येकः कालः ततः शाखापाणिसंयोगनाशः स्वजन्यविभागस्यैव सं
योगनाशकत्वयातुल्यावच्छेदकावच्छिन्नविभागाभावेपि तादृशसंयोगनाशे बाधकाभावात् ततोऽवस्थितांगुली
शाखासंयोगे न पुनः शाखापाणिसंयोगस्तत्रावस्थितांगुलीशाखासंयोगेति व्याप्तिवारणाय विभागपदं तस्य
स्वासमवायिकारणकः प्राचीनपाणिशाखासंयोगः स्वनाशद्वारा तत्प्रयोज्यः उदीच्यपाणिशाखासंयोगस्तदसमवायिका

मु. टी.
२२

रणत्वात् । यद्वाग्निपरमाणुसंयोगे घटत्वस्पर्शोत्पत्तिद्वारा स्वासमवायिकारणपरमाणुस्पर्शप्रयोज्यस्पर्शाभि (स्वाभिघातं प्रतिस्पर्शवद्द्रव्य...जनकत्वात्)
घातात्मकघटकाग्निसंयोगस्यासमवायिकारणत्वेति व्याप्तिवारणाय विभागपदं संयोगपदं तु यत्र वंशदलावयवाव
यवस्य युगपद्दलत्वं दलान्तराकाशविभागाभ्यां युगपद्दलावयवस्य दलान्तराकाशविभागौ ततो दलस्य दलान्तराका
शविभागौ ततो दलावयवावयवाकाशविभागदलावयवाकाशविभागदलाकाशविभागैः त्रिभिः शब्दारम्भः तत्र
दलावयवावयवाकाशविभागेति व्याप्तिवारणाय तस्य स्वासमवायिकारणकोदलावयवाकाशविभागः ननु न्यो
दलाकाशविभागस्तु तन्यः शब्दस्तदसमवायिकारणत्वात् न च विनश्यतोऽसमवायिकारणत्वाभावात् पंचतुर्थक्ष
णे दलावयवावयवविभागेन शब्दारम्भ इति वाच्यं । असमवायिकारणस्य कार्यसहभावेन हेतुत्वे मानाभावात् । समर्तां
तरसंयोगवशाद्विभागस्य चिरोत्पस्यानसमवाय्यत्वात् एवं द्वितीयलक्षणेऽप्येवेति व्याप्तिवारणाय संयोगविभागपदमि
ति समासः । पूर्वसंयोगनाशस्य उत्तरसंयोगजनकत्वानभ्युपगन्तॄनये प्रयोज्यत्वप्रयोजकत्वयोर्दुर्वचत्वात् लक्षणान्तर

माह। स्वजन्येति। यत्रांगुलीतंतुसंयोगो तत्पत्यनंतरं पटोत्पत्तिः ततोंगुलीतंतुसंयोगात् तत्पटांगुलीसंयोगस्तत्रांगुलीतं-
तुसंयोगेति व्याप्तिवारणाय नाशकांतसंयोगविशेषणं। यत्र पूर्वदेशसंयुक्तांगुल्यां क्रियाहस्तोत्पत्तिक्षणे सेकः कालः ततों-
गुलीपूर्वदेशविभागो हस्तपूर्वदेशसंयोगश्च ततोंगुलीपूर्वदेशसंयोगनाशोंगुलीपूर्वदेशविभागाद्धस्तपूर्वदेशविभा-
गश्च ततोंगुल्युत्तरदेशसंयोगो हस्तपूर्वदेशसंयोगनाशश्च ततोंगुल्युत्तरदेशसंयोगाद्धस्तोत्तरदेशसंयोगस्ततो हस्तपूर्व-
देशविभागनाशः तत्रांगुल्युत्तरदेशसंयोगेति व्याप्तिवारणाय स्वजन्येति विभागविशेषणं स्वजन्यत्वं च स्वासमवायि-
कारणकत्वं अन्यथा यत्रांगुलीसंयुक्तशाखाकर्मणांगुलीसंयुक्तशाखापूर्वदेशविभागो न त्वंगुलीशाखाविभागः अं-
गुल्या अपि सचलत्वात् ततोंगुलीसंयुक्तशाखापूर्वदेशसंयोगनाशोंगुल्यां हस्तोत्पत्तिक्षणे त्वेकः कालः ततः शाखायाः गग-
नाद्युत्तरदेशसंयोगवदंगुलीशाखासंयोगशाखाकर्मण्यां हस्तशाखयोश्चित्रसंयोगश्च तत्रांगुलीशाखासंयोगेऽतिव्या-
प्तिः तस्य कालत्वेन शाखापूर्वदेशविभागजनकत्वात्। एवं यत्रांगुलीद्वयसंयोगाभ्यामेव एव शाखापाश्चात्यसंयोगस्तत्र ए

गु.टी. कांगुलीक्रियाविभागादिक्रमेणैकांगुलीसंयोगनाशोंगुलीशाखाविभागजशाखापाणिविभागक्षणस्यैकः कालः ततः
२३ शाखापाणिसंयोगनाशस्ततोवस्थितांगुलीशाखासंयोगे न पुनः शाखापाणिसंयोगः ततः परंचोत्पन्नशाखापाणिविभागना
९३ शः तत्रावस्थितांगुलीशाखासंयोगेतिव्याप्तिः तस्य कालत्वेन शाखापाणिविभागजनकत्वात् तादृशावांगुलीद्वयावच्छे
दनसंयोगद्वयंचित्रक्षणसंयोगोनाभ्युपेयते तदा तु स्वजन्यत्वं यथाश्रुतमेवाविभागनाशकत्वं च कालत्वातिरिक्तरूपेणवि
भागनाशजनकत्वं तेन कारणाकारणविभागकालोत्पन्ने कारणाकारणसंयोगनाशकालोत्पन्ने वा कार्याकार्यसंयोगमादा
य कारणाकारणसंयोगे नातिव्याप्तिः स्वजन्यविभागनाशकसंयोगकत्वमात्रोक्तौ कार्याकार्यविभागमादाय कारणाकारण
विभागे कारणाकारणविभागमादाय कारणमात्रविभागे चातिव्याप्तिरतः संयोगासमवायिकारणत्वप्रवेशः कारणाका
रणविभागस्यापि कालोपाधिविधया कार्योत्तरदेशसंयोगजनकत्वात् कारणमात्रविभागस्यापि कालोपाधिविधयाका
रणोत्तरदेशसंयोगजनकत्वात् तद्दोषतादवस्थ्यमतोऽसमवायिकारणत्वप्रवेशः स्वजन्येत्यत्र जन्यतासामान्यनिवेशे

राम
२३

तुद्रव्यवारणायापि ततप्रवेशः अजनितसंयोगे कर्मण्यव्याप्तिवारणाय तद्वृत्तिसत्तान्यधर्मसमवायित्वमिति वृत्तिः । सम
वायः तेन धर्मिमात्रस्यैव कालिकविशेषणतया कर्मवृत्तित्वेपि नातिप्रसंगः । एतामादाय द्रव्यगुणयोरतिव्याप्तिवारणा
य सत्तान्येति समवायेन तादृशधर्मवत्त्वस्य लक्षणत्वलाभाय समवायित्वमिति । अन्यथा कालिकसंबंधेन तादृशधर्म
वत्त्वमादाय कालमात्रे इति व्याप्त्यापत्तेः । नव विभागेति अर्थे स्वजन्यनाशकसंयोगासमवायिकारणत्वस्यैव सम्यक्त्वा
दिति वाच्यं । कारणाकारणसंयोगेति व्याप्त्यापत्तेः । तस्य स्वजन्यः कार्याकार्यसंयोगः तस्य नाशकः प्रतियोगविधया सए
व तस्यैवासमवायिकारणत्वात् एवं संयोगपदानुपादानेपि कारणाकारणविभागेतिव्याप्तिः तस्य स्वजन्यः कार्याकार्यवि
भागः तस्य नाशकः प्रतियोगिविधया सएव तस्यैवासमवायिकारणत्वात् । न व्यास्तु स्वत्वस्यानुगतस्याभावात्स्वस्य
द्संयोगाजन्यसंयोगजनकयत्किंचित्कर्मव्यक्तिपरं तथा चैतद्व्यक्तिजन्यविभागनाशकसंयोगासमवायिकारण
वृत्तिसत्तान्यधर्मसमवायित्वमर्थः न चैतद्व्यक्तिवृत्तिसत्तान्यधर्मसमवायित्वमित्येवास्तु इति वाच्यं । यथासन्निवेशे वैयर्थ्या

गु.दी भावात्। इत्थं च स्वोत्तरोत्पन्नत्वेनैव नाशकत्वादेतत्क्रियाव्यक्तित्वव्यापकनाशकघटत्वसंयोगासमवायिकारणस्य कपाला
२४ त्वसंयोगस्य वारणाय विभागपदं संयोगपदं तु पूर्ववदिति प्राहुः। ननु स्वनाशकसंयोगासमवायिकारणवृत्तिसत्ताव्याप्यधर्म
२५ समवायित्वमित्येवास्तु किं जन्यत्वविभागोभयप्रवेशेन शब्दजशब्दमादाय शब्दे विभागमादायपर्वसंयोगेनातिव्याप्ति
वारणाय संयोगपदं न च स्पर्शस्य समवायसंबंधेनाभिघातजनकत्वमिति सिद्धांतादग्नौ स्वनाशकपरमाण्वाद्यभिघा
तजनके परमाण्वादिस्पर्शेऽतिव्याप्तिः असमवायिकारणत्वस्य समवायसंबंधावच्छिन्नकारणत्वस्वरूपस्य तत्र सत्त्वा
दिति वाच्यं। पारिभाषिकस्यैवासमवायिकारणत्वस्यात्र निवेशात्। अन्यथाभिघातं प्रतीव शब्दजनकविभागं प्रत्य
पि स्पर्शस्य समवाये न हेतुत्वमिति सिद्धांतात् शब्दजनकविभागाधीनाभिघातजनकेऽभिघातकनिष्ठस्पर्शे विवक्षि
त लक्षणेऽप्यतिव्याप्त्यापत्तेरिति चेन्न। तस्यापि लक्षणांतरत्वात्। दीधितिकृतां तु संयोगविभागपदघटितस्तत्रस्वरसासि
द्धतया तदुपेक्षणादिति समासः। सर्वत्र तज्जातीयत्वविवक्षायाः फलमाह। चलतीत्यादिना तज्जातीयत्वमित्यंतेन कलस्य राम
२४

वयविनि अवयविनि क्रियोत्पत्तिदशायां। अवयवानां निश्चलत्वाभावादिति साक्षात्परंपरासाधारणानां सर्वेषां अवयव
वानां निश्चलत्वाभावादित्यर्थः। कर्मणो व्याप्यवृत्तितया शरीरमात्रे चलनदशायां वृक्षे चलनाभावस्य सर्वसिद्धत्वादि
तिभावः। यावदवयवेति परमोऽर्थेतः साक्षात्परंपरया यावदवयवावच्छिन्नेव कर्मोत्पत्तिर्नियतावश्यकीत्यर्थः। कचित्तु अव
यविनि कर्मोत्पादे यावदवयववकर्मोत्पादनियत इति पाठः। तत्र च साक्षात्परंपरया यावंतोऽवयवास्तत्कर्मोत्पत्तिव्या
प्य इत्यर्थः। व्याप्तिश्च कालिकी साक्षात्परंपरयेत्युपादानात् घटादेर्विनष्टत्वादित्यग्रिमदूषणस्य नासंगतिः। ननु
यावदवयवे अभिघाताद्यभावदशायां अवयविनि कर्मोत्पादस्थले यावदवयवेषु कर्मोत्पादासंभव इति वाच्यं। कर्म
णो व्याप्यवृत्तित्वात् यत्किंचिदवयवावच्छेदेनाभिघातादिदशायां अवयविनि कर्मोत्पत्तिवारणाय साक्षात्परंपरासाधा
रणस्वाश्रयसमवेतत्वसंबंधेनावच्छेदकतासंबंधावच्छिन्नाभिघाताद्यभावस्य कर्मप्रतिबंधकत्वावश्यकतया तदानी
मवयविनि कर्मोत्पादस्यैवासिद्धेः। यावदवयवावच्छेदेनाभिघातादिसत्वे च यावदवयवेष्वपि समवायसंबंधेनाभिघातादे

रावश्यकत्वात् तत्सामग्रीसत्त्वेन यावदवयवे कर्मोत्पत्तेरविरोधात्। न च कर्मणो व्याप्यवृत्तित्वेपि यत्किंचिदवयवाव
च्छेदेनाभिघातादिदशायामवयविनि कर्मोत्पत्ताविष्टापत्तौ क्षतिविरहेण तत्प्रतिवध्यप्रतिबंधकभावे मानाभाव इति
वाच्यं। तथा सति अग्रमात्रचलनदशायां मूलावच्छेदेनेंद्रियसंनिकर्षे वृक्षे चलनाभावप्रत्यक्षानुपपत्तेरिति वृद्धाभिप्रायः। वृक्ष
पदेन वृक्षस्य पाणौ न कर्म वैशेषिकमतापेक्षया स्यास्तं तासमीचीनत्वं सूचितं तद्बीजं तु यावदवयवेष्वभिघातादिसत्त्वेपि त
त्र कर्मोत्पत्तिर्नावश्यकीयत्र यत्किंचिदवयवे यावदवयवावच्छिन्नावयविनिष्ठाभिघातादिद्याकृकालोत्पन्नकर्मांतरं प्रति
बंधकमस्ति तत्रैवाभिघातादिसत्त्वेपि अवयविनि कर्मोत्पत्तिदशायां यावदवयवावकर्मोत्पत्तेरसंभवात् न च सामस्त्या
त्परं परयासमवायसंबंधेन कर्मणो कर्मप्रतिबंधकतया तत्रावयवकर्मनाशानंतरमवयविनि कर्मोत्पाद इति वाच्यं।
क्षणचतुष्टयापलापापत्तेः। गौरवेण तादृशप्रतिवध्यप्रतिबंधकभावासिद्धेश्चेति ध्येयं। नियतमिति। अवयविकर्मो
त्पत्तिव्यापकमित्यर्थः। अन्ये नव्यवैशेषिकाः पूर्वमते यावदवयवकर्मोत्पादो व्यापकः अत्र तु यावदवयवकर्मसत्वमा

त्वं व्यापकं तच्च कालांतरे ऽत्यंताभावे ऽपि संभवतीति भेदः। अन्येषां मते साधकमाह। वक्ष्यतीति चेति। चो हेतौ। अंशाविति तच्चापा
वद्दवयववृत्तिर्मास्ति तेषां पक्षतायां न संभवतीति भावः। नैयायिकमतमाह। द्रव्यमपीति। यावदवयववृत्तिर्मास्तितेषां वद्दव
यववृत्तिरपीति द्रव्यमपीत्यर्थः। औत्सर्गिकं भयः सुगृहीतसहचारमात्रकं न तु व्यापकमित्यर्थः। औत्सर्गिकत्वे हेतुमाह। द्व्य
णुकादेर्विनष्टत्वादिति तत्र कर्मानुत्पादेपीत्यनेनान्वयि। न च द्व्यणुकादेर्नाशे घटादेरपि नाशात्कथं तत्र कर्मास्यादिति
वाच्यं। स्वसमवायिनाशस्यैव द्रव्यनाशकतया द्व्यणुकनाशक्षणमारभ्य ग्रहादिपर्यंतमपि घटादेः सत्त्वसंभवात्। न
च तथापि द्व्यणुकादेर्विनष्टत्वे घटादौ कर्मोत्पत्तिसामग्र्या असिद्धा कर्मणो व्याप्यवृत्तित्वनये सा स्यात्तरं परासाधारणस्यान्य
यत्समवेतत्वसंबंधेनाभिघातात्यंताभावस्य कर्मप्रतिबंधकतया प्रतिबंधकसत्त्वादिति वाच्यं। द्व्यणुकादेर्विनष्टत्वे तद्घटि
तसंबंधेनाभिघातात्यभावस्यापि ऽत्र सत्त्वादिति भावः। ननु स्वसमानकालीनत्वेन यावदवयवानियमे विशेषणीयाः
स्वपदमवयविपरमित्यत आह। कपालादाविति। विद्यमानेनेति। घटादिकर्मोत्पत्त्यव्यवहितपूर्वक्षणे विद्यमानेनेत्यर्थः।

गु.टी
२६
२८

कर्मणा विनश्यदवस्थकर्मणा। तेन न नियमद्वयस्यैव व्यभिचारो लभ्यते। तत्र। घटादौ कपालादौ चा[illegible]सामग्री व
लाद्यति। विद्यमानया वदवयवावष्टंभाभिघातादिमत्तादिसर्पः। एतेन नव्यवैशेषिकनये तत्र घटादौ विलंबाप्युप
गमोपि निराकृतः। एककारणविलंबस्यादोषत्वेपि सामग्रीसत्त्वेन कारणविलंबासंभवात्। नहि व्याप्तिव्यभिचारभियासा
मग्री कार्यं नार्जयति। न च कपाले कर्मोत्पत्तिसमये घटेपि कर्मोत्पत्तौ बाधकाभावेन कपालकर्मनाशसमये घटे कर्मो
त्पत्त्यसंभवः। कंपोत्तरं च तत्कालादिति वाच्यं। यावदवयववावष्टंभाभिघातादिविरहेण यत्र कपालक्रियोत्पत्तिस्तृतीयक्ष
णे घटोत्पत्तिस्तत्र घटविरहेण च कपाले कर्मोत्पत्तिसमये घटे कर्मोत्पत्त्यसंभवात्। पंचमक्षणे घटे कर्मोत्पत्तौ बाधका
भावादिति भावः। अजनितसंयोगस्यापीति। अवयविकर्मण इति शेषः। एतदेवोपपादयति। अवयविक्रियाया इति। अ
वयविनाशादित्यग्रेतनेनान्वयः। तत्समानकालोत्पन्नेति। वैशेषिकवृद्धमते तत्पर्वोत्पन्नस्यासंभवादिदमुक्तं। अवयव
क्रियादीति। आदिपदादवयवद्वयविभागावयवद्वयसंयोगनाशयोः परिग्रहः। उत्तरसंयोगेति। अवयव्युत्तरदेशसंयोगोस

राम
२६

तियोग्यकालएवेत्यर्थः। सत्त्वावयविक्रियोत्पत्त्यपेक्षया चतुर्थक्षण एवेति भावः। आश्रयविनाशादिति। आश्रयस्या
वयविनो विनाशादित्यर्थः। अवयविनो विनाशसमये चावयविक्रियया अवयविनिनो तद्देशसंयोगसंभवः। समवा
यिकारणस्य कार्यसहभावेन हेतुत्वादिति भावः। अंतिमपतद्द्ये प्रकारांतरेणापि कर्मणः संयोगाजनकत्वं उपपादय
ति। अंतिमेति। अवयविनाशकसामग्रीकाल इति। अवयवद्वयसंयोगनाशोत्पत्तिकाल इत्यर्थः। अजनितसंयोग
विभागस्येति विनाश इत्यग्रेतनेनान्वयः। यद्यपि अजनितविभागकत्वेनैव संयोगाजनकत्वप्राप्तेः पृथक्संयोगोपा
दानं व्यर्थं तथापि स्पष्टत्वार्थं तदुपादानं। केचित्तु विभागाजनकस्यापि कर्मणः संयोगजनकत्वेन ततो न संयोगाजनक
त्वलाभ इत्यतः पृथक् तदुपादानं न च तादृशस्थलाभाव इति वाच्यं यत्र कपालक्रियया कपालकाशविभागः कपाले वेगो
घटश्च युगपदुत्पद्येते तदनंतरं तेन वेगेन घटे वेगः कपालाकाशसंयोगनाशश्चेत्येकः कालः इदानीं च कपालाकाशसं
योगात्र घटाकाशसंयोगोत्पादे विनश्यतो समवायिकारणत्वाभावात् प्रपवेगाद्घटे कर्म तेन च कर्मणा घटाकाशसंयोग

स्तत्र च। अजनितविभागस्य संयोगजनकत्वसंभवात् न च घटे वेगोत्पत्तिसमये कर्मोत्पत्तिसमये वा वाघादिक्रियया वा घा
दिनापि संयोगसंभवात्तेन समं विभागमजनयित्वा कथं तस्योत्तरदेशसंयोगजनकत्वमिति वाच्यं। तदानीमुत्तरसंयोग
प्रतिबंधकवाघादिसंयोगकल्पनायां मानाभावात् संयोगविभागादिकल्पने गौरवाच्च। न च क्रियामात्रस्यादृष्टवशात्म
संयोगासमवायिकारणत्वनियमात्तेनापि कर्मणा विभागमजनयित्वा व्यवहितस्थानेन संयोगजननं संभवदिति वाच्यं।
तादृशनियमे मानाभावादित्याहुः। तन्न सत्। कारणाकारणसंयोगात्मकासमवायिकारणस्य कार्येण सहवर्तितया हेतुत्वेमा
नाभावेन कपालाकाशसंयोगनाशसमये घटाकाशसंयोगोत्पत्तौ बाधकाभावात्। विनश्यदवस्थस्यासमवायिकार
णत्वानभ्युपगन्तृमतेप्याह। तत्पूर्वकालेति। अवयवविनाशकसामग्रीपूर्वकाल इत्यर्थः। स चावयवद्वयविभागोत्पत्ति
काल एवेति भावः। नन्ववयवविविनाशकसामग्रीकाले जातस्येत्युत्तमसंगते विनश्यदवस्थस्यैवपविनिकार्योत्पतेर
संभवादित्यत आह। विनश्यदवस्थस्यापीति। विनाशसामग्रीकालेपीत्यर्थः। न च समवायिनः कार्योत्तरवर्तितया हेतुत्व

मेव वाच्यं कर्मेति वाच्यं। तथाहि तुल्ये मानाभावात्। गौरवाच्च मम अग्रे नं तत् कर्मेत त्यागभावादि कल्पनापाश्रय फलमुखत्वा
द्दिति भावः। ननु विनश्यदवस्थे समवायिनि कार्योत्पत्तिः सिद्धांतविरुद्धेत्यत आह। आश्रयनाशजन्यमिति। स्वाश्रयना
शमात्राव्यवहितोत्तरोत्पत्तिकमित्यर्थः। तथाभिधानाद्वेति। विनाशसामग्री कालेपि समवायिनि द्वित्वादिलक्षण
कार्योत्पत्तेरभिधानाद्वेत्यर्थः। आश्रयविनाशसामग्री काले द्वित्वादेरुत्पत्तिं विना द्वित्वादिनाशस्य आश्रयना
शमात्राव्यवहितोत्तरोत्पत्तिकत्वासंभवात्। तत्पूर्वकालोत्पन्नद्वित्वादेर्नाशस्यापेक्षाबुद्धिनाशदव्यवहितोत्तरोत्प
त्तिकत्वादिति भावः। अतएवेति। तादृशकर्मण एव व्याप्तिवारणायेति शेषः। ननु तथापि वैशेषिकवृद्धमते विभागाजनक
कर्मणोऽसंभवः। तन्नये आश्रयविविनाशसामग्रीकाले आश्रयविनिकर्मोत्पत्तेरसंभवादिति चेन्न। यत्र कपालिकावयवा
वयवे क्रिया अथ तस्य कपालिकावयवावयवांतरेण विभागः। ततः क्रमेण कपालिकावयवकपालद्वयसंयोगनाशोत्प
त्तिकाले घटे तदीयावयवेषु च कर्मोत्पत्तिः ततो घटनाशः ततः कर्मनाशः [illegible] तत्रैव तन्मतेपि विभागाजनककर्मणः

गु.टी. २८ ५८

संभवादितिभावः। संयोगेति। अत्र संयोगजसंयोगमादाय संयोगेति व्याप्तिवारणाय जन्यांतं संयोगविशेषणं तच्च व
मिजन्यतावच्छेदकवैजात्यपरिचायकं। तथा च विजातीयसंयोगासमवायिकारणत्वमर्थः। द्रव्येति व्याप्तिवारणाय सम
वायीति। असमवायिकारणत्वं च समवायसंबंधावच्छिन्नस्पर्शवेगावृत्तिकारणत्वं। अत्र च संतोपादाना स्पर्शवेगयोरभिघा
तादव्यसंयोगजनकत्वेपि नातिव्याप्तिः। विभागेति। विभागजविभागमादाय विभागेति व्याप्तिवारणाय जन्यांतं एतदपि जा
तिविशेषपरिचायकं। द्रव्यवारणाय समवायीति। असमवायिकारणत्वं च समवायसंबंधावच्छिन्नसंयोगावृत्तिकारणत्वं
द्रव्यं च तादात्म्येन संबंधेन कारणं अवृत्यंतपदोपादानात्संयोगे नातिव्याप्तिः। अत्रैकलक्षणे परतया आख्यानासामर्थ्यमेवा
स्वरसः। शिष्यबुद्धिवैशद्याय प्रसंगात् कर्मविभागजनकत्वप्रक्रियां बुत्पादयति। एवमिति। [illegible]पंचममात्रावस्थायित्वावच्छेदक
धर्मवत्त्वं कर्मत्वमितिपर्यवसितं तद्दूषयति एवमितिइत्यपि कश्चित्। आश्रयनाशसामग्रीकालोत्पन्नस्य द्वितीयक्षणावस्थायि
त्वं तत्र सर्वक्षणोत्पन्नस्य चतुर्थक्षणावस्थायित्वमितिभावः। न च वैशेषिकवृद्धनये कपालिकावयवावयवक्रियादिक्रमेणोपदर्शि

राम
२८

तस्य तेन कर्मणोद्दिष्टक्षणावस्थायित्वसंभवेपि क्षणत्रयावस्थायित्वासंभव इति वाच्यं। तत्रैव कपालिकावयवावयवारंभका
वयवक्रियादिक्रमेण क्षणत्रयावस्थायित्वसंभवादिति हृदयं। सुप्रसिद्धमिति क्रिया ततो विभागः ततः पूर्वदेशसंयोग
नाशः ततउत्तरसंयोगः ततस्त्र कर्मनाश इति क्रमेण सुप्रसिद्धमित्यर्थः। आरंभकेति कपालक्रिया ततः कपालद्वयविभा
गः ततः कारणमात्रविभागजः कपालाकाशविभागः कपालद्वयसंयोगनाशश्चेत्येकः कालः ततः कपालाकाशविभा
गात् कपालाकाशसंयोगनाशः ततः कपालस्योत्तरदेशसंयोगः ततः कर्मनाश इति क्रमेणारंभकसंयोगनाशकविभाग
जनकस्य कर्मणः पंचक्षणावस्थायित्वं चेत्यर्थः। एतच्च कारणमात्रविभागजविभागं प्रत्यारंभकसंयोगनाशद्रव्यनाश
योरहेतुत्वमते। यत्र च विपत्र कपाले कपालिकायां च क्रियेत्येकः कालः ततः कपालद्वयविभाग कपालिकाद्वयविभा
गौ ततः कपालिकाकपालाकाशविभाग कपालिकाद्वयसंयोगनाश कपालद्वयसंयोगनाशाः। ततः कपालनाशात्
कपालक्रियानाशस्तत्रारंभकसंयोगप्रतिद्वंद्विविभागजनकस्यापि कर्मणो न पंचक्षणावस्थायित्वं। तथाप्यारंभकसंयो

मु.टी गनाशकविभागजनकं सघतसंयोगजनकं तस्यपंचमक्षणे वस्थायित्वं बोध्यं। क्वचिदन्यथापीति क्वचिदारंभकसंयो
२९ गप्रतिद्वंद्विविभागजनकत्वं विनापीत्यर्थः। पंचमक्षणे वस्थायित्वमपि स्यनुपपद्यते। कर्मादिक्रमेणेति शरीरकर्मादिक्रमेणे
29 त्यर्थः। शाखायां चेति। तद्देशात्मकशाखायां चेत्यर्थः। शाखाकर्मणेति द्वितीयक्षणे इति शेषः। तयोरिति शरीरशाखव
योरित्यर्थः। तदानीं शरीरशाखयोः संयोगोत्पत्तिक्षणे संयोगविरहादिति अव्यवहितपर्वं शाखायां संयोगविरहादित्यर्थः
। तदुभयसमवेतविभागं प्रति समानावच्छेदकत्वप्रत्यासत्त्या तदुभयसमवेतसंयोगत्वेन हेतुत्वादिति भावः। अवच्छे
दकतासंबंधेन विभागं प्रति स्वनाशकविभागावच्छेदकतादात्म्यसंबंधेन संयोगस्य हेतुत्वमिति तु नव्याः। अतिप्र
संगादिति कर्मण एकस्माद्विभागजननकाले तत्कालीनसर्वद्रव्यादेरपि विभागजननप्रसंगादित्यर्थः। नचेष्टा
पत्तिर्विभागाननुभवात् इति भावः। अतएव संयोगत्वेन विभागत्वेन हेतुहेतुमद्भावः समानावच्छेदकत्वं प्रत्यासत्तिरिति
परास्तं। जलालोकादिद्रव्यांतरसंयोगवतोः परस्परासंयुक्तयोरपि परस्परं विभागप्रसंगादिष्टापत्तौ चानुभवविरोधादि

राम
२९

आर्थोऽपि तु५

त्ति ध्येयं। अथेति। अनंतरमित्यर्थः। तृतीयक्षण इति शेषः। तयोः शाखाकाशयोः। ननु शाखाकर्मणः स्वोत्तरभाविनं शा
खाशरीरसंयोगमपेक्ष्य शाखाशरीरविभागजनने संयोगविभागयोरनपेक्षकारणं कर्मेति लक्षणसंगतं तेन कर्मणः
स्वोत्तरभाविनं भावमनपेक्ष्यैव संयोगविभागोभयजनकत्वबोधनादित्यत आह। यथा चेति। कर्मणः शाखाकर्मणः शा
खाशरीरविभागजननमिति शेषः। न क्षतिः न लक्षणासंगतिः। तथोक्तमिति यथोक्तं न तत्तु स्वोत्तरभाव्यजन्यस्य जन्यवि
भागाधीनसंयोगजनकजातीयं कर्मत्वेन तदर्थः स च शाखाकाशविभागे कर्मान्तरं चापाद्य पूर्वं कृतेपि शाखाकर्मण्यस्ती
ति भावः। केचित्तु ननु शाखाकर्मणः स्वोत्तरभाविनं शरीरशाखासंयोगमपेक्ष्य शरीरशाखाविभागजनने तत्रैव
कर्मलक्षणाव्याप्तिरित्यत आह। यथा चेति। न क्षतिः न कर्मलक्षणाव्याप्तिरित्यर्थः। तथोक्तमिति। लक्षणस्य जाति
घटिततया कर्मान्तरमादायैव लक्षणसंभवादिति भाव इत्याहुः। तदसत्। शाखाकाशविभागमादायैव लक्षणसंभ
वेनाव्याप्तिविरहादिति ध्येयं। ततइति। चतुर्थक्षणे इति शेषः। तदानीमुत्तरसंयोगोत्पत्तौ तेनैव कर्मनाशः स्यादिति नक्षणव

५=जातिघटितलक्षणं=

१ > प्रतिबंधादिति सारस्य दीधितिकृतोक्तत्वादिति संनीतप्राचीनमतपाठः उत्तरग्रंथेऽप्रतिबंधकतायाः नेकत्वेन विरोधा

(प्रतिबंधादिति)

ग.दी. द्धिरित्यत आह निरा करोति । तदानीमिति । शरीरशाखयोः संयोगनाशोत्पत्तिक्षण इत्यर्थः । क्रियाजन्यसंयोगत्वावच्छिन्नं प्रतित

३० त्वक्रियावृत्तित्वविशिष्टपत्रसंयोगारंभकसंयोगान्यसंयोगत्वेन प्रतिबंधकत्वं वक्तव्यं । तेन संयुक्तोत्तरदेशेन क्रि

याजन्यसंयोगस्यानुपपत्तिः । एवं पत्रसंयोगसत्वे शाखोत्तरदेशसंयोगस्यावयवक्रियासमकालोत्पन्नावयविक्रि

याजन्यावयवोत्तरदेशसंयोगस्य चानुत्पत्तिरिति ध्येयं । केचित्तु लाघवाज्जातिविशेषसंयोगत्वस्यासंयोगत्वेनैव प्रतिबंध

कत्वमित्याहुस्तन्न शोभनं । आश्रयनाशादितच्छक्तित्वमादाय विनिगमनाविरहेण प्रतिबंधकताबाहुल्यात् । परे तु प्रतियो

गितासंबंधेन संयोगं प्रति स्वसमवायसंबंधेन संयोगत्वेन प्रतिबंधकत्वं । क्रियावत एव प्रतियोगितावत्वान्न कार्यानुप

पत्तिरित्याहुः । तन्न सम्यक् । निष्क्रियगगनादेरपि प्रतियोगित्ववत्त्वस्य स्वतः सिद्धत्वक्षणे दीधितिकृतोक्तत्वादिति

प्रथमे इति । पूर्वदेशसंयोगस्याप्रतिबंधकत्व इत्यर्थः । युगपदेवेति परमाणोः सत्येव पूर्वदेशसंयोगे तदुत्तरभाविकर्म

णोत्तरदेशसंयोगित्वप्रसंग इत्यर्थः । यद्यप्यवयविनं विहाय परमाणुपर्यंतानुधावनमफलं । न चावयविनोऽवच्छेदक

त् प्रागवत्वमवयुक्तं जनकस्पलेऽपि प्रतियोगितासः ॥१

राम
३०

भेदेन पूर्वापरदेशसंयोगित्वमस्त्येवेति तत्परित्याग इति वाच्यं । अवच्छेदकभेदेन तत्र पूर्वापरदेशसंयोगित्वसत्वेपि एकावच्छे-
देन तदुभयसंयोगाभावादनयोः संभवात् तथाप्येकावच्छेदकपर्यन्तानुधावनप्रयासमपि पाःवयविपरित्यागः नच परमा-
णोरपि दिग्भेदावच्छेदेनोभयदेशसंयोगित्वमस्त्येवेति वाच्यं । परमाणौ दिग्भेदावच्छेदेन युगपदुत्तरनूर्द्देशाद्वयसंयोगा-
भ्युपगमेपि पूर्वसंयोगसत्वे तदुत्तरभाविकर्मणा दिगन्तरावच्छेदेन देशान्तरसंयोगानभ्युपगमात् । न च परमाणौ युगपत्
पूर्वोत्तरद्वयसंयोगित्वे दृष्टापत्तिः परमाणोरतीन्द्रियत्वेन तत्संयोगस्याप्यतीन्द्रियतया अनुभवविरोधस्य वक्तुमशक्य-
त्वादिति वाच्यं तथा सति तत्त्वेन घटादिसंयोगे घ्राणादिसंयोगाद्युत्पत्त्या युगपत्ज्ञानद्वयोत्पत्त्यापत्तेः । अनुभव-
सिद्धतत्तत्ज्ञानसामग्र्याज्ञानान्तरप्रतिबंधकत्वे गौरवापत्तेरिति भावः । वस्तुतस्तु पूर्वसंयोगस्याप्रतिबंधकत्वे अं-
गुल्यादेर्विभागोत्पत्तिसमय एव धारावाह्युत्तरदेशसंयोगप्रसंगः न चेष्टापत्तिः क्षणद्वयानन्तरमेव तत्र क्षणत्वादिसंयो-
गानुभवात् क्षणद्वयापलापे चापेक्षाबुद्धेः क्षणद्वयावस्थायित्वनये बाधबुध्यादेरपि प्रतिबंधकत्वविलोपापत्तेरित्येव
अपेक्षाबुध्यात्मकबाधबुद्धिस्थले क्षणत्रयापलापापत्तिः स्यादत आह ॥ १

(नच द्रव्यनाशसमवेये विभागस्य नाशात्कथं तदपेक्षेति वाच्यं सर्वसंयोगनाशोपलक्षणत्वादिति साङ्कः ५)

गु. टी. तत्वं। यत्तु पूर्वसंयोगस्याप्रतिबंधकत्वे एकदैव कर्म्मणा संयोगविभागयोर्जननादग्रिमक्षणे तेन संयोगेन कर्म्म

३१ विभागयोर्नाशात् कर्मणः क्षणचतुष्टयं पंचमक्षणेऽप्रत्यक्षानुपपत्तिः विभागस्य च क्षणत्रिकत्वापत्तिरिति तन्न। स्वप्रति

योगिजन्यत्वसंबंधेन स्वजनकत्वसंबंधेन वा संयोगनाशस्य तन्नाशकत्वाभ्युपगमेनैव तत्कारणासंभवात् न चैत

3। त्पापि कर्मणः पंचमक्षणेऽपि विभागस्य चतुर्थक्षणेऽप्रत्यक्षानुपपत्तिरिति वाच्यं। क्षणिकाऽपलापस्यादोषत्वात् तदानीं

प्रत्यक्षानुत्पादस्येष्टत्वात्। न च पूर्वसंयोगनाशस्य विभागनाशकत्वोपगमे द्रव्यनाशमपेक्ष्य कारणमात्रविभा

गस्य विभागजनकत्वानुपपत्तिः। विनश्यदवस्थत्वेनासमवायिकारणत्वासंभवादिति वाच्यं। द्रव्यनाशस्य कार पूर्वसंयोगनाशस्यैव

णमात्रविभागजविभागजनकत्वे मानाभावात्। प्रकृते विनश्यदवस्थस्याप्यसमवायिकारणत्वे बाधकाभावाच्चे

ति दिक्। शेषमग्रे वक्ष्यामः। ननु पूर्वोत्पन्नशाखाकाशविभागादेव शाखाकाशसंयोगनाशोत्पत्तिसमये शाखा

शरीरसंयोगनाशो मास्तु इत्यत आह। पूर्वोत्पन्नस्त्विति विभागः शाखाकाशविभागः न तन्नाशकः न शाखाशरीरसंयो राम

३१

गनाशकः। तदनधिकरणत्वेति शाखाशरीरसंयोगानधिकरणे आकाशे तस्य वृत्तेरित्यर्थः। अन्यथा समानाधिकरणे
विभागमात्रस्यैव संयोगनाशकत्वे अन्यदीयेति। कर्मादिकमपि त्यादिपदात् अत्र वयवाकाशादिविभागपरिग्रहः। आ
काशादित्यादिपदात् अन्तत्वादिपरिग्रहः। न चैवमपि अनुभवविरोधात् यथाः संयोगस्य क्षणिकत्वप्रसंगाच्चेतिभा
वः। ननु तथापि विभागपूर्वसंयोगयोः केन रूपेण नाश्यनाशकभावः। न च स्वजन्यविभागत्वेनैव नाशकत्वमिति वाच्यं।
स्वत्वाननुगमात्। न च द्रव्यनाशानाश्यसंयोगत्वेन नाश्यता विभागत्वेन नाशकता यत्र विशेषणताविशेषसंबंधेन
तादृशसंयोगनाशोत्पादः तत्र समवायसंबंधेन विभाग इति समानाधिकरण्यप्रत्यासत्तिः। अतएवान्यदीयकर्मज
नितविभागवतोविना कर्मादिकं नाकाशविसंयोगनाशः तत्राकाशादेरपि तत्संयोगनाशोस[illegible]त्यधिकरणतया
तत्र विभागाभावादिति वाच्यं। अन्यदीयकर्मजनितविभागवतोरंगुलीवृक्षयोः परस्परं संयोगस्य विनापि कर्मादिकं
नाशप्रसंगात् तत्संयोगनाशोत्पत्त्यधिकरणयोरंगुलीवृक्षयोर्द्वयोरेव विभागवत्त्वात् पत्रे कस्यैव परस्य वृक्षादौ सं

लावच्छेदेनैकोऽग्रावच्छेदेन चान्यः संयोगस्तत्र मूलावच्छेदेन विभागेऽपि अग्रावच्छिन्नसंयोगनाशापत्तेश्च न च समानावच्छे
दकत्वं प्रत्यासत्तिः अतो नैतद्दोषः द्रव्यावकाशादिति वाच्यं। समानावच्छेदकावच्छिन्नजलतेजोवाय्वादिविभागसत्त्वेऽपि घटभू
तलाद्योः परस्परं संयोगस्याविनाशात् न च तदुभयावच्छिन्नसंयोगत्वेन तदुभयावच्छिन्नविभागत्वेन नाश्यनाशकभाव
इति वाच्यं। अग्रेंऽगुद्रव्यावच्छिन्नजलाकाशादिविभागात् तदंगुद्रव्यावच्छिन्नशाखावांतरसंयोगस्याविनाशप्रसंगात्। अग्रपत
दुभयातिरिक्तानवच्छेद्यत्वं तदुभयावच्छेद्यसंयोगनाशत्वेन तादृशविभागत्वेन तत्तदवयवातिरिक्तानवच्छेद्यतत्तदवयवावच्छेद्यसंयोग
नाशत्वेन तादृशविभागत्वेन तच्चतुष्टयातिरिक्तानवच्छेद्यतच्चतुष्टयावच्छेद्यसंयोगनाशत्वेन तादृशविभागत्वेनेत्यादिक्र
मेण कार्यकारणभावः द्रव्यनाशाजन्यत्वेनापि सर्वत्र नाशस्य विशेषणादाश्रयनाशजन्यसंयोगनाशेन व्यभिचारः इ
ति चेन्न। यत्र पंचांगुल्यवच्छेदेन वृक्षे वृक्षपाणिसंयोगः तत्रैकांगुल्यवच्छिन्नपाणिवृक्षमध्ये एकांगुलीकर्मजनितांगुलीवृक्ष
विभागेन वा तदंगुल्यवच्छिन्नपाणिवृक्षविभागो जनितस्तत्र तदंगुल्यवच्छिन्नवृक्षविभागेनापि पंचांगुल्यवच्छिन्नसं

योगनाशोपगमाद्यापत्तेः । न च पंचांगुल्यवच्छेदेन नैको वृक्षपाणिसंयोगः किंतु पंचैव संयोगा इति वाच्यं गौरवात्
संयोगव्यक्तीनां भेदमानाभावाच्च । अत्र केचित् तत्र पंचांगुल्यवच्छिन्नवृक्षपाणिसंयोगनाशे मानाभावः । न चैवं तदवच्छेदे
नैव तयोरेकदा संयोगविभागयोश्चिरावस्थानप्रसंग इति वाच्यं । विभागोत्पत्तिसमये एकावच्छिन्नसंयोगविभागयोः सहा-
वस्थानवत्कालांतरेपि सहावस्थाने क्षतिविरहात् । न चैवं एकांगुल्यवच्छिन्नवृक्षपाणिविभागस्य पूर्वसंयोगप्रति-
बंधेन तत्तदीयक्षणे उत्तरसंयोगानुत्पादकतया तत्पाद्यतुपक्षतोनाशासंभवेन बहुकालावस्थायित्वप्रसंग इति वाच्यं इष्ट-
त्वात् । कालांतरे तस्य तत्क्षणस्याप्यभ्युपगमात् । न चैवं पंचांगुल्यवच्छिन्नवृक्षनिष्ठपाणिसंयोगस्य क्रमिकपंचांगुल्यपनये
नाशो न स्यात् । अत्र न्यूनानतिरिक्तावच्छेदकावच्छेदविभागाभावादिति वाच्यं । क्रमिकपंचांगुलीवृक्षविभागैः समकालं
वनवधापदे कपालिवृक्षविभागजननात् तदुभयावच्छेदेनैकविभागसत्त्वेपि तदुभयावच्छेदेन विभागांतरोत्पत्तौ बाध-
काभावात् संयोगस्य कार्यसहभावेन हेतुतया सर्वत्र न क्रमिकविभागद्वयोत्पत्तिः । न च तत्र तदानीं पाणिसंयोगनाशोप्र-

योगं प्रसेव हर्व्व संयोगस्य प्रतिबंधकतया पूर्व्वसंयोगसत्त्वेप्यंगुल्युत्तरदेशसंयोगात्पाण्युत्तरदेश १

गु.दी. त्यग्रस्थितवृक्षस्य पाण्युत्तरदेशसंयोगस्यापत्तावापत्तिरिति वाच्यं। नव्यनये कर्म्मजसंयोगोत्पत्तौ बाधकाभावादित्याहुः।

३३ तदसत्तास्वजन्यसंयोगस्यैव कर्म्मनाशकतया पूर्व्वसंयोगस्य प्रतिबंधकस्य सत्त्वेन तादृशसंयोगासंभवाद् अंगुलीक्रियासम

33 कालोत्पन्नतदवच्छिन्नपाणिकर्म्मणः चिरावस्थानप्रसंगात्। इष्टापत्तौ च कालांतरेपि तत्कर्म्मणः प्रत्यक्षप्रसंगात्। अन्ये

तु तदुभयातिरिक्तानवच्छेद्यतदुभयावच्छेद्ये सादिकं न वक्तव्यं किंतु तदुभयातिरिक्तानवच्छेद्यतद्भिन्नतयातिरिक्तानवच्छेद्यत्वेन् से ताव-मात्रं=

वक्तव्यं। इत्थं च एकांगुल्यवच्छिन्नपाणिवृक्षविभागे नापि पंचांगुल्यवच्छिन्नपाणिवृक्षसंयोगनाशसंभवः तस्यापि पं

चांगुल्यतिरिक्तानवच्छेद्यत्वादित्याहुः। तदसत्। यदिग्वच्छेदेनालोकसंयोगो व्याप्तितदवच्छेदेनैव परमाणुविभागादालो

काकाशसंयोगनाशापत्तेः। केचित्तु द्रव्यनाशजन्यतदुभयसमवेतसंयोगनाशं प्रत्युभयसमवेतविभागत्वेन हेतुत्वस

मानावच्छेदकत्वं प्रत्यासत्तिः तेनैकावच्छिन्नतदुभयविभागसत्त्वेप्यन्यावच्छिन्नतदुभयोपसंयोगस्यान्यावच्छेदकाव

च्छेदेन नाशप्रसंगः न च तथापि पदवच्छेदेन तदुभयविभागः तदवच्छेदेनैवावच्छेदकांतरीयतदुभयसमवेतसकल

राम

३३

वृक्षविभागान्नपंचांगुल्यवच्छिन्नपाति ५

संयोगनाशत्पत्तिहेतुर्वादेति वा यं तत्तत्संयोगनाशं प्रति तत्तत्संयोगस्य प्रतियोगिनः स्वसमानावच्छेदकत्वप्रत्यासत्त्या
हेतुत्वात् विशेषसामग्रीसमवहितायाएव सामान्यसामग्र्याः फलोपधायकत्वादित्याहुः। तदसत् एकांगुल्यवच्छिन्नपा
ति वृक्षविभागजनितपंचांगुल्यवच्छिन्नपाति वृक्षसंयोगनाशे व्यभिचारात् ततः संयोगनाशस्य विभागरहितांगु
ल्यवच्छेदेनाप्युत्पादात्। सांप्रदायिकास्तु नाश्यत्वेनाभिमतायाः संयोगव्यक्तेः समवायसंबंधेन तद्व्याप्यस्य तद
वच्छेदकावच्छिन्नविभागस्य तन्नाशकत्वं यदि चैकांगुल्यवच्छिन्नपाति वृक्षसंयोगस्य नाशस्तदाग्रावच्छेदकता
संबंधेन तद्विभागस्यैव तन्नाशकत्वमित्याहुः। तदसत्। तथा सति नाश्यनाशकभावस्य तद्व्यक्तिविश्रांतत्वेन तत
त्संयोगत्वेन तत्तद्विभागत्वेनैव नाश्यनाशकभावस्य लाघवेनौचित्यादिति। नव्यास्तु द्रव्यनाशाजन्यसंयोगना सं
शत्वेन कार्यता विभागत्वेन नाशकता संयोगत्वविशिष्टफलोपधायकतं कारणतावच्छेदकसंबंधः कार्यतावच्छेद
कसंबंधश्च प्रतियोगित्वं संस्कारस्य त्वोर्नाशनाशकभाववत् संयोगत्वविशिष्टत्वमुपादानात् कर्मद्रव्ययोरपि न प्रति

=५ शाखायां कर्म शरीरकर्माधीनशरीरपूर्वसंयोगनाशः इत्येकः कालः शाखाकाशविभागः शरीरशाखासंयोगः इत्येकः कालः शाखाकाशविभा-
गः शाखाकाशसंयोगनाशः शाखाकर्मजः शाखाशरीरविभाग इत्येकः कालः ततः शाखाशरीरसंयोगनाशः ततः शाखोत्तरदेशसंयो-
गः ततः शाखाकाशविभागः पूर्वनाशे जायते ततश्च शाखोत्तरदेशसंयोगः तत्पूर्वे पूर्वत्वविशिष्टविभागत्वस्य संबंधस्य सत्वाद्विभागस्य नाशः शाखाकाशसंयोगनाशजन्यो भवतीत्यर्थः

गु.टि. योगिता संबंधेन संयोगनाशोत्पत्तिः। एतेनोत्तरसंयोगस्य विभागनाशकत्वमपि व्याख्यातं। तत्रापि द्रव्यनाशाजन्य
३४ विभागनाशं प्रति विभागत्वविशिष्टस्वप्रयोजकतासंबंधेन संयोगस्य हेतुत्वात्। अन्यथा स्वप्रयोज्यसंयोगत्वेन ना-
शकत्वोपगमे स्वत्वाननुगमापत्तेः। स्वप्रयोजकत्वं च स्वप्रतिबंधकसंयोगनाशकत्वं तेन पूर्वसंयोगनाशस्योत्तरसं-
34 योगजनकत्वान्नप्रसंगः तन्नये विभागस्य उत्तरसंयोगं प्रति मयोत्त्व प्रयोजकत्वात्सत्वेपि न क्षतिः। यद्वा लाघवा-
त्संयोग एव सर्वत्रोत्तरसंयोगप्रतिबंधकोऽन्येषां च संयोगनाशनामर्थसमाजाधीनं तदनुविधानमन्यथा-
सिद्धमिति मतं। तन्मते तु स्वसमानाधिकरणत्वे सति स्वपूर्वपूर्वत्वमेव प्रयोजकत्वं न चैवमुत्तरसंयोगवध्याद्विभागस्य
चिरावस्थानं न स्यादिति वाच्यं। तस्य सकलप्राचीनतांत्रिकसिद्धांतविरुद्धत्वेनेष्टत्वात्। प्रागुक्तसंयोगप्रतिबंधकत्व-
नये मूर्तोत्तरसंयोगवध्याद्विभागस्याचिरावस्थानं संभवात्। एतेन स्वप्रयोज्यस्यैव विभागनाशकत्वे संयोगमात्रज-
संयोगं प्रति पूर्वसंयोगस्याप्रतिबंधकत्वनये यत्र पूर्वदेशं तत्पुत्रं गुल्यादिक्रियाहस्तोत्पत्तिश्चेत्येकः कालः ततोंगुलीपूर्वदे-

चिरावस्थानस्यैव सिद्धांतितत्वादित्यर्थः =२

दा ५८ =८

३४८

शविभागो हस्तपूर्वदेशसंयोगश्च ततोंगुलीपूर्वदेशसंयोगनाशो हस्तपूर्वदेशविभागश्च ततो हस्तपूर्वदेशसंयोग
नाशोंगुल्युत्तरदेशसंयोगश्च ततस्तादृशसंयोगाद्धस्तोत्तरदेशसंयोगः ततो हस्तपूर्वदेशविभागनाशस्तत्र व्यभि
चारस्तत्र पूर्वदेशविभागस्य हस्तोत्तरदेशसंयोगं प्रयोजकत्वादित्यपि विनिरस्तं। स्वपूर्वपर्वतत्वरूपस्य प्रयोजकत्वस्य तत्
त्रापि सत्त्वादिति एवमुत्तरसंयोगस्य कर्मनाशकत्वमपि विभागस्य पूर्वसंयोगनाशकत्ववत् कर्मत्वविशिष्टफलोपधा
यकतासंबंधेन श्येनादौ च संयोगस्यैव कर्मनाशकत्वात् यत्र कर्मणा विभागजननकाले चिरकालस्थायिगुरुतर (शरादिकर्मणो)
कठिनपर्वतादिसंयोगो जातः तत्र तेन संयोगेन प्रतिबंधात् कर्मणोत्तरसंयोगजननासंभवेन तत्कर्मणो यावदाश्रयमवस्था
नापत्तिरिति चेन्न। तत्रापि फलवत्त्वेन तत्तीव्रवेगचतुर्थक्षणे पर्वतादिविभागसंयोगनाशकत्वेन पञ्चमक्षणे तेनैव पर्वता
दिनाग्रावच्छेदकान्तरेऽपरसंयोगोत्पत्त्युपगमात् अग्रावच्छेदकीभूतदेशयोरतिसान्निध्यवशाद्वा वच्छेदकभेदानुप
लंभात् तदवच्छेदेनैव पुनःसंयोगोत्पत्तौ तावत्पि बाधकाभावाच्च न च स्वसमानाधिकरणत्वे सति स्वपूर्वत्वसंबंधेन स्वज

गु.१८ न्याजन्यसाधारणं संयोगमात्रमेव कर्मनाशकमिति प्राचीनमतमेवाभ्युपेयतां किमेतावता कुत्रचिद् यास्त्वोत्तरोत्पन्न
३५ संयोगान्तरवशात्कर्मणश्चिरकालावस्थानस्य प्राचीनैरनभ्युपगमादिति वाच्यं। तथा सति द्वितीयक्षणोत्पन्नवाय्वादि
35 संयोगेनापि प्रायशः सर्वत्र तृतीयक्षणे कर्मणो विनाशाच्चतुर्थक्षणे तस्माद्धेत्वन्तरसंयोगोत्पादासंभवादिति चाहुः
।केचित्तु तत्तत्कर्मव्यक्तिं प्रति तत्तत्संयोगव्यक्तित्वेनैव नाशकता न तु यथोक्तरूपेण सामान्यतो नाश्यनाशकभावः
।तथा सति शरादेरेकस्यैव क्रियया मध्यवर्तिदेशैः संयोगं जनयित्वा दूरस्थेनान्त्यदेशसंयोगजननानुपपत्तेः। न च तत्रै
का क्रिया पूर्वसंयोगजनिका परं तु वेगजन्यकर्मसंतानमेव संयोगसंतानजनकं तथा च सत्त्वं नोदनाद्यभिघातैः कर्मेत
त्कर्मकारिताच्च संस्कारात्तत्पोन्तरमुत्पद्यते इति वाच्यं। एवं तत्रावेगसंतानकर्मसंतानयोः कल्पने गौरवेन सूत्रकारमतस्या
प्यनुपादेयत्वात्। मन्मते तु सत्यपि वेगे कर्मान्तरानुत्पत्तेः कर्मान्तरावरुद्धत्वादेवासंभवात्। अथ ममापि तत्र सामान्यतो नाश
कस्य स्वजन्यसंयोगस्य सत्त्वेपि तत्कर्मव्यक्तिनाशं प्रति चरमसंयोगव्यक्तेरेव विशिष्य हेतुतया विशेषकारणाभावा राम

३५

देवमध्यवर्त्तिसंयोगेभ्यो न तत्कर्मनाशः सर्वत्रैव तद्व्यक्तित्वेन नाश्यनाशकभावकल्पनामपेक्ष्य क्वचित्तत्कल्पना
या एवं न्याय्यत्वादिति चेन्न। सर्वत्र तत्तत्संयोगव्यक्तित्वेन नाश्यनाशकभावाकल्पनेऽप्युक्तक्रियाव्यक्तिनाशं प्रति चर
मसंयोगव्यक्तेर्विशिष्य हेतुत्वकल्पनेऽपि सामान्यतः कर्मनाशं प्रति दुर्वारत्वात् यावद्विशेषसामग्रीविरहस्यैव
सामान्यकार्याभावप्रयोजकत्वात् न च तत्तत्कर्मव्यक्तिनाशं प्रति तत्कर्मव्यक्तेः प्रतियोगिनो विशिष्य हेतुत्वाद्याव
द्विशेषसामग्रीबाध इति वाच्यं प्रतियोगिनो विशिष्य हेतुत्वाभ्युपगमे हि किमपराद्धं संयोगानां विशिष्य हेतुत्वाभ्युप
गमेन। न च संयोगानां विशिष्य नाशकत्वोपगमेऽपि उत्पन्नतत्तत्कर्मनाशानां पुनरुत्पादवारणाय नाशप्रागभावात्म
नस्तत्कर्मणः प्रतियोगिनः विशिष्य हेतुत्वमावश्यकमिति वाच्यं तत्संयोगानां फलोपधायकतासंबंधेन तत्तत्क
र्मनिष्ठतया हेतुत्वादेव उत्पन्ननाशस्य पुनरुत्पादवारणसंभवादित्याहुः। तदसत्। अग्रे तत्र वेगसंतानकर्मसंतान
कल्पनागौरवस्य फलमुखत्वेनादोषतया सूत्रकारमतस्यैव सम्यक्त्वादिति समासः। यद्यपि संयोगनाशमपेक्ष्य

कपालक्रिया कपालद्वयविभागः। कपालाकाशविभागः कपालाकाशसंयोगनाशः कपालोत्तरदेशसंयोगः कर्मनाशः =१
कपालद्वयसंयोगनाशः

गु.टी. कारणमात्रविभागस्य विभागजनकत्वनये बहुक्षणावस्थायित्वं स्वरूपपादं तपावितस्य सर्वमतसिद्धतया प्रका
३६ शान्तरेण बहुक्षणावस्थायित्वं व्युत्पादयति। एवमिति। तस्य उत्तरदेशात्मकशाखाकर्मणः बहुक्षणावस्थायित्वमि
36 ति पाणिपूर्वदेशसंयोगनाशः शाखायां च कर्मेत्येकः कालः ततः शाखाकर्मणा शाखाकाशविभागः पाणिकर्म
णा पाणिशाखासंयोगश्चेत्येकः कालः ततः शाखाकाशसंयोगनाशः पाणिशाखाविभागः शरीरशाखासंयोग
श्चेत्येकः कालः ततः पाणिशाखासंयोगनाशः शरीरशाखाविभागश्च ततः शरीरशाखासंयोगनाशः ततः शा
खायाः उत्तरसंयोगः ततः कर्मनाश इति क्रमेण बहुक्षणावस्थायित्वमित्यर्थः चतुर्थक्षणे पाणिशाखासंयोग
शरीरशाखासंयोगयोः पञ्चमक्षणे शरीरशाखासंयोगस्य प्रतिबन्धकत्वेन षष्ठक्षण एव उत्तरदेशसंयोगसंभवादि
ति भावः। एतदेवोपपादयति। पाणिकर्मेति। अवयविकर्मोत्पादस्य यावदवयवकर्मोत्पादनियतत्वमते पाणिकर्मो
त्तरं शरीरकर्मोत्पादासंभवादाह। पाणिशाखासंयोगेन वेति। क्षणविलम्बादिति शाखाया उत्तरदेशसंयोगोत्पादस

राम
३६

ण विलंबादित्यर्थः। यद्यपि शरीरविभागकाले स्थिरस्यापि शाखावृक्षकर्मणः षष्ठक्षणावस्थायित्वं संभवति प्रथमं शरी
रपूर्वदेशविभागशाखावृक्षकर्मणी ततः शरीरपूर्वसंयोगनाशशाखाकाशविभागौ ततः शरीरशाखासंयोगशाखा
पूर्वसंयोगनाशौ ततः शरीरशाखाविभागं ततः शरीरशाखासंयोगनाशः ततः शाखायामुत्तरदेशसंयोगः तदनंतर
मेव कर्मनाश इति क्रमेण सप्तमक्षण एव कर्मनाशादिति पातिपूर्वसंयोगनाशकालपर्यंतानुधावनमफलं तत्
यद्यपि अवयवपरंपरावृद्धिक्रमेण चिरावस्थानवत्क्रियाप्युत्पादनाय तदनुधावनं। वस्तुतस्तु क्रियाभावविशिष्टसं
योगस्यैव प्रतिबंधकतया प्रकृते च कार्याव्यवहितपूर्वक्षणे शरीरक्रियायाः सत्त्वात्प्रतिबंधकत्वासंभवेन तत्पाभि
धानमपि त्वेव तत्त्वं। तस्य उत्तरदेशात्मकशाखाकर्मणः सप्तक्षणावस्थायित्वमिति अंगुलीशाखासंयोगात्पाणि
शाखासंयोगः पाणिशाखासंयोगाच्छरीरशाखासंयोग इति क्रमेणैव क्षणवृद्धिरिति भावः। तदवयवेति। अंगुल्य
वयवेत्यर्थः। तस्य उत्तरदेशात्मकशाखाकर्मणः अवधिकाधिकेति अष्टनवादीत्यर्थः। परंपरेति। संयोगोत्पादस्याप्यु

गु.दी पगमेक्षणषट्कमात्रंकर्मणोःव्याप्यवृत्तित्वाभ्युपगमेपंचक्षणमात्रंस्थायित्वमितियोजना। उदाहृतस्थलंइति।
३७ अंगुलीतदवयवादिपूर्वसंयोगनाशोत्पादकालोत्पन्नशाखाकर्मस्थलंइत्यर्थः। परंपराश्रमवायिवृत्तिसंयोगस्यै
37 वसंयोगजनकतया अंगुलीशाखासंयोगेनैवयुगपत्पाणिशरीरयोःशाखायांसंयोगस्यजननात्क्षणषट्कं
कर्मणोव्याप्यवृत्तित्वेचक्वचिदन्यथापीत्यादिनाव्युत्पादितपाणिशरीरपूर्वसंयोगनाशोत्पत्तिकालोत्पन्नशाखाकर्मस्थल
इवपंचक्षणमात्रमवस्थानमितिभावः। कर्मणोव्याप्यवृत्तित्वस्याभ्युपगमेपंचक्षणमात्रमुपपादयति। परमाणाविति
अंगुल्यारंभकपरमाणावित्यर्थः। तदवच्छेदेनपरमाण्ववच्छेदेनयुगपदेवेति तथाचपरमाणुशाखासंयोगोत्प
त्तिकालएवघटकादिगतशरीरांतावयविनःशाखायासंयोगोत्पादानंतरक्षणवृद्धिरितिभावः। यद्यपिपरमाणौक्रि
ययायुगपत्पाणिपूर्वसंयोगनाशःशरीरोत्पत्त्युत्तरदेशात्मकशाखाकर्मोत्पत्तीचततःपाणिशाखासंयोगःशा
खाकर्मणापाणिशाखापूर्वदेशविभागश्चेत्येकःकालःततःपाणिशाखासंयोगाच्छरीरशाखासंयोगःशाखापूर्वदेशसंयो राम ३७

गनाशश्च ततः शाखाशरीरविभागः इदानीं चन शाखायां उत्तरसंयोगः शरीरसंयोगेन प्रतिबंधात् ततः शाखा
स्वा०२ शरीरसंयोगनाशः ततः शाखायोऽन्तरसंयोगः ततः शाखाकर्मनाशः तत्र कर्मणोऽव्याप्यवृत्तित्वाभ्युपगमे विशाखाक
र्मणः षट्क्षणावस्थायित्वं संभवति एवं पत्रांगुलीक्रियया अंगुलीपूर्वदेशसंयोगनाशः पाण्युत्पत्ति शाखाकर्मो
त्पत्तौ त्वेकः कालः ततोंगुलीशाखासंयोगः शाखाकर्मणा शाखापूर्वदेशविभागश्च पाणौ शरीरारंभकसंयोग
श्च ततोंगुलीशाखासंयोगात् पाणिशाखासंयोगः शाखापूर्वदेशसंयोगनाशः शरीरोत्पत्तिश्च ततः पाणिशाखासं
योगाच्छरीरशाखासंयोगः पाणिशाखाविभागश्च इदानीं च शाखायां नोत्तरसंयोगः पाणिसंयोगेन प्रतिबंधात् त
तः पाणिशाखासंयोगनाशः शरीरशाखाविभागश्च ततः शरीरशाखासंयोगनाशः इदानीं च शाखायां नोत्तरसं
योगः शरीरसंयोगेन प्रतिबंधात् तदनंतरमेव शाखायां उत्तरसंयोगः ततः शाखाकर्मनाशः तत्र कर्मणोऽव्याप्यवृत्तित्वा
भ्युपगमे विशाखाकर्मणः सप्तक्षणावस्थायित्वं संभवति। तथापि अंगुल्यादिसमवेतपाण्यादेः पूर्वं विद्यमानताद

गु.दी शायां शाखावां कर्मत्वमिति स्थूलेयं पंचक्षणावस्थायित्वमेवेति दीधितिकृतो निगर्वः। प्रसंगादाह संयोगेनेति परंपरासम
३८ वायिवृत्तिसंयोगात्परंपरासमवेतविभुसंयोगोत्पादकत्वोत्पादकेनेत्यर्थः। व्याख्यातमिति तादृशविभागाधीनोत्पत्तिक
३८ तया व्याख्यातमित्यर्थः। आरंभकसंयोगप्रतिद्वंद्विविभागजनकस्य कर्मणः पंचक्षणावस्थायित्वपर्वं व्युत्पादितमि
दानीं सप्तक्षणावस्थायित्वमपि तस्य व्युत्पादयति। मतभेदेनेति। द्रव्यनाशमपेक्ष्य कारणमात्रविभागस्य विभागजन
कत्वमिति मतेनेत्यर्थः। कपालद्वयसंयोगनाशाद्घटनाशो योऽनंतरमेव कपालाकाशादिविभागोत्पत्तिः तत्क्षणद्वयवृ
त्तिरिति भावः। यद्यपि द्रव्यनाशसापेक्षत्वमतेपि सर्वत्र तादृशकर्मणो न सप्तक्षणावस्थायित्वं यत्र त्रिकपालावयवे
कघटारंभके कपालसंयोगनाशकाले कपालांतरे क्रिया ततो घटनाश कपालद्वयविभागौ ततः क्रमेण कपा
लाकाशादिविभाग तत्संयोगनाश कपालांतरोत्तरदेशसंयोगाः। ततः कपालांतरकर्मनाशस्तत्पंचक्षण त्र२
मात्रस्थायित्वात् तथाप्यारंभकसंयोगनाशकालानुत्पन्नकारणमात्रविभागजनकस्य कर्मणः सप्तक्षणावस्था
राम
३८

यित्वं बोध्यं। पूर्वं शरीरपूर्वसंयोगनाशकालोत्पन्नस्योत्तरदेशात्पत्तिक्षणस्य वा कर्मणः पंचक्षणावस्थायित्वं व्युत्पादितं
इदानीं तु स्यषष्ठादिक्षणावस्थायित्वं व्युत्पादयति। उपदर्शितस्थल एव चेति। शरीरपूर्वसंयोगनाशकालोत्पन्नक्ष
स्वा कर्मस्थल इत्यर्थः। उत्तरसंयोगस्येति। उत्पादयत्यग्रे तेनान्वयः। उत्तेति स्वरूपकथनं। अग्रमूर्त्तेन तदानीं
संयोगोत्पत्तौ कारणाभावात् एवमग्रेऽपि एतावता षट्क्षणावस्थायित्वं व्युत्पाद्य सप्तादिक्षणावस्थायित्वं व्युत्पाद
यति। एवमिति। पूर्वपूर्वेति। पूर्वपूर्वसंयुक्तसंयुक्तमूर्त्तोत्तरेण शाखाया विभागकाले शाखायां मूर्त्तोत्तरेण संयोगो
त्पादयत्यर्थः। ग्रधिकाधिकेति। षष्ठसप्तमादिक्षणावस्थायित्वमपीत्यर्थः। विभागकालोत्पन्नमूर्त्तोत्तरसंयोग
स्य प्रतिबंधकतया कर्मणोत्तरदेशसंयोगजनने कालविलंबात् तस्य जन्यसंयोगस्यैव च कर्मनाशकत्वादिति भावः
। ननु पूर्वसंयोगोत्तरसंयोगयोरेकेन रूपेण प्रतिबध्यप्रतिबंधकभावः। न च संयोगत्वावच्छिन्नं प्रति संयोगत्वेन प्र
तिबंधकत्वं समानावच्छेदकत्वं च प्रत्यासत्तिः तेन सत्यपि पृष्ठादौ वस्त्रसंयोगे शरीरे च पुस्तकजलादिसंयोगे शरीरस्यास

गु.टी. दिकर्म्मणा न संयोगानुपपत्तिरिति वाच्यं। कारणाकारणसंयोगजन्ये कार्याकार्यसंयोगे व्यभिचारात् शाखादौ पदव
३५ च्छेदेनांगुल्यादिसंयोगस्तदवच्छेदेनैव हस्तादिसंयोगोदयात्। एवं च अंगुल्यादौ यत्स्वस्वभागावच्छेदेन शाखादिसंयोग
39 स्तदवच्छेदेनैव हस्तादावपि शाखादिसंयोगोदयात् अवयवस्यैवावयवावयवादेरपि अवयविनिष्ठसंयोगावच्छेदक
त्वात्। अथ कर्मजन्यसंयोगत्वावच्छिन्नं प्रत्युत्पन्नस्य संयोगत्वेन प्रतिबंधकत्वं न चैवं मूलावच्छेदेन स्तंभादिसंव
द्धदंडादेः सत्यपि स्तंभादिसंयोगेऽन्यावच्छेदेन देशांतरसंयोगापत्तिरिति वाच्यं। मूलावच्छेदेनैव तत्र देशांतरसंयोगान
भ्युपगमाद् अग्रावच्छेदेन देशांतरसंयोगस्य स्वविशिष्टत्वादिति चेन्न। यत्र दंडादौ पूर्वसंयोगविनाशकाले उत्तरदेशारं
भकावयवकर्मणा तदारंभकावयवे न समं संयोगोत्पत्तिरुत्तरदेशोत्पत्तिश्च तत्र तदवयवसंयोगावच्छेदेनैव दंडा
देरुत्तरदेशसंयोगस्तत्र व्यभिचारात्। न च तत्रावयवसंयोगज एवोत्तरदेशसंयोगो न तु कर्मज इति वाच्यं। स्व
जन्यसंयोगस्यैव कर्मनाशकतया तत्कर्मणो यावदाश्रयमवस्थानप्रसंगात्। किंच मूलतलाग्रे उत्तरदेशे सत्यपि ग सीसेव राम ३५

(१ उक्तस्थले च कर्ममात्रजनितेति निवेशात् तज्जविजसंयोगोपगमाच्च वारणमत आह)

गनादिसंयोगे निष्क्रियतेजोवाय्वादिघटादिसंयोगे च घटादिकर्मणा घटादिसंयोगोदयाद्व्यभिचारः।अथ यतदीयकर्म मात्र १
जनितसंयोगत्वावच्छिन्नं प्रत्युक्तस्वासत्त्वात्तन्निष्ठसंयोगत्वेन प्रतिबन्धकत्वे न चैवमुत्तरदेशनिष्ठावरकभित्त्यादि
संयोगस्य प्रतिबन्धकत्वानापत्तिरिति वाच्यं।तत्तत्कर्मव्यक्तिजन्यसंयोगं प्रति समानावच्छेदकत्वप्रत्यासत्त्या
तत्तद्भित्त्यादिसंयोगव्यक्तेर्विशिष्य पृथगेव प्रतिबन्धकत्वात्तव स्पृश्यमाणशरीरस्यातस्या प्रतिबन्धकत्वेपि क्षतिविरहा
त्।न च तत्रापि यत्र मूलावच्छेदेनैव दण्डादिः स्तम्भादिसंबद्धो ग्रावच्छेदेन न कुत्रापि संयुक्तः तत्राग्रावच्छेदेन कर्मोत्पत्तौ
द्वितीयक्षणे वाग्रावच्छेदेन संयोगोत्पत्तिप्रसंग इति वाच्यं।तत्राग्रावच्छेदेनाप्यंततः प्रभामण्डलादिसंयोगस्य गगना
संयोगस्य च सत्त्वादिति चेन्न भित्तिमितवस्त्वादौ सत्त्वेप्यपि मुखावच्छेदेन जलघटादिसंयोगे संयोगोदयात्स्पष्टलग्नव
स्त्राग्राभिमुख्यावच्छेदेन शरीरसंयोगे सत्त्वेपि शरीरवस्त्रयोरस्पृष्टतरे जलालोकगगनादिना संयोगोदयाच्च।न च तत्रा
पि विभागात्ततत्संयोगनाशः कल्प्यते।अतिसान्निध्यबलाच्च नोपलभ्यत इति वाच्यं।तथा सति संयुक्तद्रव्यमात्रस्यैव देशां

तरगमने वाधापत्त्यानुभवविरोधप्रसंगात् । तथा तेनत्कां सत्त्वारंभकसंयोगे आरंभकसंयोगाविरोधिकर्मणा ध्वंतरश्चा
रंभकसंयोगावच्छेदकावच्छेदेन जलालोकादिसंयोगानुपपत्तिस्तत्रारंभकसंयोगनाशोपगमे द्रव्यनाशप्रसंगात् तथा
रंभकसंयोगातिरिक्तत्वविशेषणे विपरीतानुभवविरोधस्य दुर्वारत्वात् । न च तत्तत्कर्मव्यक्तिजन्यसंयोगे तत्तत्कर्म
व्यक्तिजन्यविभागनाश्यसंयोगएवप्रतिबंधक इति वाच्यं तथा सति आरंभकसंयोगप्रतिद्वंद्विविभागजनकक्रियया ऽ
न्यदेशसंयोगे जनयितव्ये आकाशादिसंयोगस्याप्रतिबंधकतया तदपसारणाय कारणमात्रविभागजविभागकल्प
नावैयर्थ्यप्रसंगात् । अथ तत्तत्कर्मव्यक्तिजन्यसंयोगे तत्तत्कर्मप्रयोज्यविभागनाश्यसंयोगएवप्रतिबंधकः प्रयोज्यत्व
करणाच्चारंभकसंयोगविरोधिविभागजनकक्रियाजन्यसंयोगेपि आकाशादिदेशसंयोगस्याप्रतिबंधकत्वं तत्तत्क्रिया
व्यक्तेस्तत्तद्विभागव्यक्तिं प्रति विशिष्य हेतुत्वात्तत्तत्संयोगव्यक्तेः तत्तद्विभागव्यक्तिप्रतिबंधकतया वा सत्त्वविकर्मणि कु
तश्चिदेव विभागो ननु सर्वस्मादिति नियमसंभवादिति चेन्न । दंडादावुत्तरदेशोत्पत्तिपि गगनादिसंयोगे निष्क्रियजलतेजो

वाय्वादिघृतादिसंयोगे स्वाधिकरणसंयोगे च हस्तादिकर्मणो हस्ताभिघातोऽस्यात् अभिघाताधीनकर्मोत्पत्तिसमात् तस्मा
त्पि हस्तादिवृक्षप्रयोज्य विभागनाश्यत्वात् । नच जन्यत्वजन्यजन्यत्वोभयमात्रसाधारणप्रयोज्यत्वस्यैवात्र प्रवेशान्नायं
दोष इति वाच्यं । तथापि ततः क्रिया व्यक्तिभेदेनानंतप्रतिबध्यप्रतिबंधकभावापत्तेः । यत्र पूर्वदेशसंयुक्तांगुल्यां क्रिया ततो
ऽगुलिपूर्वदेशविभागो हस्तोत्पत्तिः ततोंगुलीपूर्वदेशसंयोगनाशो हस्तपूर्वदेशसंयोगश्च ततोंगुल्यास्तस्मिन्नेव पूर्वदेशे
ऽवच्छेदकांतरे पुनः संयोगोंऽगुलीपूर्वदेशविभागाद्धस्तपूर्वदेशविभागश्च ततोंऽगुल्याः पुनः पूर्वदेशसंयोगः प्रतिह
स्तपूर्वदेशसंयोगस्यापि तदुत्तरपूर्वभागावच्छेदेन पुनः पूर्वदेशसंयोगस्ततस्तदुत्तरभागावच्छेदेनैव वर्तमानस्य प्रतिबंध
कत्वापत्तेश्च दृष्टापत्तौ च क्षणद्वयपलापापत्तेः । एतेन कर्मजसंयोगत्वावच्छिन्नं प्रत्यारंभकसंयोगातिरिक्तनिविडद्र
व्यसंयोगत्वेनैव प्रतिबंधकत्वं समानावच्छेदकत्वं च प्रत्यासत्तिः स्तिमितवस्त्रादेः पटलग्रवस्त्रादौ चानापत्त्या जलकाष्ठा
द्यविभागाकल्पना एवं च वाय्वारंभकभिन्नादिसंयोगस्यापि निष्पन्नपूर्वप्रतिबंधकतायाम्नेनैव गतार्थत्वात् तत्र च नि

व

शिथिलसंयोगस्यावर्जनेन २

गु.टी. विडद्रव्यासंयोगो नाप्यवयवास्पन्दस्तत्रापि फलवशीनां तत्तत्तीद्रवपिशाचादिनिविडद्रव्यसंयोगकल्पनादित्यपि निरस्तं
४१ उक्तस्थले ऽङ्गुल्याः पुनः पूर्वदेशासंयोगं प्रतिहस्तपूर्वदेशासंयोगस्य प्रतिबंधकत्वापत्तेः दृढलग्नवस्त्रादौ विभागक
५१ ल्पनेऽप्यनुभवविरोधापत्तेश्चेति। उच्यते तदीयकर्मजनितसंयोगत्वावच्छिन्नं प्रति क्रियाविरहविशिष्टतन्निष्ठसंयोग
त्वेन प्रतिबंधकत्वं उत्तरदेशोपरि निक्षिप्तजलालोकादिसंयोगे विभ्रमन्यदीयकर्मणा संयोगो स्यादा दारवायां ऽङ्गुली
संयोगसत्त्वे ऽप्यंगुलीसंयोगजन्यहस्तसंयोगो तदुपादाय व्यभिचारवारणाय तदीयकर्मजनिते तत्संयोगस्य क्रियावि
रहविशिष्टत्वं चावच्छेदकतावघटितसामानाधिकरण्यसंबंधेनेत्ति मितवस्त्रादौ जलादिसंयोगः दृढलग्नवस्त्रजला
दौ शरीरशरादिसंयोगश्च न क्रियाविरहविशिष्टः वस्त्रजलादिक्रियोत्पत्तिदशायां तत्संयुक्तजलादिशरीरशरादे
रपि सक्रियत्वात् न हि निश्चलपूर्वदेशतो न विभज्यैव उत्तरदेशेन संयुज्यंत इति कश्चिदभ्युपैति न च तदानीं तेषां स
क्रियत्वे ऽपि यदाकदाचित्क्रियाविरहसत्त्वादेव तद्विशिष्टत्वमिति वाच्यं। क्रियाविरहविशिष्टत्वेन प्रतिबंधकतया य राम

४१

दाकदाचित्क्रियाविरहत्वेपि तदानींविशिष्टाभावसत्वात्। ननु तथापि मूर्त्तत्वावच्छेदेन निष्क्रियपूर्वदेशसंबंधस्य
घटस्य तत्संयोगे सत्यपि यावच्छेदेन कर्मणोत्तरदेशसंयोगोत्पादव्यभिचारः एवं मूर्त्तत्वावच्छेदेन निश्चलतत्वाघट
रेण समवायेनारंभकसंयोगे विद्यमानेपि तत्वादेरग्रावच्छेदेन क्रियातो विनाप्यारंभकसंयोगनाशमग्रावच्छेदेनो
त्तरदेशसंयोगदर्शनाद्व्यभिचारः। न च समानावच्छेदकत्वस्य प्रत्यासत्तित्वान्न तद्दोषावकाश इति वाच्यं। तथास
ति क्रियाविरहविशिष्टोभयसंयोगस्यावच्छेदकतासंबंधेन निश्चलपूर्वदेशावयवमात्रवृत्तितया तत्सत्वेपि वि
भागो। तिसमये तदीयकर्मजनितोत्तरदेशसंयोगोत्पत्तेर्दुर्वारत्वादिति चेन्न। क्रियाविरहविशिष्टतदवच्छि
न्नतत्त्वृत्तिसंयोगत्वावच्छिन्नप्रतियोगिताकाभावः तदीयकर्मजनिततदवच्छिन्नसंयोगे हेतुः। यद्वा तदीयकर्मजनि
ततदवच्छिन्नसंयोगोत्पत्तिः तदव्यवहितपूर्वक्षणोत्पत्तियोग्यानधिकरणवृत्तित्वविशिष्टकालिकविशेषणतासंबं
धेन तादृशाभाव इति कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिरित्यभ्युपगमात्। अग्रावच्छेदेन कर्मभेदेन चानंतप्रतिब

५ = सामान्यकारणतानिर्वहसूचनाय

स्याप्रतिबंधकाभावस्य चेष्टत्वात् । यत्र उत्तरदेशनिष्ठावरकभित्त्यादिसंयोगस्तत्र तज्जनकक्रियात्वेन तत्कर्मव्यक्तिजन्यसंयोगाना
वच्छिन्ने प्रत्यगेव स्वप्रतिबंधक इति तत्साधारण्याभावेपि न क्षतिः वस्तुतस्तु उत्तरदेशनिष्ठावरकभित्त्यादिसंयोगस्य प्रति
बंधकत्वाद्यावन्मात्राभावात् तत्तत्क्रियाव्यक्तित्वेन तत्तद्देशवृत्तिसंयोगव्यक्तित्वेन हेतुत्वादेवावृतदेशे संयोगानुत्पादसंभवा
त् कर्मव्यक्तीनां विशिष्यहेतुत्वानभ्युपगमे तत्रापि तत्रावरकसंयोगेन प्रतिबंधात् तत्कर्मव्यक्तिजन्यसंयोगानुत्पादसंभवे
पि कर्मजसंयोगसामान्यापत्तेर्दुर्वारत्वात् एतत्क्रियाव्यक्तिजन्यसंयोगोत्पत्तिदशायामेतद्व्यक्तिजन्याभाविसंयोग
व्यक्त्यनुत्पादस्य दुर्वारत्वात् तत्रापि तत्तद्देशवृत्तिसंयोगव्यक्तेर्वावृतदेशेऽनुत्पादवारणाय भित्त्यादिसंयोगस्य
प्रतिबंधकत्वमावश्यकमिति वाच्यं तत्र तत्प्रागभावविरहात् तत्तद्देशवृत्तित्वविशिष्टसंयोगं प्रति तादात्म्यसंबंधे
स्वर न तत्तद्देशस्य हेतुतया तत्सामान्यसामग्रीविरहात्तु अनावृतत्वाविशेषेपि कुत्रचिदेवानावृतदेशे कर्मणा संयोगः
कुत्रचिन्नेति नियमानुपपत्त्या देशानां विशेषतो हेतुत्वस्यावरकसंयोगानां प्रतिबंधकत्वस्य चावश्यकत्वात् तान्वे

वं कर्मजसंयोगप्रत्यक्षत्वे वानेन रूपेण प्रतिबंधकत्वात् संयोगजसंयोगं प्रति पूर्वसंयोगस्य वेन रूपेण प्रतिबंधकत्वमिति चे
न्न तत्र हि देशांतरसंयोगः प्रतिबंधक एव न मानाभावात्। न चैवं यत्र पूर्वदेशसंयुक्तांगुल्याः क्रिया ततोंगुलीपूर्वदेशवि
भागो हस्तोत्पत्तिश्च ततोंगुलीपूर्वदेशसंयोगनाशो विनश्यदवस्थांगुलीपूर्वदेशसंयोगाद्धस्तपूर्वदेशसंयोग
श्च ततोंगुल्युत्तरदेशसंयोगो हस्तपूर्वदेशविभागश्च ततो हस्तपूर्वदेशसंयोगनाशः। ततोंगुल्युत्तरदेशसंयोगा
द्धस्तोत्तरदेशसंयोगस्तत्र हस्तपूर्वदेशसंयोगनाशकाल एव हस्तोत्तरदेशसंयोगापत्तिरिति वाच्यं। अतिरिक्तप्रति
बंधकभावकल्पनामपेक्ष्य लाघवात् कार्याकार्यसंयोगं प्रति कारणाकारणसंयोगस्यैव कार्यसहभावेन हेतुतया
विनश्यदवस्थांगुलीसंयोगाद्धस्तपूर्वसंयोगस्यैवासंभवात् क्षणविलंबस्य शपथनिर्णेयत्वेनेष्टापत्तेः। एवं च त्वा
च्च परं तु कपालाकाशादिसंयोगात् घटाकाशादिसंयोगधारावारणाय तदुभयसमवेतसंयोगत्वावच्छिन्नं प्रति
समानावच्छेदकत्वप्रत्यासत्त्या तदुभयसमवेतसंयोगत्वेन प्रतिबंधकत्वं। न तु तथापि लाघवात् कालिकसामानाधिक

गु.टी
४३
43

रणमात्रप्रत्यासत्त्या क्रियाविरहविशिष्टतदवच्छिन्नतन्निष्ठविभागएव तदीयकर्मजनिततदवच्छिन्नसंयोगहेतुरस्तु
कृतं संयोगस्य प्रतिबंधकत्वेन यत्र पटस्य मूलाग्रावच्छेदेन वृक्षेन क्रमिकसंयोगद्वयं ततो ऽग्रावच्छेदेन पटस्य क्रियया
ऽग्रावच्छेदेन पटवृक्षविभागः मूलावच्छेदेन पटे कर्मोत्पत्तिश्चेत्येकः कालः तत्र तदग्रिमक्षणएव मूलाग्रोभयावच्छे
देन पटस्योत्तरदेशसंयोगापत्तिरग्रावच्छेदेन पटे निष्क्रियवृक्षविभागसत्त्वात् तत्तदवच्छिन्नेति विभागसंयोगयोर्वि
शेषणं विशिष्टं तस्य विभागविशेषणत्वात् आलोकादिकर्मजनितालोकादिविभागसत्त्वेपि निष्क्रियवृक्षादिरूप
पूर्वदेशविभागोत्पत्तिसमये नोत्तरसंयोगोत्पत्तिः न च विभागस्य हेतुत्वे पूर्वसंयोगनाशसमयएवोत्तरसंयोगो
त्पत्तिरिति वाच्यं प्रत्येककृविरूपवस्य शपथनिर्णेयत्वेनापत्तेः सुकरत्वात् यत्र पूर्वसंयोगनाशोत्पत्तिसमये ऽग्रा
श्रयनाशसामग्री तत्रानंतकोटिसंयोगादिकल्पनायाश्च फलमुखत्वादिति चेन्न अकारणाकारणविभागजन्यनि
ष्क्रियजलालोकादिविभागमादाय निष्क्रियवृक्षाद्यात्मकपूर्वदेशसंयोगसत्त्वेपि विभागोत्पत्तिसमये ऽन्यसंयो

पक्ष्यादिकर्मणा:४

राम
४३

गोत्पत्तेर्दुर्वारत्वात्। निष्क्रियजलाल्लोकाघात्मकपूर्वदेशसंयोगसत्त्वेपि कारणाकारणविभागजन्यनिष्क्रिय
वृक्षादिविभागमादायोत्तरसंयोगापत्तेर्दुर्वारत्वाच्च तद्विभागव्यक्तित्वेन हेतुत्वोपगमे च लाघवान्निरुक्तरूपेणैवसं
योगसामान्याभावस्यैव हेतुतौचित्यात् संयोगस्य प्रतिबंधकताया अन्वयव्यतिरेकसिद्धत्वाच्चेति तंत्रानुयायिनो रा
सांतस्मरणैः स्वतंत्रास्तु तदीयकर्मजनितसंयोगत्वावच्छिन्नं प्रति तन्निष्ठात्यन्तसंयोगत्वेनैव प्रतिबंधकत्वं लाघवादन्ये
षां च संयोगनाशानामपि समाजातीनं सन्निधानं अन्यथासिद्धं इत्थं चांतरा मूर्त्तांतरसंयोगोत्पादेपि नोक्तश
त्या क्रियापाश्चिरावस्थानं न चैवं तत्र प्रहरपर्यंतमिदं चलदेव वर्त्तत इति प्रत्ययानुपपत्तिरिति वाच्यं। वेगादिज
न्यकर्मसंतानमादाय तदुपपत्तेः। न च गगनादिमादाय विनिगमनाविरह इति वाच्यं। गगनत्वादेरुपाधितया
आत्मत्वस्य च जातितया लाघवस्यैव विनिगमकत्वात्। न च तथापि पृथिवी जलतेजः संयोगमादाय विनिग
मनाविरह इति वाच्यं। स्तिमितवस्त्रादेः सत्त्वपि घृतजलादिसंयोगे भूतलादिसंयोगोत्पात पृष्ठलग्नवस्त्रशरजता

गु.टी दोसत्वविशरीरादिसंयोगे कपालादौ सत्वव्यापारं भक कपालाद्यंतरसंयोगे चाप्यंतरे जलालोकगगनादि
४४ संयोगोदयाच्च व्यभिचारात् । न सर्वत्रैव पृथिव्यादिसंयोगकल्पनाप्रसंगाच्च न च तथापि मनसः संयोगमादाय विनि
गमनाविरहः । तस्यातीन्द्रियतया तत्सत्वे संयोगोत्पादस्यासिद्धत्वादिति वाच्यं । पृथिवीत्वादेनां कार्येऽपि मन
५५ स्त्वस्यापि जातित्वाभावात् सर्वत्र मनःसंयोगकल्पनाप्रसंगाच्चाश्रुतत्वे च वायुसंयोगमादाय विनिगमनाविरहो
पि सर्वस्तु तः सर्वत्र वायुसंयोगकल्पनाप्रसंगात् क्रियामात्रस्यात्मसंयोगासमवायिकारणत्वे तथाप्यात्मनो विभुत
या चात्मसंयोगस्य सर्वत्राव्यवच्छेदत्वात् तन्न वेगवत्पटस्य मूलाग्रावच्छेदेन कपि कर्म्मकर्म्मणां मूलाग्रावच्छिन्नात्मना
संयोगद्वयं तत्रोग्रावच्छेदेन क्रियाविभागादिक्रमेणाग्रावच्छिन्नसंयोगनाशो मूलावच्छेदेन पटस्य क्रियोत्पत्तिक्षणे स्थितः
कालः तत्र तदग्रिमक्षणे अग्रावच्छेदेन पटस्योत्तरसंयोगवत् मूलावच्छेदेनाप्युत्तरसंयोगापत्तिः । आत्मसंयोगाभा
वस्य पटे सत्वात् न च समानावच्छेदकत्वस्य प्रत्यासत्तित्वात् नैव दोष इति वाच्यं । तथापि तन्निष्ठात्मसंयोगसत्वेऽग्रादे २१
४४

शावयवेऽवच्छेदकतासंबंधेन तदीयकर्मजनितसंयोगापत्तेर्दुर्वारत्वात् तत्रावच्छेदकतासंबंधेन तन्निष्ठात्मसंयोगा
भावस्य तदानीमपि सत्त्वादिति चेन्न । तदीयकर्मजनिततदवच्छिन्नसंयोगं प्रति तदवच्छिन्नतन्निष्ठात्मसंयोगत्वावच्छि
न्नाभावत्वेन हेतुत्वे पूर्ववत् कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिरित्यभ्युपगमात् । अथ तथापि स्वत्रपस्य
सर्वावच्छेदेनैकदैवात्मसंयोगो जनितः ततोऽग्रमात्रावच्छेदेन कर्मोत्पादात्मविभागः ततः पूर्वात्मसंयोगनाशो मू
लावच्छेदेन पटस्य कर्मोत्पत्तिश्च ततोऽग्रावच्छेदेन पटस्योत्तरदेशसंयोगस्तत्राग्रावच्छेदेन संयोगोत्पत्तिसमये मूला
वच्छेदेन वृक्षादिसंयोगसत्त्वेऽपि मूलावच्छेदेन उत्तरसंयोगोत्पत्तिप्रसंगः अग्रावच्छेदेनोत्तरसंयोगानुरोधेनात्मसं
योगाभावस्याऽवश्याभ्युपेयत्वात् वृक्षादिसंयोगस्य चाप्रतिबंधकत्वादिति चेन्न । लाघवादनेन रूपेण प्रतिबंधकत्वक
ल्पनेऽफलबलेन तत्तदवच्छेदकभेदेन संयोगभेदाभ्युपगमात् संयोगव्यक्तिकल्पनायाश्च फलमुखत्वात् वायुसं
योगादेः प्रतिबंधकत्वे च बहुतरसंयोगकल्पनागौरवस्यैवाविनिगमकत्वात् । अस्पृश्येऽपीति न्यायात् इत्याहुः । तदसत्

गु.टी.
४५
४५

वृक्षादिसंयोगस्यापि प्रतिवंधकताया अन्वयव्यतिरेकसिद्धत्वात् अन्यथा तत्संयोगस्याप्रतिवंधकत्वे मानाभावः।
लाघवात्तदीयकर्मजनिततत्तदवच्छिन्नसंयोगं प्रति तदवच्छिन्न(सं)योगं प्रति तदवच्छि(न्ने) तन्निष्ठात्मविभागत्वेन कालिकसा
मानाधिकरण्यप्रत्यासत्त्या हेतुत्वाभ्युपगमादेव विभागोत्पत्तिसमये संयोगोत्पादासंभवात् तत्क्षण एव विलंबस्य शपथनिवा
र्यत्वात् पूर्वसंयोगनाशसमये उत्तरसंयोगोत्पत्तौ विष्टापत्तेः सुकरत्वात्। न च यत्र कपालक्रियया कपालात्मविभागः
कपाले वेगो घटश्च युगपदुत्पद्येते तदनंतरं कपालात्मसंयोगनाशः कपालवेगात् घटवेगश्च युगपदुत्पद्येते तदा च न
ततो घटात्मसंयोगोत्पादो विनश्यतो असमवायिकारणत्वाभावात् अपवेगाद्घटे कर्म ततस्तेनैव कर्मणा विनैव वि
भागं घटोत्तरदेशसंयोगस्तत्रात्मविभागव्यभिचारीति वाच्यं। प्रकृतेः समवायिकारणस्य कार्यसहभावेन हेतुत्वे माना
भावाद्द्वितीयक्षणे वेगसमानकालमेव घटात्मसंयोगोत्पत्तौ बाधकाभावात् अन्यथा प्राचां क्रियामात्रस्यादृष्टवदात्म
संयोगासमवायिकारणत्वनियमस्य व्यभिचारापत्तेरिति। अन्ये तु तदधिकरणावच्छिन्नसंयोगात्तदन्याधिकरणावच्छिन्नसं राम

=उक्तरुपत्वएव=१

४५

योगेप्रतिबंधकः इहानयोः संयोग इति प्रतीतेः संयोगाश्रयतयाधिकरणस्यापि संयोगावच्छेदकत्वात् समानावच्छेदकत्वं
प्रत्यासत्तिः तेन मूलावच्छेदे नैकाधिकरणावच्छिन्नपरस्परसंयोगविशिष्टयोर्दीर्घयोः पटयोः सत्यपि तत्संयोगेनाग्रा
वच्छेदेनाधिकरणांतरे परस्परसंयोगानुपपत्तिः अतएव संयोगजसंयोगेपि देशांतरसंयोगः प्रतिबंधकः। तत्कारण
रूपेतौ वप्रति वध्यप्रतिबंधकभावात्। अप्येवं गृहावच्छेदेनोत्पन्नांगुलीसंयोगवतो दंडादेर्देशांतरसंयोगानंतरं जातस्यां
गुलीसंयोगाधीनहस्तसंयोगस्य गृहावच्छिन्नांगुलीसंयोगेसत्येवोत्पन्नत्वात् व्यभिचारः। एवं गृहावच्छेदेनोत्पन्नारंभकसंयो
गवतोस्तंतुद्वयोरारंभकसंयोगाविरोधिकर्मणा सत्येवारंभकसंयोगे देशांतरेमध्यावच्छेदेनालोकजलादिसंयोगोदया
त् सत्येवपटपटलग्नवस्त्रादेः गृहावच्छेदेनोत्पन्नशरीरादिसंयोगे देशांतरगमनानुकूलकर्मणा देशांतरे शरीरादिसंयोगा
त्रीं वच्छेदे नैव जलालोकादिसंयोगोदयात् व्यभिचारः। न चांगुलीसंयोगारंभकसंयोगशरीरादिसंयोगानां न गृहावच्छिन्नत्वं त
द्विशिष्टस्य दंडतंतुशरीरादेर्देशांतरेपि वृत्तेरिति वाच्यं। तद्विशिष्टस्य देशांतरवृत्तित्वेपि गृहे ऽनयोः संयोग इति प्रतीतेः गृहेणाप्य

गु.टी. वच्छिन्नत्वात् । अन्यथा यत्संयोगविशिष्टस्य दण्डादेर्नाधिकरणवृत्तित्वं तत्संयोगस्य केनाप्यधिकरणेनावच्छिन्नत्वाभा
४६ वादप्रतिबध्यत्वापत्तेरिति चेन्न तदधिकरणावच्छिन्नत्वविशिष्टसंयोगत्वेन प्रतिबंधकत्वात् । अन्यथापि शरीरावच्छेदे
नोत्पन्नांगुलीदण्डादिसंयोगाज्जातावच्छेदेनैव हस्तदण्डसंयोगानुपपत्तिः दण्डहस्तसंयोगोत्पत्त्यनंतरं हस्तसंयोगवतो वदण्डादि
नादेशांतरे विगमनात् तस्यापि शरीरान्यावच्छिन्नत्वात् पटादावुत्तरदेशे सति भूतलाद्यवच्छेदेन गगनादिसंयोगे निष्क्रियजल
तेजोवाय्वादिघटादिसंयोगे च घटादिकर्मणा भूतलाद्यवच्छेदेन घटादिसंयोगानुपपत्तिश्च । एवं कपालादौ सति भूतला
द्वि॰ना॰ द्यवच्छेदेन कपालांतरादिसंयोगे भूतलाद्यवच्छेदारंभकसंयोगावच्छेदकावच्छेदेन जलालोकादिसंयोगानुपपत्तिश्च सं
योगोत्पत्त्यनंतरं तत्संयोगवत एव देशांतरगमनात्तस्यापि तदन्याधिकरणावच्छिन्नत्वादिति चेन्न । तदन्याधिकर
णावच्छिन्नत्वविशिष्टसंयोगत्वेनैव प्रतिबध्यतायामपि वक्तव्यत्वात् न चैवं सति पूर्वदेशसंयोगे तदन्यदेशेनावच्छि
न्नत्वविशिष्टसंयोगोत्पत्तौ जायमानसंयोगस्याप्यनापत्तिः दुर्वारेति वाच्यं । तत्तत्क्रियाव्यक्तेस्तत्तद्देशावच्छिन्नसंयोगव्यक्तौ वे राम ४६

वहेतुतया विशेषसामग्रीविरहाद्देवापादनासंभवादित्याहुः। तदसत्। परस्परसंयुक्तकेशादिरूपनानाधिकरण
वच्छिन्नादेकस्माद्धस्तदंडसंयोगान्नानालोकेनावच्छिन्नस्यैकस्यैव शरीरदंडसंयोगस्योत्पत्त्या व्यभिचारात् केशादि
रूपनानाधिकरणोपधीरंभवैकसंयोगवति कपालादौ तन्नानाधिकरणवृत्तेशावच्छेदेन जलालोकादिकर्मणा जला
लोकादिसंयोगस्य केशादिरूपनानाधिकरणोपरिजलालोकादिप्रतियोगिकसंयोगवति कपालादौ तन्नानाकेशा
वच्छेदेन पवनादिकर्मजनितपवनादिसंयोगस्य चोत्पत्त्या व्यभिचाराच्च न च तदधिकरणावच्छिन्नत्वविशिष्टतन्निष्ठसंयोग
:तदन्याधिकरणावच्छिन्नत्वविशिष्टतदीयकर्मजनितसंयोगं प्रति प्रतिबंधकः समानावच्छेदकत्वं च प्रत्यासत्तिः विशि
ष्टं तदुत्पादनात् स्तिमितवस्त्रादौ सत्यपि जलादिसंयोगे पृष्ठलग्नवस्त्रादौ च सत्यपि शरीरादिसंयोगे कपालादौ
सत्यपि चारंभककपालांतरसंयोगे कर्मणागगनादिसंयोगोदयेपि न क्षतिः। संयोगजसंयोगे चेद्देशांतरसंयोगा
न प्रतिबंधकमिति वाच्यं तथापि भूकंपादिस्थले यत्र स्तंभादिक्रियया पर्वदेशविभागसंयोगनाशौ जनयित्वा पुनस्त

गु.टी. त्रैव पूर्वदेशे प्राचीनसंयोगावच्छेदकावच्छेदेनैव तत्संभवादिसंयोगो जन्यते तत्र पूर्वदेशविभागोत्पत्तिसमय एव उ
४१ दीच्यां तत्संभवादिसंयोगोत्पत्तेर्दुर्वारत्वात्। तत्रोदीच्यां तत्संभवादिसंयोगस्य तदन्यदेशानवच्छिन्नत्वेनाप्रतिबंधकत्वात्। यत्र ना
नाधिकरणे परिस्पंदितकपालादेरधिकरणेन समं पूर्वक्रियया सत्वेऽपि तन्नानाधिकरणावच्छिन्नजलालोकादिप्रतियोगिकै
47 कसंयोगे तन्नानाधिकरणावच्छेदेनैकस्योर्ध्वस्थितपटादिसंयोगस्योत्पादस्तत्र व्यभिचारापत्तेस्तत्र केचित्तु तद्देशावच्छिन्नत्वविशि
ष्टसंयोगत्वेन समानावच्छेदकत्वप्रत्यासत्त्या तद्देशानवच्छिन्नसंयोगे प्रतिबंधकत्वं तेन नानाधिकरणावच्छिन्नैकसंयोग
सत्वेऽपि तन्नानाधिकरणावच्छिन्नसंयोगोत्पत्तावपि न क्षतिः संयोगजसंयोगेऽपि देशांतरसंयोगः प्रतिबंधक इत्याहुः। त
दप्यसत्। यत्रोत्तरसंयोगोत्पत्त्यनंतरं उत्तरदेशसंयुक्तीभूयैव शरादिः पूर्वसंयोगाधिकरणदेशेऽप्यायास्यति तत्र पूर्वसंयोग
स्योत्तरसंयोगं प्रत्यप्रतिबंधकत्वापत्तेः तदुत्तरसंयोगस्योत्तरदेशाधिकरणावच्छिन्नत्ववत् पूर्वदेशाधिकरणेनाप्यवच्छिन्नतया
तद्देशानवच्छिन्नत्वाभावात्। अनवच्छिन्नत्वस्याव्याप्यवृत्ति[illegible]त्वात् तत्र विभागादुत्तरसंयोगनाशानंतरमेव पूर्वदेशाधिकरण राम ४१

गमनकल्पने अनुभवविरोधात् आरंभकसंयोगरूपोत्तरसंयोगस्थले संयोगनाशकल्पनाया असंभवाच्च एवं
वृक्षकंपादिस्थले एवं देशविभागोत्पत्तिसमये उदीच्यसंस्थानादिसंयोगापत्तेर्दुर्वारत्वाच्च। अत्र वस्तुतः अग्रग्राहिवृक्षनितंपार्श्वी नि २
तरभावापन्नानि अमूलदिक्त्वयमानाप्ये तद्दिगवच्छिन्नत्वविशिष्टसंयोगस्तद्दिगवच्छिन्नत्वविशिष्टसंयोगे प्रतिबंधको
वाच्यः सर्वत्रैवावश्यं निष्कलदिगुपाधेः सत्त्वात्तदवच्छिन्नसंयोग एव प्रतिबंधकः प्रतिबध्योपितव्यो न्येषां संयोगनाशानामा
पि समाजाधीनं संनिधानं नचैवं तद्दिगवच्छिन्नत्वविशिष्टसंयोगसत्त्वे तद्दिगवच्छिन्नत्वविशिष्टसंयोगो माजायतां संयो
गसामान्ये तस्यास्तु बाधकाभावादिति वाच्यं तत्तत्कर्मणां तत्तद्देशावच्छिन्नत्वविशिष्टसंयोगं प्रत्येव हेतुतया संयोगसामान्या
पत्तेरशक्यत्वात् नच तत्तत्कर्मणां तत्तद्देशावच्छिन्नत्वविशिष्टसंयोगं प्रत्येव हेतुत्वे तज्जन्यसंयोगस्य देशांतरावच्छिन्नत्व
वि[illegible]शिष्टत्वानुपपत्तिरिति वाच्यं देशांतरावच्छिन्नत्वस्य कार्यतानवच्छेदकत्वे विगुणत्वादिविशिष्टत्ववदुत्पन्नसत्त्वे वा
धकाभावात् धर्ममात्रविशिष्टत्वस्य कारणनियम्यत्वात् अपेतदिक् तदिक्संयुक्तयोर्महापटयोर्मूलावच्छेदेनैव तद्दिगवच्छि

न्न१

गु.टि. त्वविशिष्टसंयोगसत्त्वेप्यग्रावच्छेदेन तद्दिगवच्छिन्नत्वविशिष्टसंयोगोदयाद्व्यभिचारः। न च समानावच्छेदकत्वस्य प्रत्या
४८ सत्तित्वात् न व्यभिचार इति वाच्यं। समानावच्छेदकत्वस्य प्रत्यासत्तित्वे एतद्दिगवच्छिन्नत्वविशिष्टसंयोगस्यावच्छेदकता
संबंधेनैतद्दिग्भागवृत्तितया तद्दिगवच्छिन्नत्वविशिष्टसंयोगावच्छेदके तदभाववत्त्वे न विभागोत्पत्तिसमये सर्वत्रोत्तरसंयो
h8 गापत्तेर्दुर्वारत्वादिति चेन्न।। एतद्दिगवच्छिन्नत्वविशिष्टे तदवयवावच्छिन्नसंयोगत्वावच्छिन्नाभावस्य तद्दिगवच्छिन्नत्वविशिष्टे
तदवयवावच्छिन्नसंयोगे हेतुत्वात् यद्देतादृशसंयोगोत्पत्तिः तदव्यवहितप्राक्क्षणे प्रतियोग्यनधिकरणवृत्तित्वविशि
ष्टकालिकविशेषणतासंबंधेन तादृशसंयोगाभाव इति कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिः एवं च संयोगजसंयोगं
प्रत्यपि देशान्तरसंयोगप्रतिबंधकः प्रतिबध्यतावच्छेदकाक्रान्तत्वादित्याहुः। तदसत् दिग्भेदेनानंतप्रतिबध्यप्रतिबंधक
भावापत्तेः। किं च भक्तपादिस्थले यत्र स्तंभादिक्रियया पूर्वदेशविभागसंयोगनाशौ जनयित्वा पुनस्तस्यैव पूर्वदेशे प्राचीन
संयोगावयवदिगवच्छेदेनैव स्तंभादिसंयोगो जन्यते तत्र पूर्वदेशविभागोत्पत्तिसमय एव तद्दीय स्तंभादिसंयोगोत्पाद राम

पत्तेः। दिग्भेदविरहात्। स्वावच्छिन्नत्वविशिष्टसंयोगस्यापि स्वावच्छिन्नत्वविशिष्टसंयोगप्रतिबंधकत्वे उत्तरदेशे जला
लोकाकाशादिसंयोगसत्त्वेपीतरकर्माधीनसंयोगानुत्पत्तेरिति कृतं पल्लवितेन। ननु स्वोत्तरभाविभावानपेक्षत्व
मित्येवास्तु किमुत्पत्तिनिवेशेनेत्यत आह। स्वोत्तरत्वमिति। स्वध्वंसावच्छिन्नत्वं स्वध्वंसाधिकरणत्वं स्वध्वंसावच्छिन्नकाल
भावीति स्वध्वंसाधिकरणक्षणोत्पन्नत्वपर्यः। अत इति। द्रव्ये अतिव्याप्तिवारणायेति शेषः। उत्पत्तिपर्यंतप्रवेशे
गौरवात् स्वोत्पत्तिपदं स्वाधिकरणकालपरं तया व्याचष्टे। तथा चेति। साधिकरणेति। स्वं लक्ष्यतेनाभिमतं तदधिकरण
कालोत्तरभावी तदधिकरणकालध्वंसाधिकरणक्षणोत्पन्नो यो भावस्तदजन्यत्वपर्यः। अपूर्वः। एतन्मते सूत्रस्यापूर्वः। अ
त्र द्रव्ये अतिव्याप्तिवारणायाजन्यांतं संयोगविशेषणं पूर्वसंयोगनाशमादायासंभववारणाय भावेति कर्ममात्रस्यैवा
व्याप्यत्वादिसंबंधेन स्वाधिकरणीभूतातीतज्ञानादिध्वंसाधिकरणक्षणोत्पन्नद्रव्यादिजन्यसंयोगमात्रजनकत्वादसं
भवस्यादतः कालिकसंबंधेन स्वाधिकरणत्वलाभाय कालपदं स्वाधिकरणकालध्वंसाधिकरणकालोत्पन्नेत्युक्तावप्यसं

गु.शि
४९
५१

संभवः कर्मणोऽपि संयोगजनने स्वाधिकरणकालध्वंसाधिकरणकालो महाकालः वत्सरदिनाद्यात्मकस्थूलका
लोपाधिकः तदुत्पत्तिकभावस्य स्वस्य द्रव्यत्वापेक्षणाद् अतः क्षणत्वपर्याप्तं स्वाधिकरणकालोत्तरक्षणवृत्तीत्युक्तावप्य
संभवः कर्मणोऽपि संयोगजनने तादृशक्षणवृत्तिद्रव्यादेरवेक्षणाद् अतस्तादृशक्षणोत्पन्नेति स्वाधिकरणकालोत्तरक्षणो
त्पन्नभावाजन्यविभागजनकजातीयत्वमात्रे कृते घटाकाशादिविभागजनककपालाकाशादिविभागेऽतिव्याप्तिरिति
स्वजन्यसंयोगानुकूलेति विभागविशेषणं । यत्राद्यो शाखांगुलीसंयोगः शाखायाश्च कर्मस्यैककालः ततः शाखाकर्म
णा शाखांगुलीविभागः ततः शाखांगुलीसंयोगनाशः ततः शाखाया उत्तरदेशसंयोगः तत्र शाखांगुलीसंयोगेऽतिव्या
प्तिः तस्य स्वा[redacted]धिकरणकालोत्तरक्षणोत्पन्नभावाजन्यः संयोगः शाखोत्तरदेशसंयोगस्तदनुकूलो विभागः शा
खांगुलीविभागः तज्जनकत्वाद् अतः स्वजन्येति संयोगविशेषणं शाखोत्तरदेशसंयोगश्च न शाखांगुलीसंयोगजन्यः यदि च
प्रकाशकारनये क्रियापूर्वकालीनस्यैव संयोगस्य क्रियाजन्यो तद्देशसंयोगप्रतिबंधकता या शाखाकर्मसमकालोत्प

राम
४९

न्तूस्य शाखावां गुल्लीसंयोगस्य न शाखोत्तरदेशसंयोगानुकूलविभागजनकत्वं तन्तानुपपत्रकपालक्रियया आरंभकसंयो
गविरोधीकपालद्वयविभागः ततस्तेन विभागेन कपालाकाशविभागः कपालद्वयसंयोगनाशश्च ततः कपालक्रियया
कपालोत्तरदेशसंयोगस्तत्र कपालद्वयविभागेनाकाशसंयोगानुकूलकपालाकाशविभागजनकेऽतिव्याप्तिवारणा
य स्वजन्येति स्वोत्तरवर्तित्वस्य स्वोत्तरोत्पत्तिकत्वस्य चाभिधानेपि तद्दोषतादवस्थ्यं अतः स्वजन्यत्वपर्यंतं स्वजन्यांत
स्य विभागविशेषणत्वेभावपदवैयर्थ्यमतस्तत्संयोगविशेषणं स्वाधिकरणकालोत्तरक्षणभाविभावा जन्यस्वज
न्यसंयोगजनकजातीयत्वमात्रोक्तावपि संयोगजसंयोगमादाय संयोगेऽतिव्याप्तिरतस्तदनुकूलविभागजनकेतितादृश
संयोगविभागोभयजनकत्वोक्तावपि तद्दोषतादवस्थ्यं कारणकारणसंयोगस्यापि तादृशकार्याकार्यसंयोगं कारण
कारणविभागं च प्रतिजनकत्वादतोनुकूलेति अनुकूलत्वं च न जनकत्वं विभागस्यापूर्वसंयोगनाशेनान्यथासिद्धत्वा
संयोगाजनकत्वेनासंभवापत्तेः न वा पूर्ववर्तितामात्रं यत्र हस्तस्य कुड्डोत्तरदेशात्मकघटोत्पत्तिः कपालकर्मजनिततदा

गु.प्र. रंभककपालालोकादिसंयोगश्चैकः कालः ततो द्वितीयक्षणे हस्तपूर्वदेशविभागपद्मालोकादिसंयोगावालोकादेश्च
५० कर्म ततः तृतीयक्षणे हस्तपूर्वदेशसंयोगनाशपद्मालोकादिविभागौ ततो घटहस्तसंयोगपद्मालोकसंयोगनाशौ तत्रोत्तरदेशा
त्मकघटेति व्याप्तेः। न वा जनकजनकत्वं गौरवात्। किंतु असाधारणप्रयोजकत्वं तच्च कारणकारणादिव्यावृत्तान्यथासिद्धिव
50 तुष्टयानिरूपककालत्वातिरिक्तनियतपूर्ववर्तितावच्छेदकधर्मः तावत्त्वं कालत्वातिरिक्ते तु पादनात्पद्मलोकादिविभागस्या
पि कालोपाधितया घटहस्तसंयोगजनकतयानपूर्वोत्पत्तितादवस्थ्यं विभागजनकत्वं च विभागासाधारणकलोपधायकत्वं
त्वं अन्यथा पट्यांगुल्याः क्रियाऽनन्तरदेशात्मकपटे सतिश्चैकः कालः ततः क्रमेणांगुलीपूर्वदेशविभागतत्पूर्वदेशसंयो
गनाशांगुलीपटसंयोगास्ततः पटध्वंसस्तत्रोत्तरदेशात्मकपटेति व्याप्तिः। तस्यापि द्रव्यत्वेन कालत्वेन चांगुलीपूर्वदेशविभा
गस्वरूपयोग्यत्वात् संयोगविभागानुपधायके कर्मण्येव व्याप्तिवारणाय जातीयत्वमिति तादृशजनकवृत्तिसत्तान्यधर्म
समवायित्वं तदर्थः तेन सत्तामादाय द्रव्यादौ नातिव्याप्तिः कर्मणि च कर्मत्वोत्क्षेपणत्वादिकमादाय लक्षणसमन्वयः। न च सा

राम
५०

धिकरणकालोत्तरक्षणाभाविविभागाजन्यत्वजन्यानुकूलजनकजातीयत्वमित्येवास्तु किं संयोगविभागपदाभ्यामिति वाच्यं
।खंडपटजनकेऽवस्थिततन्तुसंयोगेऽतिव्याप्तेः तस्य स्वपश्चाद्भाविविभागाजन्यः स्वजन्यखंडपटः स्वनाशद्वारा तदनुकूलो महा
पटस्तज्जनकत्वात् । ननु तथापि पुनर्भयपदोपादानं व्यर्थमस्यतरोपादानेनैव तद्दोषवारणसंभवादिति चेन्न केचित् । कपाल
समानकालोत्पन्नापेक्षाबुद्ध्यात्मकप्रत्यक्षयोगिज्ञानादिजनितस्य कपालसंयोगध्वंसविषयकसाक्षात्कारस्य विषयविधया कपा
लजन्यस्य कपालसंयोगध्वंसद्वारानुकूलो विभागः कपालपर्वदेशविभागस्तज्जनके कपालेऽतिव्याप्तिवारणाय संयोग
पदं । अग्रपदमस्पन्दस्य कपालोत्तरभाविकपालचक्षुःसंयोगजन्यतयाजन्यत्वेनैव वारणमिति चेत्तथापि पत्रांगुलीशाखावि
भागानन्तरं हस्तशाखयोः संयोगनाशः ततोऽङ्गुलीशाखाविभागसमकालोत्पन्नापेक्षाबुद्ध्यात्मकप्रत्यक्षयोगिज्ञानचक्षुः
सन्निकर्षादिनांगुलीशाखाविभागतत्संयोगनाशयोः समूहालंबनलौकिकचाक्षुषं तत्रांगुलीशाखाविभागेऽतिव्याप्तेः त
स्य तादृशाभावाजन्यं विषयविधया स्वजन्यं समूहालंबनचाक्षुषमेव हस्तशाखासंयोगनाशद्वारा तदनुकूलो हस्तशाखाविभा

विभागः ततो हस्तशाखा२

गु. शि गः तज्जनकत्वादतः संयोगपदं विभागपदं च द्रव्यनाशप्रयोज्यस्यैव कारणद्वयविभागेन विभागो जन्यते न तु संयोगनाशमपे
५१ क्ष्येति मते कपालद्वयसंयोगनाशे विभागजनकेति व्याप्ति वारणाय तस्य तादृशाभावाजन्यः स्वजन्यः कपालोत्तरदेशासंयोगः
कपालकाशविभाग कपालाकाशसंयोगनाशद्वारा तदनुकूलोद्रव्यनाशात्तज्जनकत्वादित्याहुः। तदसत्। अंगुलीशारत्वावि
51 भाग तत्संयोगध्वंसयोः समहत्त्वं वनलौकिकचाक्षुषहस्तशारत्वा विभागस्यापि माने बाधकाभावेन तत्त्वात्तुपपत्स्यता
दृशाभावाजन्यत्वविरहात् विषयविधया हस्तशारत्वा विभागस्यैव तत्रजनकत्वात्। जातीयत्वस्य तद्वृत्तिसत्तान्यधर्म
समवायित्वार्थकतया तस्यासंभवात् संयोगनाशेति व्याप्ति विरहान्वच्च जनकजातीयत्वेन तादृशजनकवृत्तिसत्तान्यध
र्मसमवायित्वमपि तु तादृशोपधायकवृत्तिसाधारणकारणतावच्छेदकधर्मवत्त्वं तच्च नाशेप्यस्ति। येन च संबंधेन जनक
तावच्छेदकता तेनैव तद्वत्त्वं बोध्यं। अतो न संबंधांतरमादाय दोष इति वाच्यं। प्रक्षालनाद्धीति न्यायेन विभागपदसार्थक्या
य तादृशानुसृतकल्पनापत्त्यानन्याप्पत्वात्। अन्ये तु विभागपदानुपादानेप्यवयवशारत्वाया मंगुल्योः संयोगाभावमेकएवयावत्वा

२१
५१

पाणिसंयोगो जनितः ततः एकांगुलीक्रिया विभागादिक्रमेणैकांगुलीसंयोगनाशोंऽगुलीशाखाविभागजः शाखा
पाणिविभागश्चेत्येकः कालः ततः शाखापाणिसंयोगनाशः स्वजन्यविभागस्यैव संयोगनाशात्तथा तुल्यावधिदेका
वच्छिन्नविभागाभावेपि तादृशसंयोगनाशे बाधकाभावात् तत्तत्रैवस्थितांगुलीशाखासंयोगे न पुनः शाखापाणिसंयोग
स्तत्रावस्थितांगुलीशाखासंयोगेऽतिव्याप्तिः तस्य तादृशाभावाजन्यस्वजन्यः उदीच्यपाणिशाखासंयोगः स्वनाशद्वारा तद
नुकूलः प्राचीनपाणिशाखासंयोगस्तज्जनकत्वात् संयोगपदानुपादाने च पतनाख्यक्रियाया आद्यपरमाणावतिव्याप्तिः
परमाणोर्गुरुत्वस्य नित्यतया परमाणोः स्वपश्चाद्देशविभागाजन्यं स्वजन्यं पतनमेव पतनप्रतिबन्धकपूर्वसंयोगनाशद्वा
रा तदनुकूलो विभागः परमाणुपूर्वदेशविभागं तज्जनकत्वात् न च परमाणोर्नित्यत्वाददृष्टमात्रस्यैव परमाणुपश्चा
द्देशविभागे न पतनोपधायकादृष्टस्यापि परमाणुपश्चाद्देशविभागत्वात् पतनेऽतादृशाभावाजन्यत्वमेव नास्तीति वाच्यं कर्मान्त
रभावविनाभावेन दिक्कालोपाधिविधया संयोगजननाद्दसंभववारणाय साधारणजन्यत्वाभावस्यैवाजन्यपदेन विवक्षितत

त्वेनादृशाभावजन्य ३

गु.शि त्वात्। न च तथापि क्रियात्वव्यधिकरणप्रदीपगुणजन्यात्मातत्संयोगासमवायिकारणके इति व्याप्तिबलाद्विभागमात्र
५२ स्यैवादृष्टवदात्मसंयोगजन्यतया परमाणुपतनस्य न परमाणुपक्रियाविभागजन्यत्वमिति वाच्यं। तादृशव्याप्तौ मा
52 नाभावात्। न चैतादृशाभावजन्यत्वावच्छिन्नप्रतियोगिताकोऽभावः अभावकूटस्य गुणत्वहस्तेनापि ज्ञातुमशक्यत्वा
त्। तथा चोत्पत्तिमदभावजन्यत्वत्वमपेक्ष्य परमाणुपक्रियाविभागजन्यत्वत्वस्य गुरुतया अभावप्रतियोगितानवच्छे
दकत्वादजन्यं तदलाप्रसिद्ध्यैव नातिव्याप्तिरिति वाच्यं। गुरोरप्यवच्छेदकत्वस्य स्वहस्तितत्वादित्याहुः। तदसत्। उक्त
स्य तले शाखायामंगुल्योः संयोगाभ्यामंगुलीद्वयावच्छेदेन शाखापाणिसंयोगद्वयमेव जन्यते न त्वेकः। न च तत्र लाघ
वात् संयोग एकमेवोचितमिति वाच्यं। तथापि तत्रावस्थितांगुलीशाखासंयोगेन पुनः शाखापाणिसंयोगांतरस्याभ्युपगमे
न लाघवाभावात्। न च तथापि तत्र संयोगव्यक्तौ भेदमानाभावादिति वाच्यं। तत्र संयोगे कोऽयमस्थितांगुलीसंयोगज
न्य उदीच्यापुनः शाखापाणिसंयोगव्यक्तौ एकोऽस्तु तत्संयोगव्यक्तेर्नाशस्य विशिष्य हेतुत्वावश्यकत्वाद्गौरवापत्तेः। न

राम

५२

च पूर्वसंयोगनाशो नोत्तरसंयोगहेतुः अपि तु सामान्यतः पूर्वसंयोगत्वं तावच्छेदकोत्तरसंयोगहेतुरिति वाच्यं।
पूर्वसंयोगनाशस्योत्तरसंयोगहेतुत्वे संयोगानुकूलस्यैव विभागेऽसंभवापत्तेः केचित्तु संयोगपदं पतनाद्य
क्रियासामान्यपरमन्यथातिव्याप्तिवारणायैव। विभागपदं तु यत्र प्राच्यादिदिगभिमुखं कपालक्रिया तत्कपालसंयु
क्तघटविशेषे नैमित्तिकद्रवत्वोत्पत्तिक्षणे एकः कालः ततः कपालक्रियया कपालद्वयविभागः घटे पश्चिमादि
दिगभिमुखं स्पन्दनं च उत्तरकपालद्वयविभागेन घटस्पन्दनेन च कपालघटविभागः कपालद्वयसंयोगनाशश्च ततो
घटकपालसंयोगनाशः ततः कपालक्रियया घटे तस्मादवच्छेदेन संग्रहाख्यः संयोगः घटस्पन्दनेन चान्यावच्छेदेन घटस्य
देशान्तरसंयोगो जनितः तत्र घटद्रवत्वे तिव्याप्तिः घटे कपालक्रियाजन्यकपालघटसंयोगस्य संग्रहरूपतया
द्रवत्वजन्यत्वेन तस्योत्तरभाविविभागाजन्यः स्वजन्यः संग्रहाख्यकपालघटसंयोगः कपालघटयोः पूर्वसंयोग
नाशद्वारा तदनुकूलं घटस्पन्दनं तज्जनकत्वात्। न च कपालघटसंग्रहस्य स्वपश्चाद्भाविविभागाजन्यत्वमेव नास्ति

गु.दी. द्रवत्वपक्षाञ्छाविनः स्पन्दनस्यापि तज्जनकत्वादिति वाच्यं। कपालघटसंग्रहस्य कपालक्रियाजन्यत्वेन घटस्पंद
५२ नाजन्यत्वात्। स्पंदनस्यान्याभिमुखत्वेन तज्जनकत्वासंभवात्। अभिमुखो वह्निदेशो भयक्रियायामेवोभयकर्मज
संयोगस्वीकारादित्याहुः। नव्यास्तु संयोगानुकूलत्वमत्र न संयोगप्रयोजकत्वं पूर्वसंयोगात्यंताभावस्यैवोत्तरसंयोगज
नकतया पूर्वसंयोगध्वंसस्य तद्धेतुत्वात् तद्द्वाराविभागस्यापि संयोगप्रयोजकत्वासंभवात्। किंतु संयोगानुकूलत्वं स्वना
श्यजननीयसंयोगसहकारित्वं संयोगनाश्यत्वमिति यावत्। तथा चावयवविभागाव्यवहितक्षण एव योऽवयवविवि
भागः तस्य प्रतियोगिविधया नाश्यो विभागः स एव तज्जनकोऽवयवविभाग इति व्याप्तेर्वारणाय संयोगपदं विभाग
पदं चावयवसंयोगाव्यवहितक्षण एव योऽवयवविसंयोगः तस्य प्रतियोगिविधया नाश्यः स एव तज्जनकोऽवयवसंयोगे
ऽतिव्याप्तेर्वारणाय। एवं च कालत्वदिक्त्वज्ञानत्वादिना कार्यमात्रं प्रति जनकत्वे मानाभावाद जन्यत्व कोटावसाधा
रण जन्यत्वप्रवेशे प्रयोजनाभावेऽपि न क्षतिरित्याहुः। तदसत्। पूर्वसंयोगध्वंसस्योत्तरसंयोगाहेतुत्वे भावपदवैय

राम
५३

पर्याप्तेः। ननु यत्र दंडसंयुक्ततंतावुत्तरदेशात्मकपटोत्पत्तिः। दंडे क्रियोत्पत्तिश्चेत्येकः कालः ततो दंडकर्मणा दंडतंतु
विभागः दंडतंतुसंयोगात्पटदंडसंयोगश्चेत्येकः कालः ततः तंतुदंडसंयोगनाश तंतुदंडविभागजन्यपटदंडविभागौ त
तः पटदंडसंयोगनाशः इदानीं तु दंडस्य नोत्तरदेशसंयोगः पटसंयोगस्य प्रतिबंधकस्य पूर्वं सत्वात्। ततस्तेनैव प
टेनोत्तरदेशात्मकेनावच्छेदकांतरे दंडस्य संयोगः तत्र तत्पटे तत्पटमात्राप द्रव्यमात्रे चातिव्याप्तिः तस्य पटस्य तादृश
भावाजन्यः स्वजन्यः संयोगः चरमपटदंडसंयोगः प्रतिबंधकीभूतप्राचीनपटसंयोगनाशद्वारा तदनुकूलो विभागः
पटदंडविभागः तज्जनकत्वात्। एवं यत्र दंडक्रियोत्पत्तिकाले उत्तरदेशात्मकद्रव्योत्पत्तिः ततस्तत्र द्रव्ये द्रव्यांतरं क्रियाधी
नद्रव्यांतराभिघातः दंडपूर्वदेशविभागश्चेत्येकः कालः ततस्तेनाभिघातेन तद्द्रव्ये क्रिया दंडे तदुत्तरसंयोगप्रतिबंध
कद्रव्यांतरसंयोगः दंडपूर्वदेशसंयोगनाशश्चेत्येकः कालः ततस्तद्द्रव्यद्रव्यांतरविभागदंडद्रव्यांतरविभागौ इदा
नीं दंडस्य नोत्तरदेशसंयोगः द्रव्यांतरसंयोगस्य प्रतिबंधकत्वात्। ततस्तद्द्रव्यद्रव्यांतरसंयोगनाशदंडद्रव्यांतरसंयोग

गु.टी नाशो ततो द्रव्यांतरसंयोगावच्छेदकावच्छेदेनैव तद्रव्ये नदंडस्योत्तरसंयोगः तत्र तस्मिन्नुत्तरदेशात्मकद्रव्ये तन्नाय
द्रव्यमात्रे चातिव्याप्तिः तस्य द्रव्यस्य तादृशाभावाजन्यः स्वजन्यसंयोगो दंडस्य तेन सममुत्तरसंयोगः प्रतिबंधकीभूतद्र
५४ व्यांतरसंयोगनाशव्याप्तदनुकूलो द्रव्यांतरतद्रव्ययोर्विभागः तज्जनकत्वात् । किं वा अभिघाततप्रतीवस्पर्शस्य शब्दज
54 नकविभागं प्रत्यपि जनकत्वे यत्र दंडक्रियाजन्योत्तरदेशात्मकद्रव्यनिष्ठस्पर्शोत्पत्तिश्चैत्येकः कालः ततः तस्मिन् द्रव्ये आ
वरकद्रव्यक्रियाधीनोऽभिघातात्मकावरकद्रव्यसंयोगः दंडपूर्वदेशविभागश्चैत्येकः कालः ततः तेनाभिघातेनोत्तर
देशस्य क्रिया दंडे उत्तरदेशसंयोगप्रतिबंधकद्रव्यांतरसंयोगः दंडपूर्वदेशसंयोगनाशश्चैत्येकः कालः ततश्चावर
कद्रव्योत्तरदेशात्मकद्रव्ययोः शब्दजनकविभागः दंडद्रव्यांतरयोर्विभागश्चैत्येकः कालः इदानीं दंडस्योत्तरसंयोगः
द्रव्यांतरसंयोगस्य प्रतिबंधकत्वात् । ततश्चावरकद्रव्योत्तरदेशयोरभिघातात्मकसंयोगनाशः दंडद्रव्यांतरसंयोग
नाशो ततस्तस्मिन्नेवोत्तरदेशे दंडस्याभिघातात्मकोत्तरसंयोगः तत्रोत्तरदेशनिष्ठस्पर्शे तिव्याप्तिस्तस्य स्पर्शस्य तादृश रा

५४

भावाजन्यस्वजन्यसंयोगो दंडस्याभिघातात्मकोऽन्तरदेशसंयोगः प्रतिबंधकीभूतावरकद्रव्याभिघातवारणाय तदनु
कूलो विभागः आवरकद्रव्यान्तरदेशयोः शब्दजनकविभागः तज्जनकत्वादिति। मैवं। स्वपदं च लक्षणे स्वातिकध्वंस
प्रतियोग्यसमवायिकारणकत्वेन संयोगस्य विशेषणीयत्वात्। स्वपदं ध्वंसप्रतियोगिपरं। केचित्तु विभागपदं
नित्यमात्रसमवेतपरं सर्वत्रगगनादिनिष्ठपरमाण्वादिविभागजनककर्मण्यादिकर्मतायैव जातिगर्भलक्षणे सं
गतिरित्याहुः। तत्प्रदायिकास्तु तादृशभावाजन्याः स्वजन्या यावन्तः संयोगास्तदनुकूलत्वं जन्यविभागे विवक्षि स ५
तं तादृशभावाजन्यसंयोगत्वव्यापकस्वजन्यविभागप्रयोज्यताकत्वमिति तु निष्कर्षः। इत्थं च द्रव्ये नातिप्रसंगः जन्य
द्रव्यस्य प्राथमिकसंयोगएव स्वजन्यविभागप्रयोज्यत्वाभावात् नित्यद्रव्यस्य च स्वाधिकरणकालोत्तरभाविभावा
जन्यसंयोगस्यैवाप्रसिद्धेरुत्तरस्पर्शे चोत्तरदेशावच्छावरकद्रव्याभिघातस्य तत्कालीनतन्निष्ठवाय्वाद्यभिघातस्य च
स्वजन्ययावदन्तर्गतस्य स्वजन्यविभागप्रयोज्यत्वाभावान्नातिप्रसंगः। नन्वेवं द्रव्येऽतिव्याप्तिवारकाजन्यान्तविशेषणवैय

गु.दी.
५५
55
र्यं जन्यद्रव्ये प्राथमिकसंयोगस्य स्वजन्यविभागप्रयोज्यत्वाभावादेवातिप्रसंगविरहात्परमाण्वादौ नित्यद्रव्येपि
घटादिक्रियाजन्यप्राथमिकतन्निष्ठघटादिसंयोगस्यैव तज्जन्यविभागप्रयोज्यत्वाभावादतिप्रसंगविरहादिति चेन्नात
◦दनुपादानेऽप्याकाशकालदिगात्मविभुद्रव्येष्वेवातिव्याप्तेः तत्समवेतसंयोगमात्रस्यैव तदीयविभागप्रयोज्य
त्वात् न च तन्निष्ठकारणाकारणसंयोगजन्यप्राथमिकघटादिसंयोगएव तन्निष्ठविभागाप्रयोज्य इति वाच्यं तस्यापि
कारणाकारणादिसंयोगादिद्वारापरंपरातिपरंपरया तत्समवेतविभागप्रयोज्यत्वात् एवं विवक्षणे उत्तरवर्तित्वमा
त्रस्यैव प्रयोज्यत्वरूपतया नित्यद्रव्यमात्रएवातिव्याप्तेश्च । नन्वेवं विभुद्रव्यस्य नित्यद्रव्यस्य वाध्वंसाप्रतियोगिध्वस्त्वोत्तरभा
विभागाजन्यत्वविवक्षयैव तत्कारणसंभवात् स्वाधिकरणकालोत्तरत्वपर्यंतविवक्षावैयर्थ्यमिति वाच्यं ।ऽखंडाभाव
तया वैयर्थ्याभावात् नन्वेवं संयोगविभागोभयपदवैयर्थ्यमिति वाच्यं । संयोगपदानुपादाने संभवापत्तेः कर्मणः स्वजन्य
यावदंतर्गतस्य विभागस्यैव स्वजन्यविभागप्रयोज्यत्वाभावात् । विभागपदानुपादानेव यत्र तंतुत्रयेणैकः पटस्तत्रारब्ध
राम
५५

मादनं तस्मै कस्मिन् तंतान्वारंभकसंयोगनाशकाले ऽंशुपटतंतुद्वये आरंभकसंयोगविरोधिकर्मणी अंशुपटना
श तंतुद्वयाकाशविभागो ततो वास्यतंतुद्वयसंयोगात् खंडपटोत्पत्ति तंतुद्वयनिष्ठारंभकसंयोगातिरिक्त निखिल
संयोगनाशो ततस्तंतुद्वयो तरदेशसंयोगः खंडपट रूपाद्युत्पत्तिर्द्वितीये च न खंडपटनिष्ठसंयोगोत्पत्तिः कारणनिष्ठसंयो
गस्य निष्ठकर्मणो ऽभावात् न च तदानीं वायवादिकर्मणा वायवादिसंयोगे किं वाधकमिति वाच्यं सर्वत्र तदुत्पत्तौ मानाभा
वेन वाधकत्वात् ततस्तंतुद्वयोत्तरदेशसंयोगात् खंडपट तदुत्तरदेशसंयोगः खंडपटपूर्वोत्पन्नशाखादिकर्मणा शाखा
दि खंडपटसंयोगश्चेत्येकः कालः तत्र खंडपटे इति व्याप्तिः तस्य तादृशस्वजन्यसंयोगसामान्यस्ये वस्वजन्यरूपादिव्यो
प्यत्वात् उत्तरवर्तिलमात्रस्य प्रयोज्यत्वरूपत्वात् । प्रयोज्यत्वं नोत्तरवर्तित्वमात्रं तथा सति पत्रांगुलीशाखासंयोगः
शाखायाश्च कर्मेत्येकः कालः तथा शाखाकर्मणा शाखांगुलीविभागो हस्तोत्पत्तिश्चेत्येकः कालः ततो विनश्यद्वस्थांगु
लीशाखासंयोगात् हस्तशाखासंयोगांगुलीशाखासंयोगनाशश्चेत्येकः कालः ततोंगुलीशाखाविभागात् हस्तशाखा

उत्तरदेशस्य च कर्मैत्येकः कालः ततो हस्तशाखासंयोग १

गु.कि. विभागः अंगुल्युत्तरदेशसंयोगैः नाशोंगुल्युत्तरदेशविभागश्चेत्येकः कालः इदानीं तु हस्तोत्तरदेशसंयोगो नोत्पद्य
५६ ते हस्तशाखासंयोगस्य प्रतिबंधकस्य सत्वात् ततोंगुल्युत्तरदेशसंयोगाद्धस्ततदुत्तरदेशसंयोगस्तत्रांगुल्युत्तरदेश
56 संयोगेति व्याख्यावन्तःस्तु जन्यसंयोगमात्रस्यैव तज्जन्यविभागोत्तरवर्तित्वात् किंतु जन्यजन्यादिसाधारणमसाधारण
मधीनत्वमेव प्रयोज्यत्वं असाधारणत्वं तु पदानात्तत्कालत्वेनाधीनतामादाय नैतद्दोषतादवस्थ्यमिति चेन्न संयो
गमात्रजसंयोगं प्रतिपूर्वसंयोगस्य प्रतिबंधकतया गुल्युत्तरदेशविभागोत्पत्तिसमय एव हस्तोत्तरदेशसंयोगोत्पत्तिप्र
तिव्याप्तिविरहात् तस्यैव कालोपस्थ्याद्दोषत्वात् यदि च संयोगजसंयोगं प्रत्यपि पूर्वसंयोगस्य प्रतिबंधकत्वं तदा साधार
णप्रयोज्यतालाभाय विभागपदमित्याहुः। अन्ये वस्तु प्रकाशकारस्य येन क्रियापूर्वकालीनस्यैव संयोगस्य क्रियाजन्यसंयोगप्र
तिबंधकत्वादुक्तस्थले बुद्ध्यादेस्तादृशस्य जन्यसंयोगानुकूलविभागजनकत्वमेव नास्तीति यथाश्रुते विनातिप्रसंगसंभा
वनापीत्याहुरिति संक्षेपः। ननु स्वोत्तरभाव्युत्तरदेशावच्छिन्न संयोगजनके दूषणाव्याप्तिः तज्जन्यसंयोगस्य पश्चाज्ञाव्युत्तरदे

राम
५६

शाजन्यतया तस्य स्वपश्चाद्भाविभावाजन्यस्वजन्यसंयोगाप्रसिद्धेः। एवं यत्रांगुलीशाखयोः संयोगः शाखायां कर्म हस्तो
त्पत्तिश्चेत्येकः कालः ततः शाखाकर्मणा शाखांगुलीविभागो हस्तशाखासंयोगश्च ततोंगुलीशाखासंयोगेति व्या
प्तिः। तस्य तादृशाभावाजन्यसंयोगविभागोभयजनकत्वादित्यत आह। अतइति। यतस्तादृशाभावाजन्यसंयोगविभागो
भयजनकत्वं यथाश्रुतं नार्थः किंतु तादृशाभावाजन्यस्वजन्यसंयोगानुकूलविभागजनकजातीयत्वमेवार्थोऽतइत्य
र्थः। स्वोत्तरभाव्युत्तरदेशनिष्ठसंयोगजनके कर्मण्यपि तादृशाभावाजन्यसंयोगजनककर्मोत्तरमादायैव जातीयत्वग
र्भलक्षणसत्वादिति भावः। यथाश्रुतेपि न तत्राव्याप्तिरित्याह। गगनादिति। पश्चाद्भाव्युत्तरदेशनिष्ठसंयोगजननका
ले गगनादावपि संयोगजननात् गगनादिनिष्ठसंयोगमन्तरेव स्वपश्चाद्भाविभावाजन्यायाः स्वजन्यायाः प्रसिद्धेरिति
भावः। न चापूर्वोपदर्शितेति तत्र तादृशाभावाजन्यसंयोगविभागोभयजनकत्वसत्वेपि न स्वजन्यपाणिशाखासंयोगानुकूल
विभागजनकत्वं अंगुलीशाखाविभागस्य हस्तशाखासंयोगाननुकूलत्वादिति नातिव्याप्तिरिति भावः। एतेन पुनरनु

छेलतो: १

गु.प्रि कूलत्वोपादानप्रयोजनं दर्शितं । ननु तथापि द्रव्ये कथमिति आह क्वचिदिति । तत्र स्वजन्यसंयोगानुकूलविभागजनकत्वस्या
५१ पि सत्त्वादित्यत आह । द्रव्येति । स्वजन्यविभागाधीनमिति । साक्षात् परंपरया वा स्वजन्यविभागप्रयोज्यमित्यर्थः । उ
57 त्तरदेशस्य स्वनिष्ठसंयोगजनने कार्यस्य कार्याकार्यसंयोगजनने च उदीच्यापेक्षानियमाभावादित्युक्तं । क्वचिदवयव
संयोगमिति यत्र कपालकर्मजनितकपालाकाशादिसंयोगात् घटाकाशादिसंयोगस्तत्राकाशादिना कपालसंयोगद्वारा परं
परया स्वजन्यविभागाधीनस्य घटादिसंयोगजनने उदीच्य कपालादिसंयोगस्यापेक्षणादित्यर्थः । क्वचिच्च कर्मेति । कर्मा
धीनसंयोगस्य लक्ष्यमित्यर्थः । तथा च स्वपश्चाद्भावि विभागाजन्यत्वविशेषणेनैव उद्व्यावर्तनमिति भावः । यद्यपि द्रव्यस्य स्व
जन्यविभागाधीनसंयोगजनने पूर्वोदीच्यापेक्षानियमः एवेत्युक्तिरप्रसिद्धस्थले ह्येवोत्तरदेशे व्यभिचारात् तथापि प्रक्ता
श कृतत्वे कर्मणा क्रकालीनसंयोगस्यैव कर्मजन्यसंयोगप्रतिबंधकतया तत्राप्युत्तरसंयोगस्योत्तरदेशजन्यविभा
गाधीनत्वमित्यभिप्रायेणेदं । कूलत्वस्य माविरुद्धकार्यकारित्वं विकल्पप्रकाशं योजयति । अविरुद्धमिति । विरुद्धकार्यमि

राम
५१

= स्वसंयोगविभागौ तज्जन्यनाशकत्वं तयोरेवेति तयोर्विरुद्धत्वं मूलोक्तं १ = प्रकाशोक्तमर्थं तरं त्वविरतं ४

नमित्यर्थः। विरुद्धत्वं स्वजन्यनाशकत्वं। आद्ये एकजातीयेनेति आद्यविकल्पमभिप्रेत्यैकजातीयत्वाद्युक्तमित्य
र्थः। एवं च एकजातीयकार्यकारित्वेन तस्य विरुद्धकार्यान्यकार्यजनकत्वेन त्यर्थः इति भावः। द्रव्यकर्मणोरपि सत्तया
रूपेण समानजातीयत्वाद्व्यभिचारो न संगच्छते इत्यतो विकल्पयोजयति। एकजातीयत्वमिति। साध्यीकृतमेकजाती
यत्वमित्यर्थः। अवांतरैकजातिमत्त्वमिति सत्तान्यरूपवृत्तिजातिमत्त्वं रूपवृत्तिजातिमत्त्वमात्रं वेत्यर्थः। तादृशत्वोपप
त्तेरिति कर्मवृत्तिजातिमत्त्वोपपत्तेरित्यर्थः। प्रथमाभिप्राये तदुभयसंभवादित्याशयमग्रंथासंगतेराह। द्वितीयमिति। दू
षयति प्रकारांतरेण दूषयति। पौनरुक्त्यमाशंक्याह। प्रागिति। कर्मसाधारणीतीति पाठः संस्कारस्य वेगस्य द्रव्य
कर्मसाधारणीति पाठस्तु प्रामादिकः। जनकता सामान्यस्य ध्वंसादिकार्यमादायैवोपपत्तेः संस्कारपर्यंतानुधाव
नस्य संदर्भविरुद्धत्वापत्तेः। तादृशमिति। अनुगतकार्यतावच्छेदकावच्छिन्नमित्यर्थः। जातिरूपमिति। बाधकाभावा
दितिशेषः। ननु गुणजन्यानि संवीत्ति कार्याणि द्रव्यकर्मादिजन्यत्वेनानुगमप्यतत्कारणतावच्छेदकतया गुणत्वं जातिः

गु.शि ५८ 58

कल्पनीयापद्यासंयोगविभागोभयसमवाय्यसमवायिकारणस्यान्यसत्तावद्वृत्तिकारणतात्वे न सर्वाणि गुणनिष्ठका-
रणत्वाननुगमय्य तदवच्छेदकत्वेन गुणजातिः साधनीयेत्यत आह। कार्यतानवच्छेदकेनापीति। तज्जनकत्वानापि
ति। अवच्छेदकत्वेनेत्यग्रेतनेनान्वयः। अनंतेति। घटपटान्यतरत्वेन घटपटानुगमय्य घटसमवायिकारणत्व घटसम-
वायिकारणत्वान्यतरत्वेन तदुभयसमवायिकारणत्वेऽननुगमय्य वा कपालत्वतंतुत्वादिसाधारणजातिसिद्धेरपिदुर्वारत्वा-
दितिभावः। प्रमाणसत्त्वे नंत जातिसिद्धिरपि न दोषायेत्यत आह। मानाभावश्चेति। ननु रूपरसादिनिष्ठद्रव्यजन्य-
तायाश्च अवच्छेदकत्वेन गुणत्वजातिसिद्धिः रूपत्वरसत्वादेस्त दवच्छेदकत्वेऽनंतकार्यकारणभावापत्तेः। न च गुण-
त्वस्य नित्यवृत्तितया कथं तदवच्छेदकत्वं तस्यानित्यमात्रवृत्तित्वाभ्युपगमे च रूपत्वादिना सांकर्यमिति वाच्यं नि-
त्यवृत्तित्वेपि कार्यतावच्छेदकत्वे बाधकाभावात् जन्यगुणत्वस्य कार्यतावच्छेदकत्वेपि कार्यतावच्छेदकघटकतया गुणत्व-
सिद्धेरप्रत्यूहत्वाच्च न च जन्यसमवेतत्वं समवेतत्वं वा तदवच्छेदकमिति वाच्यं समवायित्वविशिष्टसमवायापेक्षया गु- राम ५८

=इदमालिगोरवप्रकाशार्थं=२

ण त्वस्य लघुत्वादिति चेन्न। लाघवाद्द्रव्यकर्मसाधारणस्य जन्यसत्त्वस्य सत्त्वस्य वा तदवच्छेदकत्वात्। गुणत्वमपेक्ष्य ला
घवाद्द्रव्यतत्साधारणसत्त्वे जातेरेव तदवच्छेदकतया सिद्धेरुचितत्वात्। ध्वंसजनकतावच्छेदकतया सत्ताजाते
रावश्यकत्वाच्चेति भावः। शक्तिग्राहकप्रमाणेनैव जातिसिद्धिः। किं वा शक्तिग्रहे तत्तदवच्छेदकतया तत्तत्कल्पनं। प्राचीनश
ब्दानामिति बोधकतायाः इति बपध्वंसतस्य अनुपपत्तेरित्यनेनान्वयः। तत्र तत्तद्धर्मविशिष्टार्थे वृत्तिः शक्तिलक्षण
न्यतद्रूपा शक्तिः सिध्यतीति तत्तद्धर्मविशिष्टशक्तिः सिध्यतीत्यर्थः। लाघवादिति शेषः। गुणत्वमिति अतएव तद्वि
शिष्टबोधकत्वमपि न प्रतीतमित्यर्थः। ननु रूपरसादिबोधकतान्यथानुपपत्त्योन्नयमेन रूपरसादिषु सिद्धायाः श
क्तेरवच्छेदकतया गुणत्वजातिः सेत्स्यतीति द्वितीयमाशंक्याह। प्रकारान्तरेणेति। धर्मान्तरप्रकारेणेत्यर्थः। प्र
माणाः निष्क्रियतया विभ्वादीति। अत्र परदेशावच्छेदकत्वेन सिद्धजात्यासां कर्मापत्त्या विनिगमनाविरहाद्भूतत्वं
विभुत्वं च नोभयमेव जातिरित्यस्वरसादाह दीपादीनां तेन चापरत्वादेरपि दिपदवारिग्रहः। अत्रैवाप्रतेः संभवादाह

गु.टी. एवमिति। चंद्रादाविति जातयः कल्प्येरन्निति प्रान्तेनान्वयः। न चैतेजस्त्वपृथिवीत्वाभ्यां सांकर्यात्तन्न चंद्रादावेकजा
५९ तिसिद्धिरिति वाच्यं। चांद्रशरीरस्यापि पार्थिवत्वात् चांद्रशरीरस्य तैजसत्वे चेंद्रशरीरस्यापि तैजसत्वात्तदुभय
59 साधारण्येन जातिसिद्धेर्दुर्वारत्वाच्चेति भावः। शंकते तथापीति। चंद्रादिसकलशक्यसाधारण्येकजातेः शक्य
तावच्छेदकत्वे सतीत्यर्थः। प्रतीतिर्न स्यात् हरिपदात् प्रतीतिर्न स्यात्। शक्यतावच्छेदकप्रकारेणैव शाब्दोपस्थितिनि
यमादिति भावः। इहापीति। रूपादिचतुर्विंशतिवृत्तिगुणपदशक्यतावच्छेदकमनभ्युपगच्छतो गुणपदात् रूपत्वादि
नैव प्रसयोपगमादिति भावः। ननु गुणपदात् रूपत्वादिना स्वारसिकप्रतीतिर्विवादग्रस्ता हरिपदाच्चंद्रत्वादिना स्वार
सिकप्रतीतिः सर्वानुभवसिद्धा अन्यथा शक्यतावच्छेदकव्यवस्थैव न स्यात् लघुलक्ष्यतावच्छेदकमादाय विवादस्य सर्व
त्रासंभवादत आह। अपि चेति। गुणव्यवहारः गुणपदजन्यशाब्दप्रतीतिः। बलादाविति। बलमस्यस्येमध्यास्यित
द्रव्यविशेषः प्रकृष्टमहत्त्वशालीप्राणी बलमित्यपि कश्चित्। अश्वादिपदात् तुरंगादिप्रकृष्टगतिपरिग्रहः। तथा चन्य

रणपदेनानार्थमेवेत्यत आह। अयसंक्रान्त इति तथा च परत्वादिसाधारणेन तज्जातिसिद्धिरिति भावः यद्यपीति कारण
न वृत्तित्वात् गुणत्व स्वरूपं पराकमत्ता वच्छेदकत्वमिति भावः। ननु बलादत्रपि न स्वारसिक प्रतीतिः अस्तु वा गु
णत्वमेव कारणतासामान्यमेव निमित्त कारणत्वं निमित्तकारणत्वपदार्थः न तु तदतिरिक्तं यत्किंचित्कारणत्वमि
त्यर्थः। तथा च तदतिरिक्तकारणत्वपदेन समवायिकारणत्वासमवायिकारणत्वयोरेव लब्धत्वात् प्रथमकल्पेन
वैनरूप्यमिति भावः। तयोः समवायिकारणत्वासमवायिकारणत्वयोः। अन्यतरेति विरोधित्वस्य सामानाधिकरण्यरू
पत्वादिति भावः। कारणतान्तरसाधारणेति कारणतान्तरवृत्तिधर्मेणानुगतस्य कारणत्वस्येत्यर्थः। अन्यथा असम
वायित्वस्यापि विवक्षणे संयोगविभागौ द्रव्यगुणेति ज्ञानादृष्टादेस्तदुभयनिमित्तकारणत्वात् गुणं तत्साधारण्यं
वृत्तं कथं स्यादिति भावः। ननु विभागपूर्वकत्वं यदि सामान्यतो विभागोत्तरोत्पत्तिकत्वं विभागाधिकरणक्षणध्वंसा
धिकरणक्षणोत्पत्तिकत्वमिति यावत् तदा संयोगमात्रस्यैव क्वचिद्विभागोत्तरोत्पन्नत्वात् संयोगजनकसंयोगेऽ
व्याप्तिः। अथ स्वसमानाधिकरणविभागोत्तरोत्पत्तिकत्वं तदापि कपालाकाशविभागाधीनकपालाकाशसंयोगजन्य

योगो हस्तपूर्वदेशसंयोगनाशश्चानन्तरमङ्गुल्युत्तरदेशसंयोगाद्धस्तोत्तरदेशसंयोगस्तत्राङ्गुल्युत्तरदेशसं ५
गु.टी. स्य घटाकाशसंयोगस्यापि तथात्वात्तज्जनके कपालाकाशसंयोगेऽव्याप्तिः। एतेन विभागप्रयोज्यत्वं तदित्यपि प
६० रास्तं। अत्रैव घटाकाशसंयोगस्यापि कपालाकाशसंयोगद्वारा कपालाकाशविभागप्रयोज्यत्वात्। न च विभागप्रयोज्य
60 त्वं विभागजन्यसंयोगनाशजन्यत्वमतो नोक्तदोष इति वाच्यं। संयोगजसंयोगं प्रत्यपि देशान्तरसंयोगस्य प्रतिबन्धकत्व
नये यत्र पूर्वदेशसंयुक्ताङ्गुल्यां क्रियाहस्तोऽपि तिष्ठत्येकः कालः ततोऽङ्गुलीपूर्वदेशविभागो हस्तपूर्वदेशसंयोगश्च ततोऽङ्गु
लीपूर्वदेशसंयोगनाशो हस्तपूर्वदेशविभागश्च ततोऽङ्गुल्युत्तरदेशसंयोगेऽव्याप्तिः। एतेन विभागनाशकत्वं विभागप्र
योज्यत्वमित्यपि निरस्तं। अत्रोत्तरदेशसंयोगस्यापि हस्तपूर्वदेशविभागनाशकत्वात् संयोगजसंयोगं प्रति देशान्तर
संयोगस्याप्रतिबन्धकत्वनये तु यत्र शाखाङ्गुल्योः संयोगाभावे एव शाखापाणिसंयोगो जनितः ततः एकाङ्गुलीक्रिया
विभागादिक्रमेणैकाङ्गुलीसंयोगनाशोऽङ्गुलीशाखाविभागजशाखापाणिविभागश्चेत्येकः कालः ततः शाखापाणि
संयोगनाशः ततोऽवस्थिताङ्गुलीशाखासंयोगेन पुनः शाखापाणिसंयोगस्तत्रावस्थिताङ्गुलीशाखासंयोगेऽव्याप्तिः संयो
राम
६०

गजसंयोगे देशान्तरसंयोगस्याप्रतिबन्धकत्वेपि तदुभयसमवेतसंयोगं प्रति समानावच्छेदकत्वप्रसक्तत्वात्तदुभयसमवे
तसंयोगस्यावश्यं प्रतिबन्धकत्वात् अन्यथा शाखापाणिसंयोगसत्त्वएवावस्थितशाखांगुलीसंयोगेन पुनः शाखापाणि
संयोगोत्पत्त्यापत्तेः कपालाकाशसंयोगाद्घटाकाशसंयोगध्वंसोत्पत्त्यापत्तेश्च न चात्र शाखापाण्यंगुल्योः संयोगाभ्यामंगु
लीद्वयावच्छेदेन शाखापाणिसंयोगद्वयमेव जन्यते न त्वेक इति नायं दोष इति वाच्यं । तथापि जन्यताद्यपादिप्रवेशेन गौरवा
त् एतेन स्वासमवायिकारणाधीनविभागप्रयोज्यत्वं विभागपूर्वकत्वमित्यपि निरस्तं गौरवात् तत्त्वलाननुगमाच्चेत्यतो व्याचष्टे
यज्जातीय इति यादृशजातेराश्रयस्त्वर्थः । विभागपूर्वकः स्वसमवायिवृत्तिविभागप्रयोज्यः यत्कर्म तथा स्वतत्त्वगर्भतया
वाननुगमतादवस्थ्यादाह तेनेति । विनापि विभागमिति विनापि स्वसमवायिवृत्तिविभागमित्यर्थः क्वचिदिति यत्रांगुली
शाखासंयोगोत्पत्तिकाले तदुत्तरकाले वा हस्तोत्पत्तिः ततोंगुलीशाखासंयोगाद्धस्तशाखासंयोगस्तत्रेत्यर्थः । यद्यपि
यत्र कपालक्रियया कपालाकाशविभागः कपालवेगोघध्वंसपुनरुत्पद्यते तदनन्तरं कपालाकाशसंयोगनाशः कपालवे

गात् घटे वेगस्य युगपदुत्पत्तेस्तत्तावन्ततो घटाकाशसंयोगोत्पादे विनश्यत्तोऽसमवायिकारणत्वाभावात् अपि वे
गात् घटे कर्म ततस्तेनैव कर्मणा विभागं घटेतरदेशसंयोगस्तत्र कर्मजन्यसंयोगस्यापि न विभागपूर्वकत्वात् नापि
प्रकृते समवायिकारणस्य कार्यसहभावे नैव हि व्याप्तिमानाभावात् द्वितीयक्षणे वेगसमकालमेव घटाकाशसंयोगोत्पत्तौ बाधका
भावात् तत्राप्यवश्यं विभागापेक्षेति भावः। ननु असाधारणकारणत्वं तादृशसंयोगवृत्तिकार्यत्वानवच्छिन्नकार्यताप्रतियो
गिककारणताश्रयत्वं तथा चाभिघातादिसंयोगस्य जनके स्पर्शवेगादौ तदभावादसत्त्वाद व्याप्तिरत आह। असाधारणेति
। ननु असाधारणकारणत्वपदेन कर्मतादृशकारणताद्वयलाभः स्यात् अत आह। निमित्तेति। तथा च असाधारणपदमदृष्ट
वृत्तिकारणतानिष्ठकारणताविभाजकोपाध्यवच्छिन्नान्यपरमिति भावः। नन्वेवमपि सामान्यादावपि व्याप्तिरत आह। त
था चेति। तादृशविजातीयेति। कर्मजन्यतावच्छेदकवैजात्याश्रयसंयोगे सर्पः। अत्र स्वत्वं तेन जात्यादिनिरासः। स्वत्वादिव
ति वैजात्यविशेषस्यापि कर्मविशेषजन्यतावच्छेदकत्वात् मानाभावात्मनःसंयोगेऽव्याप्तिरतः संयोगनिष्ठकर्मजन्यतावच्छेद

कजातिमत्त्वाभावाय संयोगपदं समवायिकारणत्वमात्रोपादाने कर्मण्यतिव्याप्तिः असमवायिकारणत्वमात्रोपादाने द्रव्येऽति
व्याप्तिरत उभयोपादानं कारणताद्वयं च स्वरूपयोग्यत्वं तेन निष्क्रिये विनष्टद्रव्ये अजनितसंयोगे च कर्मणि नातिव्या
प्तिः एतच्च चिरसंयोगानभ्युपगमपक्षे तदभ्युपगमे तु कर्ममात्रजन्यतावच्छेदकसंयोगवृत्तिजातिविशेषणे वाच्यं प्रवेशनी
चिर ४ यः इतरथा संयोगस्यापि कर्मजन्यसंयोगासमवायिकारणत्वादव्याप्त्यापत्तिरिति ध्येयं। मिश्रमतं निराकरोति। ताद
शेति। द्रव्यस्येति। एवकारेण तादृशजात्यवच्छिन्नव्यवच्छेदः तथा च द्रव्येऽतिव्याप्तिरिति भावः। पदार्थत्वावान्तरेत्यादेर्यथाश्रु
तशब्दार्थत्वाभावादाह। फलितार्थमिति। मूले गुणरूपेणेत्यस्य गुणत्वेनेत्यर्थे गुणत्ववत्त्वस्यैवावारकत्वाद्विशेषणवैय
र्थ्यमित्यतो गुणपदस्य लक्षणयामलकारणौ तात्पर्यविषयीभूततोयोर्थस्तमाह त्वर्थः। सामान्यस्यापि सकलद्रव्यवृत्ति
त्वात्तज्जातिव्याप्तिवारणायावधारणार्थकं मात्रपदं दर्शयति। द्रव्यमात्रेति। इत्थं च द्रव्यत्वसमव्यापकतावच्छेदकपदार्थ
विभाजकोपाधिमत्त्वं समुदितार्थः सत्तावारणाय पदार्थविभाजकेति अवच्छेदकत्वमुपाधिमत्त्वं च विभाजकतानियामकसं

गु.टी.
६२

बंधेन विवक्षितं तथा च स्वरूपसंबंधेन सामान्यत्वस्यापि व्यापकतावच्छेदकत्वात् तदादाय सामान्येति व्याप्तिवारणाय
व्यापकत्वमात्रं विहाय समव्यापकत्वप्रवेश इति भावः। समवायसंबंधेनावच्छेदकत्वोपाधिमत्त्वलाभाय समव्यापक
पदं पदार्थविभाजकत्वप्रवेशश्च सत्तानिरासः इति केचित्। तन्न गुणानां सकलद्रव्यवृत्तित्वाभावे साध्ये एकैकद्रव्यवृत्ति
त्वं हेतुकृतं तत्त्वं एकमात्रद्रव्यवृत्तित्वं द्रव्यद्वयावृत्तित्वमिति यावत् तथा च द्वित्वादौ भागासिद्धिरित्यतो व्याचष्टे। भिन्नका
लीनेति। स्वानधिकरणक्षणवृत्तीत्यर्थः। द्रव्यपदं समवायेन वृत्तिलाभाय द्रव्यपदं च संपातायातं। ननु द्रव्यत्वसमव्यापक
तावच्छेदकपदार्थविभाजकोपाधिमत्त्वस्य पूर्वोक्तफलितार्थस्य कथं परित्यागः स्यात् तत्राह। द्रव्यत्वेति। मूलस्वरस
सिद्धं मूलकृतः तात्पर्यविषयीभूतं पूर्वोक्तमर्थं गौरवात्। व्यापकताद्वयप्रवेशे गौरवात्। इदमुपलक्षणं समवाय
संबंधेन व्यापकतावच्छेदकत्वविवक्षयैव सामान्यत्ववारणे संभवे समव्यापकत्वपर्यंतप्रवेशस्य निष्फलत्वाच्च। आ
हेति। स्वातंत्र्येण द्रव्याश्रितत्वस्यार्थमाहेत्यर्थः। ननु समवायसंबंधेन द्रव्यस्यापि द्रव्यव्यापकतया द्रव्यत्वमादाय द्रव्येति

राम
६२

व्याप्तिरित्यत आह। द्रव्यत्वपदं द्रव्यत्वत्वपरमिति। इत्थं च द्रव्यत्वस्य व्याप्यत्वलाभान्न द्रव्येति व्याप्तिरिति भावः। लक्षण-
पतेरयाह। तादात्म्येनेति। सत्ताया अविसत्त्वा साक्षाद्व्याप्यत्वात् तद्वारणाय साक्षाद्व्याप्यपदस्यान्यत्र वृत्तिपरत्वे गौरवादाह।
सत्तान्येति। कालिकसंबन्धेन कर्मत्वादेरपि विभुसमवेतत्वाभावादेव तत्साध्यकानि व्याप्तिविरहादित्यत आह। वृत्तित्वात् तदा-
दायत्वाति व्याप्तिरत आह। वृत्तिः समवाय इति। नन्वेवं जातिपदं व्यर्थं अन्यतरत्वादेर्विभुसमवेतत्वाभावादेव तत्सादाया-
तिव्याप्तिविरहादित्यत आह। समवायेनेति। अन्यथा कालिकादिसंबन्धेन तादृशधर्मवत्त्वमादाय द्रव्यकर्मादावतिव्याप्तिः
स्यादिति भावः। प्रकाशकृतां द्रव्यलक्षणपदं द्रव्यत्वपरतया व्याख्यातं तच्च न युक्तं व्यावर्तकधर्ममात्रवचनस्य लक्षणप-
दस्य विशेषपरत्वे वीजाभावात् द्रव्यत्वाभावव्याप्यतया निष्क्रियत्वागुणवत्त्वयोरभिधानमिति मन्तव्यम् रसासिद्धत्वाच्चेत्य-
तो व्याचष्टे। मूल इति। व्याप्यव्यापकभावापन्नत्वात् साक्षात्संभवात् तन्निराकरोति। द्रव्यत्वस्येति। गुणत्वव्याप्यत्वे गुणत्वसा-
क्षाद्व्याप्यत्वे तेन नीलत्वतद्व्याप्यादौ न व्यभिचारः। एवं द्रव्यत्वव्याप्यत्वे द्रव्यत्वसाक्षाद्व्याप्यत्वे तेन घटत्वादौ न व्यभिचारः। प्र-

गु॰टी॰
६३
63

तत्त्वं च न जातिरित्यभिप्रायः। पूर्वपूर्वनिवृत्तिसंभवेनेति। आश्रयनाशं तथा पूर्वपूर्वगुणनाशस्यैव स्वस्वप्रतियोगिसम
वेतोत्तरोत्तरगुणनाशहेतुत्वेनोत्तरोत्तरगुणनाशस्य पूर्वपूर्वगुणनाशहेतुकत्वादिति भावः। कतिपयात्मेति। कतिपयेत्या
त्मविशेषगुणं गुणसमवेतगुणसत्त्वेप्यात्मसमवेतगुणनाशसंभवादिति भावः। कार्यधारानुवृत्ताविति महाप्रलयेपि गु
णसमवेतगुणात्मक कार्यत्वतिधारानुवृत्ताविति त्वर्थः। पूर्वपूर्वगुणोत्पत्त्यनंतरमेव तत्तत्समवेतोत्तरोत्तरगुणोत्पत्तिसंभवे
न महाप्रलयेप्युत्पत्त्यविच्छेदात् द्रव्यत्वेन सांकर्य्याभिया गुणसमवेतगुणानामेव कार्यत्वतिधाराया अनंतत्वाभ्युपगमा
दिति भावः। ननु सकलात्मनिष्ठादृष्टोद्बोधद्वयादृष्टानाशवदृष्टस्वीकारादुत्तरोत्तरा तस्मादेव कार्य्यगुणधारा भविष्यतीत्याशं
कानिरासायाह। आत्मैकगुणेति। अदृष्टस्यात्मसमवेतत्वनियमादिति भावः। ननु गुणेषु गुणस्य नित्यत्वे जातित्वापत्त्येतत्सं
गतं नित्यत्वस्य जातित्वाव्याप्यत्वात्। न च गुणसमवेतत्वे सति नित्यत्वं जातित्वव्याप्यमिति वाच्यं। तर्हि गुणसमवेतत्वमात्र
स्य जातित्वव्याप्यतया नित्यत्वपर्यंताभिधानस्य व्यर्थत्वादित्यतो जन्यपदं पूरयति। जन्यगुणेष्विति। जन्यगुणेषु समवेतस्य राम
६३

नित्यत्वएव कुतो जातित्वं तदाह। जन्यसमवेतेति। ननु समानदेशत्वं द्रव्यांतरसमवायिसमवेतत्वं तच्च नष्टजन्यत्वाभावसाध
कं महाघटादिसमानाधिकरणखंडघटादौ व्यभिचारादित्यत आह। भूतइति। स्वसमानकालीनत्वं च कालिकसंबंधेन
स्ववृत्तित्वं अधिकस्य व्यर्थत्वात् तस्यापि स्वसमानदेशत्वान्मूर्त्तिमात्रे व्यभिचारवारणायांतरपदं स्वभिन्नार्थकं नत्वे
तत्पटसमानदेशं नस्यादित्यस्यैव सम्यक्त्वेनापाद्य सततंताविति व्यर्थमित्यत आह। एतत्तंतावितीति। तथात्वलाभाय
समानदेशत्वलाभाय तथाचैतत्पटसमवायिसमवेतं नस्यादित्येवापाद्यमिति भावः। समवायसंबंधेन समानदेशत्वला
भस्य प्रयोजनं स्फुटयति। तेनेति। तत्समानदेशेपटसमानदेशे विरलद्रव्यान्यत्वे सति मूर्त्तत्वस्यापादकत्वेपि तेजसि व्यभि
चारवारणसंभवादाह। तंतौ चेति। ननु तथाप्यापाद्ये एतदिति पदविशेषणं व्यर्थमित्यत आह। एतदितीति। भेदद्योतना
य स्वभिन्नत्वलाभाय अन्यथा स्वस्यापि स्वसमानदेशत्वात् तत्पटएव व्यभिचारापत्तेरिति भावः। एकदेति। स्वाधिकरणक्षण
वच्छेदेनेत्यर्थः। परकीयं आपाद्ये परकीयं अन्यथा महापटसमानाधिकरणखंडपटादौ व्यभिचारापत्तेरिति भावः। इत्थंच

स्वाधिकरणक्षणावच्छेदेन स्वभिन्नपरसमवायिसमवेतत्वं न स्यादित्यापाद्यशरीरमिति द्रष्टव्यं। ननु निष्क्रियत्वं यद्यपीति
प्रकाशो संगतः मूलकारमते निष्क्रियत्वे साधर्म्यत्वाभावेनातिव्याप्तिरदोषत्वादित्यतः स्वातंत्र्येन भाष्यव्याख्यानपरतया प्र
काशं संगमयति। स्वातंत्र्येणेति। साधर्म्यपरतयेति शेषः। मूलानुपायित्वे निष्क्रियत्वस्य साधर्म्यतायामभिप्रेतत्वे इत्य
र्थः। विभुनीवेति। साधर्म्यतायामभिप्रेतत्वे तु निष्क्रियविनष्टपदं विभूनामप्युपलक्षकमिति भावः। यथाश्रुतं प्रकाशोक्तम
विविभ्वादावतिप्रसक्तमित्यतो व्याचष्टे। क्रियेति। क्रियासमवायिकारणतावच्छेदकं मूर्तत्वं तदभाववानाकाशादिस्तद्वृत्तिः
शब्दादिस्तद्वृत्तिसज्जात्यधर्मो गुणत्वं तत्समवायित्वं निखिलेष्वेव गुणेष्विति लक्षणसमन्वयः। द्वितीयवृत्तिपददानेद्रव्य
त्वकर्मत्वमादाय द्रव्ये कर्मणि चातिव्याप्तिरतस्तदुपादानं सत्तामादायातिव्याप्तिवारणाय सत्तान्येति। तादृशधर्मस्य गुण
त्वस्य कालिकसंबंधेन कालेपि सत्वात् कालेतिव्याप्तिवारणाय समवायित्वमिति। ननु निष्क्रियवृत्तिवृत्तीत्येवास्तु किं
समवायिकारणतावच्छेदकेत्यनेनेत्यत आह। निष्क्रियविनष्टावयवकेति। निष्क्रियविनष्टावयवसमवेतत्यर्थः। द्रव्यत्वादीत्या

दिपदं तत्पृथिवीत्वघटत्वादिपरिग्रहः। अवच्छेदकेतीति। समवायिकारणतावच्छेदकेतीत्यर्थः। तत्र जन्यत्वावच्छिन्नं प्रतिद्र-
व्यत्वेन समवायिकारणतया विभुनो विक्रियासमवायिकारणतावच्छेदकान्यत्वाभावात् कथं तदादायलक्षणं संभवतीति
वाच्यं। क्रियासमवायिकारणत्वपदेन क्रियात्वावच्छिन्नकार्यताप्रतियोगिककारणत्वस्य विवक्षितत्वात्। समवायिपदं चतद्
घटकारणतालाभायैवेति भावः। साधर्म्यं त्वस्यमलकारानभिप्रेतत्वात्तदपरस्यति। भाष्ये कृतेति। अगुणवत्वमपि साधर्म्यपरतया
स्वयं व्याचष्टे। एवमिति। द्रव्यत्वसत्तादिमादायद्रव्यैतिव्याप्तिवारणाय अवृत्तं तं कर्मत्वादिमादाय कर्मण्यतिव्याप्तिवारणायनि
त्यवृत्तीति नित्यसमवेतापर्यन्तं तेन कर्मत्वस्यापि देशिकविशेषणतया परमाण्वादौ कालिकविशेषणतया महाकाले वृत्ता
वपि कर्मणि चातिव्याप्तिर्नावस्यं कालादिव्यावर्तनाय समवायित्वमिति। गुणस्याभावोऽगुणमित्यव्ययीभावसमासं संग्रह
यव्याचष्टे। नञ्समासादितितथा च नञ्समासत्वेन रूपेण प्रकाशाकृता ततत्पुरुषाव्ययीभावावुभावेव निराकृतौ अन्यपदान
ञ्तत्पुरुषान्तु पोर्पित्वेपि अव्ययीभावान्नतुपकृतोनकृतहत्याक्षेपापरिहारादिति भावः। इत्थं चाग्रेपि कर्मधारयपदं बहुव्रीह्यु

गु.टी. तिरिक्तपरमिति ध्येयं। नन्वत्रावयवित्वं न द्रव्यत्वमात्रं कार्यसादित्वस्य वैयर्थ्यापत्तेः। नापि समवेतद्रव्यत्वं अत्र यदपाद्यं
६५ तस्यैव द्वितीयापत्तावापादकत्वेन तत्रापादके व्यर्थविशेषणतापत्तिः द्रव्यत्वमात्रस्यैव तत्र गमकत्वसंभवादित्यतो व्या
चष्टे अवयवित्वमिति। द्वितीयापत्तौ द्रव्यत्वादौ व्यभिचारवारणाय मात्रपदं न च प्रकृते समवेतत्वमात्रस्यैवापाद्यत्वसंभ
65 वेन मात्रांतवैयर्थ्यमिति वाच्यं। आपाद्ये व्यर्थविशेषणताया अदोषत्वादुत्तरापत्तौ व्यभिचारवारणस्यैव तदुपादान
प्रयोजनत्वादिति भावः। न्याय इति। लाघवादिति भावः। प्रकाशे समवायिकारणताविरहो द्रव्यत्वाभावसाधकोऽनु
साधर्म्यं कर्मण्यपीति व्याप्तेरित्युक्तमतः कर्मण्यावृत्ति व्याप्तिमुद्धृत्य साधर्म्यपरतयैव व्याख्यातं तदेव व्याचष्टे। समवायीति। अ
त्र द्रव्यत्वसत्तान्यतरद्व्यकर्मणोरिति व्याप्तिवारणायावृत्त्यंतं समवायीकारणसमवेतत्वं तदर्थः। अन्यथा गुणत्वा
देरपि कालिकदैशिकविशेषणताभ्यां समवायिकारणद्रव्यवृत्तित्वात्संभवापत्तेः कर्मत्ववारणाय नित्यवृत्तीति
नित्यसमवेतार्थकं तेन कर्मत्वस्यापि कालिकविशेषणतया महाकाले दैशिकविशेषणतया परमाण्वादौ वृत्तावपि

राम
६५

नव्याप्तिः जातिपदं समवायेन तद्वत्ताभावाय अन्यथा कालिकविशेषणतया तादृशगुणत्ववत्तया कर्मादावतिव्याप्त्या
पत्तेरितिभावः। रूपरसेति। यद्यपि कार्यद्रव्यनिष्ठानां संख्यापरिमाणपृथक्त्वानां सर्वेषां न कारणगुणाधीनत्वं द्वित्वद्विपृथक्त्वादे
रतथात्वात् तथापि कारणेकत्वाभावादवयविनि एकत्वानुत्पत्तौ तदसमवायिकारणकद्वित्वादेरप्यनुत्पत्तिरितिप
रंपरया कार्यद्रव्यनिष्ठद्वित्वादेरपि कारणगुणाधीनत्वमेवं तन्निष्ठद्विपृथक्त्वादेरपीतिभावः। आदिपदात् गुरुत्वद्रवत्वस्ने
हवेगजवेगसंयोगजसंयोगविभागजविभागादीनां परिग्रहः। असंभवेपि कारणगुणं विनाऽसंभवेपि द्रव्यांतरकर्मा
धीनयोरिति कारणगुणाभावे संयोगविभागजयोः संयोगविभागयोरसंभवादिदमुक्तं। यद्यपि स्वकर्माधीनयोर
पि संयोगविभागयोः संभवाद्द्रव्यांतरेति व्यर्थं न च कारणगुणाभावे तस्मिन् कर्मैव दुर्लभमिति वाच्यं। कारणगुणा
भावेपि द्रव्यांतरकर्माधीननोदनादेव कर्मसंभवात् तथापि द्रव्यांतरकर्मानुधावनस्यावश्यकत्वात् द्रव्यांतरेत्युक्तं इत्यनत्रा
हा इत्थं स्वरसानाह। इत्थं च मत्त्वेन चेत्यस्य न वैयर्थ्यमितिभावः। कारणगुणाभावेपि सगुणत्वस्योपपादितत्वात् निर्गुणे इ

त्यस्य समानाधिकरणविशेषणत्वानुपपत्तेराह। निर्गुण इति। व्यधिकरणं व्यधिकरणविशेषणं तथा च न वा निर्गुण
निष्ठद्रव्ये प्रमाणमस्ति स्पर्शवत्त्वेनारंभकत्वात्तस्य योगस्य द्रव्यासमवायिकारणत्वाच्चेति मूलार्थ इति भावः। गुणचतुष्ट
यमिति। नहि निर्गुणे नित्यादिमूलस्थं गुणपदचतुष्टयमित्यर्थः। तथा च नहि निर्गुणं निःसंख्यापरिमाणं वस्तु द्रव्यमा
श्रयते कारणगुणाभावे कारणस्य संख्यापरिमाणाभावे तस्यापि कार्यद्रव्यस्यापि निर्गुणत्वप्रसंगात् निःसंख्यापरिमा
णकत्वप्रसंगात् नन्वेवं त्र्यणुकापतिरित्यत आह। नचेति। न च निर्गुणे निःसंख्यापरिमाणे द्रव्ये किंचित्प्रमाणमस्तीति मूला
र्थ इति भावः। एतन्मते निर्गुणे द्रव्ये इति समानाधिकरणमेवमप्याद्यगुणपदद्वयं गुणसामान्यपरत्वेनाप्युपादयितुं
शक्यते गुणसामान्याभावे संख्यापरिमाणयोरप्यभावात् परंपरया कारणनिष्ठगुणसामान्याभावस्यापि कार्यनिष्ठसं
ख्यापरिमाणाभावप्रयोजकत्वात् इति गुणपदचतुष्टयमित्युक्तं। तथापि कारणनिष्ठसंख्यापरिमाणाभावस्यैव का
र्यनिष्ठसंख्यापरिमाणाभावे साक्षात्प्रयोजकत्वादाद्यगुणपदद्वयमपि संख्यापरिमाणपरमुचितमित्यभिप्रायः। अत्र

गुणपदवत्तुल्यस्यार्थसंकोच एवास्वरसः।प्रकाशकारीयलक्षणस्य मूर्त्तत्वाघटिततया भाष्यसंदर्भविरुद्धत्वात्स्वयं मूलं व्या
चष्टे।संस्कारत्वान्येति संस्कारत्वान्यया गुणत्वव्याप्या जातिस्तद्वत्तद्व्याप्या तद्वदन्यासमवेतभिन्ना या मूर्त्तिव्याप्यतावच्छेदका
गुणवृत्तिजातिस्तद्वत्त्व इति योजना।संयोगत्वावान्तरकठिनत्वसंग्रहत्वादिकमादाय संयोगे ऽप्रएत्लत्वकृत्स्नत्वत्वमादाय परिमा
णेऽव्याप्तिवारणाय अव्याप्यान्तं चरमजातिविशेषणं गुणत्वव्याप्यत्वं च गुणत्वन्यूनवृत्तित्वं गुणनिष्ठान्योन्याभावप्रति
योगितावच्छेदकत्वमिति यावत् अन्यथा रूपत्वादेरपि गुणत्वव्याप्यस्य गुणत्वस्यैव व्याप्यत्वादसंभवापत्तेः।रूपत्वादेरपि गुण
त्वन्यूनवृत्तिरूपरसान्यतरत्वादिव्याप्यत्वादसंभववारणाय जातिपदं स्वभिन्नत्वेन जातिर्विशेषणीया। तेन रूपत्वादेरपि गु
णत्वन्यूनवृत्तिरूपत्वादिव्याप्यत्वेपि नासंभवः।वेगत्वस्थितिस्थापकत्वयोर्गुणत्वव्याप्यसंस्कारत्वव्याप्यतया वेगस्थितिस्था
पकयोस्तादृशजात्यभावादव्याप्तेर्वारणाय संस्कारत्वान्येति गुणत्वव्याप्यजातिविशेषणं इत्थं च वेगत्वस्थितिस्थापकत्वमादाये
व तत्र लक्षणसमन्वयः।शब्दत्वज्ञानत्वादेः सत्तागुणत्वसंयोगत्वादेश्च वारणाय मूर्त्तिव्याप्यतावच्छेदकेति कर्मत्वपृथिवीत्वादिक

गु. शि. मात्रायाति व्याप्तिवारणाय गुणवृत्तीति गुणसमवेतत्वार्थकं तेन कर्मत्वपृथिवीत्वादेरपि कालिकसंबंधेन गुणवृत्तित्वेपि न त

६१ द्रव्यत्वादवस्थ्यं समवायेन तद्वत्तात्वाभाव जातिपदं अन्यथा कर्मादेरपि कालिकविशेषणतया तादृशरूपत्वादिमत्वादिति

67 व्याप्यापत्तेरेवमग्रेपीति भावः। प्रकाशोक्तलक्षणस्य मूर्तत्वाघटितत्वेन भाष्यसंदर्भविरुद्धत्वात्तत्त्वयं मूलं व्याचष्टे। संस्कार

त्वान्येति संस्कारत्वान्या या गुणत्वव्याप्या जातिस्तद्व्याप्या या मूर्तत्वाभावव्याप्यतावच्छेदिका जातिस्तद्वत्त्वं इत्यर्थः। परममहत्त्व

परमदीर्घत्वमात्रयाति व्याप्तिवारणाय व्याप्यांतं भावनात्वस्य गुणत्वव्याप्यसंस्कारत्वव्याप्यतया भावनायामव्याप्तिवा

रणाय संस्कारत्वान्येति गुणत्वव्याप्यजातिविशेषणं रूपत्वरसत्वादेः सत्तागुणत्वसंयोगत्वादेश्च वारणाय मूर्त्यभावव्याप्य

तावच्छेदकेति मूर्त्यभावव्याप्यता समवायेन बोध्या तेन तादात्म्यसंबंधेन मूर्तत्वाभाववव्याप्ये आत्मनि नातिव्याप्तिः लाघवादाह

मूर्त्यभावेति। परममहत्त्वादिवारणाय परिमाणवृत्तीति। परममहत्त्वेति निखिलमूर्तमहत्त्वापेक्षितोत्कर्षविशेषरूपा याः प

रममहत्त्वजातेरनभ्युपगमेपि त्वित्यर्थः॥ नित्यमहत्त्वस्य अपकर्षानाश्रयमहत्त्वस्य वा परममहत्त्वपदार्थतया गगनादिमहत्त्वेषु राम

त्कर्षापकर्षयोरुभयोरेव सत्वेमानाभावात्। न च तथापि परमदीर्घत्वत्वमादायातिव्याप्तिरिति वाच्यं। नित्यदीर्घत्वस्यापकर्षानाश्र
यदीर्घत्वस्यैवापरमदीर्घत्वपदार्थतयातस्यापि जातित्वेमानाभावात् महत्त्वविशेषस्यैव दीर्घत्वरूपतया दीर्घत्वस्यातिरिक्तप
रिमाणत्वेपिमानाभावाच्चेति भावः। मूर्त्तवृत्तित्वावच्छेदकत्वं मूर्त्तवृत्तित्वाभाववदवृत्तित्वं तच्च संयोगत्वविभागत्वयोरप्यस्ति संयोग
विभागमात्रस्यैव मूर्त्तिवृत्तित्वादतस्तदादाय संयोगविभागयोरतिव्याप्तिवारणाय मात्रपदं प्रयस्यति। मूर्त्तमात्रेति संयोगत्ववि
भागत्वादिकं च न मूर्त्तमात्रवृत्तितावच्छेदकं विभुवृत्तिसंयोगादावपि सत्वादिति भावः। काप्यतापर्यंतप्रवेशे वैयर्थ्याज्जैरवाज्ञाह
गुणवृत्तीत्यपर्युदस्तिलावतैव कर्मत्वघटत्वादिवारणादितिभावः। मूर्त्तविरोधित्वं मूर्त्तत्वाभावव्याप्यत्वं तच्च तत्समानाधिकरणा
न्योन्याभावप्रतियोगितानवच्छेदकमूर्त्तत्वाभावकत्वं मूर्त्तत्वाभावाभाववदवृत्तित्वं वा ओघेश्रात्मांतिव्याप्तिवारकगुणवृत्तीत्यस्य
वैयर्थ्यं। अंसे मूर्त्तत्वाभावाभाववत्वे न प्रवेशगौरवमतस्त्राहा। विरोधित्वमिति। स्मृतिहेतुत्वं यद्दिस्मृतिफलोपधायकत्वं तदा स्म
रणानुपधायकभावनायाऽलक्ष्येसंग्रहात्वक्षणस्यातिव्याप्तिरतो व्याचष्टे। स्मृतिहेतुतेति। वेगादीनामप्युद्बोधकविधया स्मृति

उ= तदधिकरणाप्रसिद्धेरेवतद्धारणात्

गु.टी
६८
हेतुतावच्छेदकावच्छिन्नत्वात्तद्वारणाय जातिपदं एवं चेदिति एवं यथा तादात्म्यसंबंधेन द्रव्यमात्रस्य व्याप्यत्वमभिमतं तथा जा
तीत्यर्थः। अन्यथा समवायसंबंधेन द्रव्यस्य स्पर्शस्येति स्यापकतादेरपि व्याप्यत्वात्तज्जातिव्याप्त्यापत्तेरिति भावः। गुणत्वस्य न
वृत्तित्वमिति अन्यथा गुणत्वस्य गुणत्वव्याप्यत्वात्तदनाय रूपादावतिव्याप्तिर्भेदगर्भव्याप्यत्वप्रवेशे च गौरवमिति भावः। गु
णनिष्ठेति। अधिकरणसंबंधावच्छिन्नाभावविशिष्टाभावादेर्गुणत्वाय संसर्गाभावेति संसर्गाभाववत्वं च प्रतियोगिव्यधि
करणाभावत्वं स्वसमवायवृत्तित्वमिति यावत्। स्वपदं प्रतियोगिपरं। एवमेवेति यत्र गुणत्वव्याप्यपदस्य गुणत्वादिकं वा
च्यं तत्रैव गुणनिष्ठत्वादिः तदर्थो वाच्य इत्यर्थः। अत्यंताभाव इति। अत्यंताभावे प्रतियोगिसामानाधिकरण्यविशेष
णेदत्तएकान्योन्याभावे प्रतियोगिवृत्तित्वविशेषणं सार्थकमन्यथा रूपादेर्द्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावस्यैवद्वित्वा
द्यवच्छिन्नस्यास्य प्रतियोगिकान्योन्याभावव्यापकत्वादिस्यति व्याप्तिविरहेण तदर्थं स्यादतः अत्र मोक्षोप्यसंतताभावः। प्रथमं प्र
तियोगिसमानाधिकरणत्वेन विशेषितः। प्रतियोगिसामानाधिकरण्ये च समवायसंबंधेन प्रतियोगिमत्त्वे कालावच्छेदे
राम
६८

नावर्तमानत्वं तेन सर्वस्यैवाभावस्य स्वरूपसंबंधेन विशिष्टाभावरूपप्रतियोगिनोऽधिकरणे वर्त्तमानत्वविनाप्रसिद्धिः
एककालावच्छेदेनेत्यनुपादाने च यद्विवृत्तिरूपादिव्यक्तावतिव्याप्तिः तदभावस्योत्पत्तिकालावच्छेदेन प्रतियोगिमति वर्त
मानतया प्रतियोग्यसमानाधिकरणमभावांतरमेव तत्प्रतियोगित्वस्य तत्र सत्त्वात् तानवतयाविज्ञानादावतिव्याप्तिः त
दभावस्यैककालावच्छेदेनापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यं तत्र तत्तज्ज्ञानव्यक्त्याश्रयमात्रसमवेतत्वाद्यव
च्छिन्नाभावस्यैव स्वाश्रयान्योन्याभावव्यापकप्रतियोग्यसमानाधिकरणतत्तत्ज्ञानव्यक्त्याभावरूपस्य संभवात् एवं
चित्ररूपस्थलेऽव्याप्यवृत्तिविजातीयनीलपीतादिनानारूपाभ्युपगंतृनये तत्रापि तत्तद्व्यक्तिमन्मात्रसमवेतत्वावच्छिन्ना
भावमादायैव लक्षणाभावोपपत्तिः नीलादेर्देशिकाव्याप्यवृत्तित्वेप्येकत्वादेस्तथात्वादिति भावः। अत्यंताभावे प्रतियोग्य
सामानाधिकरण्यविशेषणप्रयोजनमाह। संयोगादेरिति। न तत्राव्याप्तिरिति। न च द्वित्वादेरप्यव्याप्यवृत्तितया द्वित्वत्वाद्य
वच्छिन्नस्य तत्तद्द्वित्वव्यक्तित्वावच्छिन्नस्य वा तदभावस्यापि केवलान्वयित्वादसंभव एव वक्तुमुचित इति वाच्यं। अव्याप्तिपदस्य

गु.टी.
६९
69

भागाव्याप्त्यसंभवोभयवाचकत्वेनाऽसंभवपरत्वात् तत्सामान्यशब्दस्य सामान्यरूपेण विशेषपरत्वे लक्षणविरहात् तत्सं
योगादेरित्यादिपदेन सकललक्ष्यपरिग्रहात् तथा व्याप्तिपदं लक्ष्यैकदेशे लक्षणाभावस्यैव वाचकमिति वाच्यं। योगा
दिमर्यादया सामान्यतो लक्ष्यतावच्छेदकविशिष्टे लक्षणाभावस्यैव तदर्थत्वात् लक्ष्यैकदेशे लक्षणागमनमव्याप्तिरिति
प्रवादस्य निर्युक्तिकत्वेनानुपादेयत्वात्। अत एव द्वयं लक्षणदूषणमतिव्याप्तिरव्याप्तिश्चालक्ष्यभिन्ने लक्षणसत्त्वमति
व्याप्तिः लक्ष्यतावच्छेदकविशिष्टे लक्षणाभावोऽव्याप्तिः सा च द्विविधा भागाव्याप्तिरसंभवश्च लक्ष्यतावच्छेदकसामानाधि
करण्यमात्रेण लक्षणाभावो भागाव्याप्तिः लक्ष्यतावच्छेदकावच्छेदेन लक्षणाभावोऽसंभव इति विषयविभागः यद्यपि प्रकृत
लक्षणे घटकव्यापकतायां प्रतियोगिवैयधिकरण्यविशेषणे प्रयोजनविरहात् संयोगत्वाद्यवच्छिन्नत्वेताभावस्य व्यापकत्वेव
नास्ति कपिं तमादायासंभवः। नच्चापि संयोगादेर्द्वित्वादेर्द्वित्वादेश्च व्यधिकरणसंबंधवैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभाव
स्यापि केवलान्वयित्वात् तमादायैवासंभवः। किं च तद्वन्निष्ठात्यंताभावाप्रतियोगित्वमत्र न व्यापकत्वं सर्वेषामेव तादृशविशिष्टा

राम
६९

ष्टाभावादिप्रतियोगित्वेन तादृशाप्रतियोगिनो ऽप्रसिद्धेः किंतु तद्वन्निष्ठासंताभावप्रतियोगितानवच्छेदकयत्किंचिद्धर्मवत्त्वं त
द्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं तद्वन्निष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वं वा व्यापकत्वमस्तु वैयर्थ्यं त
था च संयोगत्वाद्यवच्छिन्नाभावस्यापि व्यापकतानमानायाप्यसंभवस्तत्त्वं न चैवं प्रतियोग्यसमानाधिकरणत्वविशेषणे विह्
त्वत्वाद्यवच्छिन्नाभावस्य निरुक्तप्रतियोग्यसमानाधिकरणाप्रमेयत्वप्रमेयत्वादियत्किंचिद्धर्मेण स्वाश्रयान्योन्याभावव्या
पकत्वादव्याप्तिरिति वाच्यं प्रतियोग्यसमानाधिकरणत्वविशेषणेऽपि तद्वन्निष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वमे
व व्यापकत्वं विवक्षणीयं ननु तद्वन्निष्ठासंताभावप्रतियोगितानवच्छेदकयत्किंचिद्धर्मवत्त्वमिति दीधितिकृतो निर्वक्तुः य
दि च यथा घटवृत्तित्वावच्छिन्नाभावत्वं स्वाश्रयान्योन्याभावव्यापकतावच्छेदकं तद्भिन्नत्वमर्थः व्यापकतावच्छेदकत्वं तु तद्वन्निष्ठासंता
भावप्रतियोगितानवच्छेदकत्वं तेन संयोगादिव्यक्तेः स्वात घटवृत्तित्वावच्छिन्नाभावत्वं न व्यापकतावच्छेदकमित्युच्यते तदा तु प्रति
योगिवैयधिकरण्यमनुपादेयमेवेत्यवधेयं । अन्योन्याभावप्रतियोग्यवृत्तित्वविशेषणप्रयोजनमाह । न चेति । स्वाश्रयप्र

गु. टी.
७०
70

तियोगिकेति। स्वाश्रयप्रतियोगिकान्योन्याभावसामानाधिकरण्योपदर्शिनेन स्वाश्रयप्रतियोगिकान्योन्याभावव्यापकप्रति
योग्यसमानाधिकरणत्वं ताभावप्रतियोगित्वं [illegible]त तत्र नास्तीत्यतिव्याप्तिः प्रसक्तेति सूचितं। न च द्वित्वाद्यवच्छिन्नस्वाश्रयप्रतियो
गिकान्योन्याभाववारणाय स्वाश्रयतावच्छिन्नप्रतियोगिताकान्योन्याभावएव विवक्षणीय इति वाच्यं। तथा सति द्वित्वादावव्या
प्यापत्तेः स्वाश्रयतावच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वानधिकरणएव सत्त्वादिति भावः। यद्यपि स्वाश्रयप्रतियोगिका
न्योन्याभावव्यापकप्रतियोग्यसमानाधिकरणभावप्रतियोगिनो ये ये तद्भिन्नत्वं लक्षणार्थस्तथा च प्रतियोग्यवृत्तिपदा
दाने स्वाश्रयप्रतियोगिकान्योन्याभावस्य केवलान्वयितया तद्व्यापकप्रतियोग्यसमानाधिकरणभावप्रतियोगिन एवाप्रसि
द्ध्या कथमतिव्याप्तिप्रसक्तिः गगनादेः स्वाश्रयाप्रसिध्या तमादायाविप्रसिद्धेः संभवात्। न च स्वपदं न भेदप्रतियोगिपरमपि
तु यत्र लक्षणं संगमनीयं तत्परं तथा चावृत्तिगगनादिकमादायैवाप्रसिद्धिरिति वाच्यं। स्वपदस्यान्यत्वप्रतियोगिपरतामा
अनुपदं दर्शयिति कृतावच्छेद्यमाणत्वात् गगनाद्यभावस्यापि सम्भवायेन प्रतियोग्यधिकरणप्रसिद्ध्याप्रतियोग्यसमानाधि राम
७०

करणत्वाभावाच्च। तथापि प्रतियोग्यवृत्तिपदादाने स्वपदमनापत्त्यादव्यलक्षणं संगमनीयं तत्परमेव वक्तव्यं एवं प्रतियो
ग्यसामानाधिकरण्यमपि समवायसंबंधेन स्वप्रतियोगिसत्त्वेककालावच्छेदेन वर्त्तते यद्यत्तदन्यत्वमेव वक्तव्यमन्यथा
त्वाश्रयान्योन्याभावव्यापकप्रतियोग्यसमानाधिकरणत्वसंतताभावप्रतियोगिनोप्रसिद्ध्याऽसंभवापत्तेस्तथा चावृत्तिगग
नादिकमादाय यथा लक्ष्ये बुलक्षणसंगमस्तथा वृत्तिगगनादिकमादायैव रूपादावप्यतिव्याप्तिरिति दीधितिकृतो निगर्वः।
एवमेवोत्तरत्रापीति वस्तुमात्रे काप्रितत्वलक्षणेप्यसंतताभावान्योन्याभावौ प्रतियोग्यसामानाधिकरण्यप्रतियोग्यवृत्ति
योग्यवृत्तित्वांपांविशेषणीयाविति तत्पर्थः। नन्वत्राऽसंभवः द्वित्वादेर्द्वित्वत्वावच्छिन्नाभावस्य द्रव्यमात्रसमवेतत्वाद्यवच्छिन्ना
भावस्य च द्रव्यत्वावच्छिन्नप्रतियोगिताकान्योन्याभावात्मकस्वाश्रयप्रतियोगिकयत्किंचिदन्योन्याभावव्यापकत्वादित्यत
आह द्वित्वादेरिति। अत्र संतताभावप्रतियोगित्वेति प्रतियोग्यसमानाधिकरणसंतताभावप्रतियोगित्वेत्यर्थः। नासंभव इति
संयोगादेः संयोगत्वाद्यवच्छिन्नाभावस्य प्रतियोग्यसामानाधिकरण्याभावेपि द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभावमादायासं

गु.शि ७१ भावप्रसक्तिर्वैयर्थ्यात्। न चेदमयुक्तं। द्वित्वत्वावच्छिन्नाभावाभावस्य द्वित्वादेरव्याप्यवृत्तितया स्वाश्रयान्योन्याभावसमानाधिकरणप्रति
योग्यसमानाधिकरणाभावप्रतियोगित्वसामान्याभावरूपस्यापि व्यापकत्वस्य द्वित्वत्वावच्छिन्नप्रतियोगिकात्यंताभावे स
त्त्वादिति वाच्यं। व्यापकतालक्षणेपि प्रतियोग्यसमानाधिकरणत्वस्य प्रतियोगिमत्येककालावच्छेदेना वर्तमानत्वरूपत्वादिति
भावः। तादृशाभावप्रतियोगिनद्वृत्ति प्रतियोग्यवृत्तित्वाश्रयस्वाश्रयप्रतियोगिकान्योन्याभावव्यापकप्रतियोग्यसमानाधिकर
णाभावप्रतियोगिनद्वृत्त्यर्थः। तदन्यत्वसमुदायस्य तत्तद्भेदकूटस्य अननुगतस्येति अननुगतसाधर्म्यस्येत्यर्थः। स्वाश्रयप्रतियो
गिकान्योन्याभावसामानाधिकरण्यं तु स्वत्वघटितत्वेनाननुगतमिति भावः। इदमापाततः। प्रतियोग्यवृत्तिस्वाश्रयप्रति
योगिकान्योन्याभावासमानाधिकरणभिन्नत्वोक्तावपि अननुगतसाधर्म्यलाभसंभवादिति ध्येयं। घटादीति। तद्घट
श्रये कपालान्योन्याभावाधिकरणे कपालान्तरे तद्घटसत्त्वात्तस्यापि स्वाश्रयप्रतियोगिकान्योन्याभावव्यापकात्यंता
भावाप्रतियोगित्वादिति भावः। आदिपदाज्ज्ञानादिपरिग्रहः। स्वाश्रयान्योन्याभावेति अन्यथा रूपादावतिव्याप्तिः तदत्यंता राम ७१

भावस्याप्यन्योन्याभावाव्यापकत्वादन्योन्याभावस्य केवलान्वयित्वादिति भावः। एवमुत्तरत्रापीति। एवमेकाक्षिप्तलक्षणेऽप्य
न्योन्याभावेति पाठेऽन्योन्याभावपदं स्वाश्रयान्योन्याभावपरमित्यर्थः। नन्वेकत्वाव्याप्यत्वं किमेकत्वत्वावच्छिन्नाभाववदवृ
त्तिभिन्नत्वं एकत्वप्रतियोगिकवृत्तियोग्यधिकरणाभाववद्वृत्तिभिन्नत्वं वा। नाद्यः नित्यमात्रवृत्तित्वादिनाव्याप्तेः अव
यव्येकत्वस्याव्याप्यवृत्तितयावयविरूपादावतिव्याप्तेः। नान्त्यः। घटरूपादावतिव्याप्तेः तस्यापि घटैकत्वप्रतियोगिकवृत्तियो
ग्यधिकरणाभाववद्घटवृत्तिभिन्नत्वादित्यत आह। एकत्वाव्याप्यत्वमिति। घटरूपादावतिव्याप्तिवारणाय यावदिति।
अव्यापकत्वाद्यव्यापकत्वाभावरूपस्याभावद्वयघटितत्वे न गुरुत्वात् यावदेकत्वानामपि एकत्वत्वरूपेण द्वित्वादिव्याप
कत्वादाह। प्रतियोगीति। स्वसमानाधिकरणत्वं तदभावप्रतियोगित्वमात्रोक्तौ घटरूपादावतिव्याप्तिः। घटैकत्वादेरपि
वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावस्योत्पत्तिकालावच्छेदेन सामान्याभावस्य च घटादौ सत्त्वात् अतः प्रतियोग्यसमा
नाधिकरणेति। तस्य विशेषणं प्रतियोग्यसमानाधिकरणत्वं च प्रतियोग्यनधिकरणवृत्तित्वं न तु प्रतियोग्यधिकरणावृ

गु.शि
७२
72

त्तित्वं अप्रसंभवापत्तेः।द्वित्वादेः स्वसमानाधिकरणैकत्वस्यापियावदंतर्गततया तदधिकरणवृत्तित्वाभावाभावात्।केचित्तु
प्रतियोग्यसामानाधिकरण्यत्वमसंताभावविशेषणमित्याहुः।तदसत्।प्रतियोग्यसामानाधिकरण्यं हि प्रतियोग्यधिकर
णावृत्तित्वं प्रतियोग्यनधिकरणवृत्तित्वं वा।नाद्यः।अप्रसंभवापत्तेः जन्यैकत्वानामपियावदंतर्गततया तदभावस्य प्रति
योग्यधिकरणावृत्तित्वाभावात् जन्यैकत्वाभावस्याव्याप्यवृत्तित्वात्।नांत्यः।घटैकत्वादेर्वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छि
न्नाभावादेरपिप्रतियोग्यनधिकरणवृत्तितया घटरूपादावतिव्याप्तितादवस्थ्यात्।न च प्रतियोग्यानधिकरणवृत्तित्वविशि
ष्टस्य स्वाधिकरणवृत्तित्वं विवक्षितमिति वाच्यं।विशिष्टस्यानतिरिक्तत्वात्।न च प्रतियोग्यनधिकरणस्वाधिकरणवृत्त्यभा
वत्वं विवक्षितमिति वाच्यं।उदक्सरत्वापत्तेः।यावत्पदार्थं विशदयति।एकत्वेति ताद्दृशेति प्रतियोग्यसामानाधिकरण्येत्य
र्थः।अत्र ताद्दृशप्रतियोगितात्वेन व्यापकत्वं बोध्यं तेन घटरूपादिसमानाधिकरणताद्दृशाभावप्रतियोगितायाः अपि प्र
मेयत्वादिना व्यापकत्वेपि घटरूपादौ नातिव्याप्तिरिति भावः।स्वसमानाधिकरणैकत्वाभावेति स्वसमानाधिकरणैकत्व

राम
७२

प्रतियोगिकाभावेत्यर्थः स्वसमानाधिकरणैकत्वत्वावच्छिन्नाभावोक्तौ द्वित्वादावसंभवापत्तेः। अभावः प्रतियोगिव्यधि
करणो बोध्यः तेन विशिष्टाभावादिकमादाय रूपादौ नातिव्याप्तिः। एकत्वपदं वैयर्थ्यादिति। प्रतियोगिव्यधिकरणस्व
समानाधिकरणप्रतियोगिकात्यन्ताभावसमानाधिकरणत्वस्यैव सम्यक्त्वादिति भावः। अयं तु क्वाचित्कः पाठः। तादृशगु
णत्वेति। अनेकवृत्त्यन्यगुणत्वेत्यर्थः। अनेकवृत्तित्वं चानुपदं निरुक्तमेवेति भावः। ननु स्वाश्रयान्योन्याभावव्याप्यधर्मवैयधिकर
ण्यं स्वाश्रयान्योन्याभावव्याप्यधर्माधिकरणवृत्तित्वं तच्च तादृशधर्माधिकरणवृत्तित्वप्रतियोगिकाभावः। तादृशधर्माधिकरण
वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावो वा। आद्ये यत्किंचित्तादृशव्याप्यधर्माधिकरणवृत्तित्वाभावस्य द्वित्वादावपि सत्त्वादति
व्याप्तिः। अन्त्ये स्वाश्रयान्योन्याभावव्याप्याधिकरणवृत्तित्वत्वस्य स्वाश्रयान्योन्याभावाधिकरणवृत्तित्वत्वमपेक्ष्य गौरवेणाभाव
प्रतियोगितानवच्छेदकत्वादप्रसिद्धिरतस्तदनधिकरणवृत्तित्वं तदभावाधिकरणवृत्तित्वरूपं वैयधिकरण्यपदार्थमाह। स्वाश्र
येति स्वाश्रयत्वावच्छिन्नप्रतियोगिताकान्योन्याभावेत्युक्तौ घटादिवृत्तिद्वित्वादावतिप्रसंगः घटादिवृत्तिधर्मस्यैव तदाश्रयत्वा

गु.टी ९३ वह्निभिन्नप्रतियोगिताकान्योन्याभावव्याप्यत्वादतः स्वाश्रयप्रतियोगिकेति इत्थं च घटत्वादेरपि व्याप्यत्वेन तादृशव्याप्यत्वावच्छि-
न्नाभावाधिकरणं घटभिन्नमेव तद्वृत्तित्वाभावान्नातिव्याप्तिः अन्योन्याभावस्य प्रतियोग्यवृत्तित्वेन विशेषणीयः तेन स्वाश्रय-
प्रतियोगिकव्यासज्यवृत्तिधर्मावच्छिन्नान्योन्याभावस्य केवलान्वयितया तद्व्याप्यत्वावच्छिन्नाभावस्याप्रसिद्ध्यापि नासंभवः
गुणत्वे सतीत्यनेनापि विशेषणीयं तेन कर्मणि नातिव्याप्तिः ननु स्वाश्रयप्रतियोगिकान्योन्याभावव्याप्यप्रतियोगिकाभाव-
समानाधिकरणमित्येव सम्यक् किं व्याप्यत्वावच्छिन्नत्वेनेत्यत आह द्वित्वादीनामिति । तथा चातिव्याप्तिः स्यादिति भावः ।
अत्र व्याप्यत्वावच्छिन्नाभावः समवायसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः तेन द्वित्वादीनामपि विषयित्वादिसंबंधावच्छिन्न-
तादृशव्याप्यत्वावच्छिन्नाभावसमानाधिकरणत्वेपि नातिव्याप्तितादवस्थ्यं । ननु स्वाश्रयप्रतियोगिकान्योन्याभावसमाना-
धिकरणत्वावच्छिन्नाभावसमानाधिकरणमित्येव सम्यक् किं व्याप्यत्वपर्यन्तेनेत्यत आह । मेयत्वेति । तथा चासंभव इति भावः । स-
मवायसंबंधेन स्वाश्रयान्योन्याभावसमानाधिकरणत्वात्मेयत्वादेः परीहारसंभवाद्व्याप्यत्वेत्युक्तं । द्रव्यमात्रस्यैवेति । निखिल राम ९३

द्रव्यस्यैव सर्पः। व्याप्यधर्मैवत्वादिति तथा च स्वाश्रयस्थापितव्याप्यवत्वात् समवायेन तद्व्याप्यत्वावच्छिन्नाभाववान् आत्मा
दिरेव तत्रावच्छिन्नादेरसत्वान्न तत्सामानाधिकरण्यमिति नातिप्रसंग इति भावः। ननु व्याप्यपदवैयर्थ्यं प्रतियोग्यवृत्तिस्वाश्र
यान्योन्याभाववत्वावच्छिन्नार्थे तादृशाभावसामानाधिकरण्यगुणत्वमित्यस्यैव सम्यक्त्वादित्यत आह। योन्नेति। ननु स्वाश्रयप्र
तियोगिकान्योन्याभावव्याप्यत्वावच्छिन्नाभावोऽप्रसिद्धः स्वाश्रयान्योन्याभाववत्वं अपेक्ष्य स्वाश्रयान्योन्याभावव्याप्यत्वस्य
गुरुतया प्रतियोगितानवच्छेदकत्वादिति चेन्न। समवायसंबंधावच्छिन्नप्रतियोगिताकस्वाश्रयान्योन्याभावव्याप्यत्वावच्छि
न्नाभावस्य सामान्यादिवृत्तेः स्वाश्रयमात्रनिष्ठस्वाश्रयान्योन्याभाववत्वावच्छिन्नाभावासमनियततया गौरवस्याकिंचित्करत्वा
त् किंच स्वाश्रयान्योन्याभावव्याप्यत्वावच्छिन्नसामान्याभावो नात्र लक्षणघटकः प्रकृतेऽनुगतस्य व्याप्यत्वस्य दुर्वचत्वात् किं
तु स्वाश्रयप्रतियोगिकान्योन्याभावोयघटसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकस्तत्तत्वमेव व्याप्यत्वं तत्तत्
त्वावच्छिन्नाभावकूट एव लक्षणघटकः न च स्वाश्रयप्रतियोगिकान्योन्याभावाभाववदवृत्तित्वमेवानुगतं व्याप्यत्वं सुवचं

गु.टी. मितिवाच्यं। तद्धि स्वाश्रयप्रतियोगिकान्योन्याभावप्रतियोगिकाभाववद्वृत्तित्वाभावः। तादृशान्योन्याभावत्वावच्छिन्नप्रतियो
१४ गिताकाभाववद्वृत्तित्वाभावो वानाद्यः। द्वित्वादावतिव्याप्त्यापत्तेः। तदाश्रयप्रतियोगिकान्योन्याभावप्रतियोगिकाभाववद्वृ
74 त्तित्वाभावरूपस्य व्याप्यत्वस्य अवृत्तिमात्रनिष्ठतया तदवच्छिन्नाभावसमानाधिकरणत्वस्य द्वित्वादौ सत्त्वात् तान्तस्य। द्वित्वाश्र
यप्रतियोगिकान्योन्याभावत्वावच्छिन्नाभावाप्रसिद्ध्या अतिव्याप्त्यभावेऽपि शेषवैयर्थ्यापत्तेः। तादृशान्योन्याभावत्वावच्छिन्ना
भाववद्वृत्तित्वमित्यस्यैव सम्यक्त्वादिति भावः। स्वाश्रयनिष्ठेति। तथा च स्वाश्रयेऽन्योन्याभाव इति सप्तमीतत्पुरुष इति भावः।
अर्थादिति। लक्षणे समन्वयरूपप्रयोजनवशादित्यर्थः। अधिकरणपदस्यार्थमाह। विरुद्धमधिकरणमिति। तादात्म्ये
नप्रतियोगिनोऽन्योन्याभावविरुद्धत्वादिति भावः। तद्वृत्तित्वेति। एतच्च यत्प्रत्ययार्थः। एवं च स्वाश्रयनिष्ठान्योन्याभाव
प्रतियोगिवृत्तित्वानधिकरणत्वमेवं लक्षणमिति भावः। अत्राप्यन्योन्याभावः प्रतियोग्यवृत्तित्वेन विशेषणीयः। तेन स्वा
श्रयवृत्तिद्वित्वावच्छिन्न स्वाश्रयप्रतियोगिकान्योन्याभावप्रतियोगि स्वाश्रयवृत्तित्वेऽपि रूपादौ नासंभवः। स्वव्याप्यवैय्या

धिकरणत्वं यदि स्वव्याप्याधिकरणवृत्तित्वं तदा तदभाववदवृत्तित्वादावपि सत्त्वादतिव्याप्तिरत आह। तत्प्रतियोगिकेति। स्व
व्याप्यत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावोक्तौ स्वस्यापि स्वव्याप्यत्वात् स्वव्याप्यतावच्छिन्नप्रतियोगिताकाभावासमा
नाधिकरणत्वं घटपटादिवृत्तित्वादावप्यस्तीत्यतिव्याप्तिरतः स्वप्रतियोगिकेत्युक्तं। अधिकरणत्वांशस्य वैयर्थ्यादाह। तत्सा
मान्याभाववत्त्वमिति। इत्थं च स्वव्याप्यप्रतियोगिकाभावसामानाधिकरण्ये सामान्याभाववत्त्वं द्वितीयलक्षणं फलितं। सामा
नाधिकरण्यस्य वृत्तित्वाद्यवच्छिन्नाभावमादाय वृत्तित्वादावतिव्याप्तिवारणाय सामान्यपदं। अत्र चेति द्वितीयलक्षणे चेत्यर्थः।
एकत्वादेरिति वर्तमानत्वादित्यग्रेतनेनान्वयि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वमभावविशेषणं देयमत आह। उत्पत्तिकाल
वृत्ति। अभावविशेषणत्वेति स्वव्याप्यप्रतियोगिकात्यन्ताभावविशेषणत्वेत्यर्थः। संयोगादिवारणमात्रेति स्वसमानाधिक
रणप्रतियोगिकात्यन्ताभावसामानाधिकरण्याभाववत्त्वोक्तावेकत्वादेरपि स्वसमानाधिकरणसंयोगप्रतियोगिकात्यं
ताभावसमानाधिकरणत्वादसंभव इति नियमांशोपादानं उपात्ते च तस्मिन्संयोगस्य द्विष्ठतयानैकत्वादिव्याप्यत्वमिति न तदसं

ताभावसामानाधिकरण्यमादायासंभवदिति संयोगादिवारणमात्रं नियमांशोपादाने प्रयोजनमित्यर्थः। आद्यपदाद्वि
भागादिद्विष्ठगुणमात्रपरिग्रहः। नोपादेयइति संयोगादिप्रतियोगिकात्यंताभावस्य प्रतियोग्यसामानाधिकरणत्वाभावा
देवत्तमादायासंभवाभावादिति भावः। द्वितीयमेकवृत्तित्वलक्षणमुपेक्ष्य तृतीयं व्याचष्टे। स्वाश्रयप्रतियोगिकेति स्वाश्रय
प्रतियोगिकद्रव्यत्वावच्छिन्नान्योन्याभावात्यंताभावस्य द्रव्यत्वादिरूपस्य व्याप्यत्वं द्वित्वादेरपि अस्ति स्वाश्रयमात्रप्रतियो
गिकेत्युक्तावपि घटपटान्यतरत्वावच्छिन्नान्योन्याभावात्यंताभावव्याप्यत्वं घटपटद्वित्वादेरित्यतिव्याप्तिमाशंक्याह। तद्वत्त्वं
तेति। तत्सामान्यात्यंताभावेत्यर्थः। अत्यंताभावद्वयप्रवेशे गौरवाल्लघुनिष्कृष्टार्थमाह। स्वाश्रयेति। स्वाश्रयान्योन्याभा
वः प्रतियोग्यवृत्तित्वेन विशेषणीयः तेन वैशिष्ट्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावमादाय नानासं
भवदिति भावः। ख्यातं श्लोके कवृत्तित्वानेकवृत्तित्वयोर्द्वयोर्लक्षणमाह। स्वसमानाधिकरणेत्यादि स्वसमानाधिकरणात्यं
ताभावाप्रतियोगियद्वित्वं तत्सामानाधिकरण्याभावप्रतियोगिगुणत्वमित्यर्थः। स्वं लक्ष्यत्वेनाभिमतं द्वित्वादेरपि यत्किंचिद्

त्वसमानाधिकरणाभावप्रतियोगितात्वप्रतिव्याप्तिरतो प्रतियोग्यंतद्भिन्नत्वविशेषणं। न च तदतिव्याप्तिवारणाय स्वसमा
नाधिकरणत्वेनैव द्भिन्नत्वविशेष्यतां किं प्रतियोग्यंपते नेति वाच्यं। तथापि घटपटवृत्तिद्वित्वादावतिव्याप्तेः तस्य स्वसमा
नाधिकरणघटजलादिवृत्तिद्वित्वसमानाधिकरणाभावप्रतियोगित्वात्। घटपटवृत्तिद्वित्वादेरपि स्वसमानाधिकरणाभा
वाप्रतियोगिघटपटमठवृत्तित्रित्वादिसमानाधिकरणाभावप्रतियोगित्वादतिव्याप्तिरिति द्वित्वपदं द्विविशेषणो वारणा
यगुणपदं द्विलक्षणमात्रस्याविद्यमानाभावः तेन न तदेकत्वाद्यव्याप्तिः। तादृशगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं वावि
वक्षणीयमिति भावः। तादृशप्रतियोगिगुणान्यगुणत्वोक्तौ प्रतियोगिकोटिगुणानां वैफल्यं गौरवं चातः प्रतियोगिकोटौगु
णत्वांशं विहाय लक्षणमाह। तादृशेति। ततद्घटादिव्यक्तावतिव्याप्तिवारणाय गुणेति। लाघवादाह। स्वाभावेति। स्वाभावासमा
नाधिकरणं द्वित्वं यस्य तादृशं गुणत्वमिति त्वर्थः। स्वत्वस्यत्वेनाभिमतं द्वित्वपदं यत्किंचिद्वित्वपरं तेन यत्किंचिद्वित्वव्यक्तौ
स्वाभावसामानाधिकरण्याभावसत्वेनैव संयोगादौ लक्षणसमन्वयः। स्वाभावासमानाधिकरणयत्किंचिद्विद्धर्मद्वगुणत्वमित्यु

रूपादावतिव्याप्तिः स्वाभावासमानाधिकरणत्रित्वकगुणत्वमिति सुक्तौ १

गु.दी. क्तौ च संयोगादावव्याप्तिरतो द्वित्वपदं घटस्य कपालद्वयवृत्तितया कपालद्वयवृत्तिद्वित्वस्यैव तदभावाधिकरणवृत्तित

१६ या घटेति व्याप्तिः एवं जातावपीत्यतो गुणपदमिति भावः। अभावस्येति। एकवृत्तित्वलक्षणेऽभावद्वयमेवं प्रथमानेकवृत्ति

78 त्वलक्षणे विद्वितीयानेकवृत्तित्वलक्षणे च स्वाभावः प्रतियोगिव्यधिकरणो बोध्य इत्यर्थः। एकवृत्तित्वलक्षणे प्रथमाभावस्य

प्रतियोगिव्यधिकरणत्वाविशेषणे रूपादावसंभवः द्वित्वमात्रस्यैव रूपाधिकरणे वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभा

वस्योत्पत्तिकालावच्छेदेन सामान्याभावस्य च सत्वात् तादृशद्वित्वाप्रसिद्धेः। नचैवं संयोगादावतिव्याप्तिः द्वित्वाभावस्याव्याप्यवृत्तित

या व्यधिकरणद्वित्वस्यापि तादृशाभावाप्रतियोगित्वेन तत्समानाधिकरणाभावप्रतियोगित्वात् संयोगस्येति वाच्यं प्रतियो

ग्यनधिकरणस्याधिकरणवृत्त्यभावाप्रतियोगित्वस्य विवक्षितत्वात् द्वितीयाभावस्य प्रतियोगिव्यधिकरणत्वाविशेष

णे चद्वित्वादावतिव्याप्तिः तस्यापि तादृशद्वित्वसमानाधिकरणस्य वैशिष्ट्यव्यासज्यधर्मावच्छिन्नाभावस्योत्पत्तिकालाव

च्छेदेन सामान्याभावस्य च प्रतियोगित्वात् नचैवं रूपादावसंभवः रूपादेरव्याप्यवृत्तितया रूपाभावमात्रस्यैव प्रतियोगिस

राम
१६

मानाधिकरणत्वादिति वाच्यं। तादृशद्वित्वाधिकरणप्रतियोग्यनधिकरणकाभावप्रतियोगित्वस्याविवक्षितत्वात्। एवं प्रा
थमिकानेकवृत्तित्वलक्षणे प्रथमाभावस्य द्वितीयाभावस्य च प्रतियोगिव्यधिकरणत्वाविशेषणे तादृशप्रतियोग्यप्रसि
द्ध्याऽसंभवः। द्वितीयलक्षणे विशिष्टाभावस्य प्रतियोगिव्यधिकरणत्वाविशेषणेऽप्रसिद्धिः। प्रतियोगिव्यधिकरणत्वं च प्रति
योग्यनधिकरणवृत्तित्वं न तु प्रतियोग्यधिकरणावृत्तित्वं तथा सति द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकरूपात्यन्ता
भावस्यैव तादृशप्रतियोगिव्यधिकरणतया रूपादावतिव्याप्त्यापत्तेः। इत्थं च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्याभावा
धिकरणवृत्तिद्वित्वकगुणत्वं लक्षणं फलितं तेन द्वित्वमात्रस्यैव संयोगादिसामान्याभावसमानाधिकरणत्वेऽपि नासंभव इति भा
वः। अत्र स्वत्वघटितत्वेनाननुगतत्वादनुगतमेकवृत्तित्वानेकवृत्तित्वे नैकवृत्तित्वयोर्लक्षणान्तरमाह। यद्वेति। घटत्वादि
मादाय घटादावतिव्याप्तिवारणाय वृत्त्यन्तं जातिविशेषणं। जलाजलयोरन्यतरमात्रोपादाने रूपत्वादिमादाय रूपादावतिव्या
प्तिरत उभयोपादानं न च तथाप्यतिव्याप्तिः रूपत्वस्यापि जलवृत्तिवृत्तित्वादजलपृथिव्यादिवृत्तिवृत्तित्वाच्चेति वाच्यं। जलवृत्तिः

मु॰ टी॰ सन्नयो जलवृत्तिस्तद्वृत्तीत्यर्थः। इत्थं च रूपादेरुभयवृत्तित्वमिति नातिव्याप्तिः। संख्यात्वस्य पृथक्त्वमादाय एकत्वे पृथक्त्वयो
७१ वतिव्याप्तिवारणाय वृत्तित्वान्तं जातिविशेषणं जातिपदं समवायेन तादृशधर्मवत्त्वलाभायेति भावः। तादृशेति। घटादिवारणा
77 य गुणपदं। भावसाधनं विशेषपदमिति वैशेषिकेत्यत्र भावसाधनं विशेषपदं तद्धितप्रकृतीभूतमभिप्रेत्येत्यर्थः। करणसा
धनत्वेत्विति। तद्धितप्रकृतीभूतस्य विशेषपदस्य करणसाधनत्वमित्यर्थः। पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्त्योः द्वन्द्वानन्तरमितर
पदेन पंचमीतत्पुरुषात् पृथिवीवृत्तिवृत्तीतरजलवृत्तिवृत्तीतरे स्पर्शे गंधाभाववद्व्याप्तिर्गंधत्वादेरतथात्वादतो व्याचष्टे पृ
थिवीति। तथा च पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्त्योः कर्मधारयसमासानंतरमितरपदेन पंचमीतत्पुरुष इति भावः। ननु
पृथिवीगुरुत्वव्यावृत्तजातिमादाय जलगुरुत्वे जलगुरुत्वव्यावृत्तजातिमादाय पृथिवीगुरुत्वे चातिव्याप्तिरित्यत आह। ज
लपृथिवीति। निविडत्वादीति तस्याः जातेः पृथिवीवृत्तिमात्रवृत्तित्वादिति भावः। आदिपदात् कांबन [unclear] घटारंभकतावच्छेदकसं
योगनिष्ठवैलक्षण्यादेः परिग्रहः। तेजोवेगातिशयस्येति तेजोवेगनिष्ठोत्कर्षस्येत्यर्थः। नैमित्तिकद्रवत्वस्येति पाकज राम
११

न्यतावच्छेदकद्रवत्वनिष्ठवैजात्यस्यघृतादिद्रवत्वनिष्ठतारतम्यस्यचेत्सर्वः। जलद्रवत्वव्यावृत्तनिखिलपृथिवीतेजोद्रव
त्ववृत्तिनैमित्तिकद्रवत्वत्वाख्यजातौमानाभावेनयथाश्रुतासंगतेः विभागवेगेतित्रयाणामेवावृत्तीत्यनेनान्वयः। नै
मित्तिकद्रवत्वावृत्तीत्युक्तौ नैमित्तिकत्वस्यपाकजत्वरूपतयापार्थिवावयविद्रवत्वमात्रनिष्ठोत्कर्षापकर्षपार्थिवावयवद्र
वत्वजन्यतावच्छेदकोत्कर्षापकर्षात्मकजातिमादायघृताद्यवयविद्रवत्वेतिव्याप्तिरतोजलद्रवत्वेत्युक्तं जलासमवेतद्र
वत्वे तदर्थः। केचित्तुवैशेषिकनयेपरमाणुद्रवत्वस्यैवपाकजतयाग्निसंयोगोद्भूततावच्छेदकजातिमादायघृतद्रवत्वे
तिव्याप्तिरतोजलद्रवत्वेत्युक्तमित्याहुः। तदसत्। अग्निसंयोगोद्भूततावच्छेदकजाति ~~मादायघृतद्रवत्वेतिव्याप्ति~~
[illegible] र्घतारंभकपरमाणुद्रवत्वसाधारणत्वात्अन्यथाघृतघस्यन्यपिकारणद्रवत्वक्रमेणद्रवत्वोत्पत्तेः। अन्येतुउ
पष्टंभकपृथिवीभागनिष्ठासंतताग्निसंयोगजन्यरूपाद्युच्छेदप्रतिबंधकतावच्छेदकं परमाणुद्रवत्वव्यावृत्ततैजसभागनि
ष्ठद्रवत्ववृत्तिजातिभेदमादायसुवर्णादिद्रवत्वेतिव्याप्तिवारणायाजलद्रवत्वेत्युक्तं। नचसाजातिर्जलद्रवत्वसाधारणेति

गु.टी.
७८
78

जलमध्यस्थितक्वाथ्यमानघृतादेरपिद्रवत्वानुच्छेदादिति वाच्यं। जलपरमाणुद्रवत्वस्याप्रतिबंधकतया सांसिद्धिक
द्रवत्वमादाय सांकर्याघटनेरित्याहुः। शुक्लरूपाणामिति। यद्यपि स्फटिकादिशुक्लेऽवांतरवैलक्षण्यमनुभवसिद्धं तथा
पि जलीयशुक्लरूपाणां न पृथिवीशुक्लव्यावृत्तवैलक्षण्यमित्यर्थः। इति मते नाहेति इति मते लक्षणांतरमाहेत्यर्थः।
अस्मिन्मते उक्तलक्षणस्य जलीयशुक्लरूपेऽव्याप्तिस्तत्र यथोक्तजात्यभावादिति भावः। विशिष्टां तस्या नाश्रयविशे
षणत्वभ्रमनिराकरणायाह। विशिष्टांतेमिति। आश्रयविशेषणत्वे विशिष्टपदवैयर्थ्यापत्तिः। भावनान्येत्यस्यैव सम्यक्त्वा
दिति भावः। ननु भावनायामव्याप्तिः तस्य भावनान्यत्वविशिष्टायामनोवृत्तिवृत्तिगुणत्वव्याप्यजातेः संस्कारत्वस्याश्रयत्वा
दित्यत आह। भावनायां चेति। गुणे गुणान्यत्वविरहात् विशिष्टसत्ताव्यतिरेकवदिति भावः। ननु कालिकपरत्वापरत्व
योरतिव्याप्तिः तयोरपि मनोवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्वानाश्रयत्वात् मनसि कालिकपरत्वापरत्वाभावेन कालिकप
रत्वापरत्वत्वजात्योर्मनोवृत्तिवृत्तित्वाभावात् कालिकपरत्वापरत्वदैशिकपरत्वापरत्वसाधारणगुणत्वव्याप्यजातौ च मा

राम
७८

नाभावादित्यत आह। जातिपदं चेति। जातिविरहेऽपि गुणत्वव्याप्यजातिविरहेऽपि न क्षतिः। न कालिकपरत्वापरत्वयोरतिव्या
प्तिः तयोर्मनोवृत्तिवृत्तिविभाजकोपाध्याश्रयत्वादिति भावः। तदाश्रयत्वं च विभाजकोपाधितानियामकसंबंधेन विवक्षणी
यं तेन कालिकादिसंबंधमादाय नाव्याप्तिः यथाश्रुतत्यागे हेतुमाह परमाणोरेवद्रवत्वस्येति वैशेषिकमत इति शेषः। तथा
च तन्मतानुक्तौ पृथिवीतेजोवयविद्रवत्वस्यापाकजतया तत्र जात्यव्याप्तिः स्यादिति भावः। ननु पाकप्रयोज्यतावच्छेदिकावव
यविपरमाणुद्रवत्वोभयसाधारण्यैकजातिरस्ति तद्द्रवत्वमेव पाकजत्वमुच्यतामित्यत आह। पाकेति। न च तादृशजात्यभा
वेऽपि पाकनिष्ठप्रयोजकतावच्छेदकत्वमेव पाकजत्वमुच्यतां प्रयोजकत्वं च जनकजनकादिव्यावृत्तानन्यथासिद्धत्वे सति निय
तपूर्ववृत्तित्वमिति वाच्यं। गौरवादिति भावः। ननु पाकजन्यतावच्छेदकैव जातिरित्यनेन सर्वत्र जातिविशेष एव जन्यता
वच्छेदक इति लब्धमवयवरूपादिजन्यतावच्छेदकं च किमिति जिज्ञासायामाह। अवयविरूपत्वादिकमिति समवेतवृत्ति
रूपत्वादिकमित्यर्थः। एतच्च वैशेषिकनयेन्यायनये पाकजावयविरूपे व्यभिचारात् गौरवाच्च नीलादेरपि पीताद्यु

गु.टी. त्यादप्रसंगादाह। जातिविशेषो वेति। नीलत्वपीतत्वादिव्याप्यपाकजनीलादिव्यावृत्तजातिविशेषो वेत्यर्थः। एतच्चोभयमते। अव
१९ यवरूपादीति। जनकतावच्छेदकं तु अवयविरूपत्वस्य जन्यतावच्छेदकत्वपक्षे स्वाश्रयसमवेतत्वसंबन्धेन रूपत्वं जातिविशेष
79 स्य जन्यतावच्छेदकत्वपक्षे स्वाश्रयसमवेतत्वसंबन्धेन नीलत्वपीतत्वादिकमिति भावः। षट्पदार्थवारणायेति गुणभिन्नेषु षट्
सु पदार्थेष्वतिव्याप्तिवारणायेत्यर्थः। अभावमादाय षट्त्वं। स्पर्शवत्परमाणोरेव मनस्त्वमिति नचैतद्वत्र लक्षणस्य स्पर्शेऽव्याप्ति
स्तत्र सत्यं तद्दलाभावादित्यतः। स्वातंत्र्येण विशेषगुणलक्षणे आह। भावनाभिन्नेति। भावनाभिन्नं सद्यज्जन्यैकत्वव्यापक
तावच्छेदकधर्मसमवायि तदन्यत्वे सतीति योजना। संख्यादिसामान्यगुणेतिव्याप्तिवारणाय सत्यंतं रूपादावव्याप्तिवार
णाय समवायीति। गुरुत्वे नैमित्तिकद्रवत्वे चातिव्याप्तिवारणाय गुरुत्वत्वादिविशेष्यदलं एवं चत षट्पदार्थीवारणाय गु
णपदमिति भावः। भावनाभिन्नेत्यस्य प्रयोजनं स्वयमेवाह। भावनेति। अन्यथा संस्कारत्वस्यापि जन्यैकत्वव्यापकतावच्छेद
कतया तत्समवायित्वेन भावनायाः संग्रहेन स्यात् तद्भिन्नोतोपादाने च भावनाभिन्नत्वरूपविशेषणाभावादेव विशिष्टाभावात् राम

१९

त्वव्यापकतावच्छेदकत्वात्तद्घुदास इति भावः। इदमुपलक्षणं। संस्कारत्वस्याप्येकत्वव्यापकतानवच्छेदकत्व २

त्वपरिग्रह इति भावः। जन्यैत्वैकत्वविशेषणप्रयोजनमाह। परत्वापरत्वयोरिति। जन्यपदोपादानेन तद्घुदासं सूचयति। का

लिकयोरिति। तथा च कालिकपरत्वापरत्वत्वयोर्दैशिकपरत्वापरत्वत्वयोश्चैकत्वसामान्यव्यापकतानवच्छेदकत्वेन तयोर्वेग

स्प्यापि स्थापकयोः कुत्रासाध्ये त्वपि व्यानत्व जन्यव्यापकतावच्छेदकत्वेवास्तु किमेकत्वपदेनेति वाच्यं। परत्वापर

त्वादेरपि जन्यव्यापकतानवच्छेदकत्वादिति व्याप्तितादवस्थ्यात्। असंभववारणायेति स्पर्शवृत्तीत्यकृतेपि रूपादेरपि ज

न्यैकत्वव्यापकतावच्छेदकसत्तागुणत्वयोः समवायित्वादसंभवः स्यादिति भावः। रूपादिकं विहाय स्पर्शपर्यन्तानुधावन

स्य फलमाह। स्पर्शोपग्रहणं चेति। यद्यपि स्पर्शवृत्तीत्यकृतेपि भावनाभिन्नत्वरूपविशेषणलाभात् विशिष्टभावस्य सत्त्वे

न भावनायामेव लक्षणगमनान्नासंभवो वक्तुमुचितः किं तु रूपादावव्याप्तिरेव वक्तुमुचिता तथापि स्पर्शवृत्तीत्यकृते भाव

नाभिन्नजन्यैकत्वव्यापकतावच्छेदकधर्मसमवायन्यत्वं संस्यंतदत्वार्थः तत्र तादृशधर्मसमवायितावच्छिन्नप्रतियोगिताकभे

दो वाच्यः। तत्प्रतियोगिताकभेदमात्रस्य संस्यापादावतिप्रसक्तत्वात्। तादृशधर्मसमवायिप्रघतद्भेदकूटस्य चदुरवधारणत्वा

सामान्यैर्भेदाप्रसिद्ध्याऽसंभवः। भावनाभिन्नत्वविशिष्टधर्मसमवायित्वमपेक्ष्य भावनाभिन्नत्वविशिष्टतादृशा
गु.टी. तत्तत्पाचतादृशधर्मसमवायित्वस्य गुरुतयाऽभावप्रतियोगितानवच्छेदकत्वादिति दीधितिकृतो निगर्वः। अन्ये तु स्पर्शपदा
८० वृत्तिपदयोः क्रमेणाव्यावृत्तिमाह। असंभवेति। स्पर्शपदमपास्याव्यावृत्तीति करणे जन्यैकत्वव्यापकतावच्छेदकावृत्तिधर्मप्रसि
80 द्ध्याऽसंभवः। अवृत्तिपदमपास्य तादृशस्पर्शधर्मसमवाय्यन्यत्वकरणेऽस्पर्शानुपग्रहहेत्वर्थ इत्याहुः। तदसत्। अवृत्तिपदादा
नैरूप्यादेरप्यनुपग्रहात् स्पर्शोपग्रहाय चेति विशेषाभिधानस्यासंगतत्वापत्तेः। केचित्तु स्पर्शावृत्तीत्यकृते गुरुत्वजलद्रववत्वान्ये
ति विशेषणवैयर्थ्यलक्षणत्वासंभव इत्यर्थः। स्पर्शोपग्रहाय चेति प्रागवदित्याहुः। नन्विदं लक्षणं विभागपरत्वापरत्वेष्वति
व्याप्तं विभागजन्यावयवास्पदेत्यतीयलक्षणवृत्तिध्वंसप्रतियोगिनि द्रव्ये विभागपरत्वापरत्वानामभावेन विभागपरत्वापर
त्वमात्रवृत्तिधर्माणां जन्यैकत्वव्यापकतानवच्छेदकत्वादिति स्वरसाल्लाघवाच्च लक्षणान्तरमाह। भावनान्येति भावनान्यो यो वायु
वृत्तिवृत्तिस्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सतीत्यर्थः। तादृशेति। गुरुत्वजलद्रववत्वान्येत्यर्थः। अत्रापि संख्यादिवारणाय स
त्यंतं संस्कारत्वजात्यभ्युपगमे भावनोपग्रहाय भावनान्येति समवायिविशेषणं रूपादावव्याप्तिवारणाय वायुवृत्तिवृत्तीति ध

द्विशेषणं वायुसमवेतसमवेतत्वपर्यः। सत्ता गुणत्वमादाय रूपादावव्याप्तिवारणाय स्पर्शावृत्तीति गुणत्वं तदावृत्तित्वोक्तौ स्य
र्शेः व्याप्तिरतो विशिष्य स्पर्शपदोपादानं जन्यरूपादेः कालिकविशेषणतया संयोगत्वादिरूपतादृशधर्मवत्त्वाद व्याप्तिवारणा
य समवायीति गुरुत्वनैमित्तिकद्रवत्वयोरतिव्याप्तिवारणाय तादृशेति सामान्यादावतिव्याप्तिवारणाय गुणपदमिति भावः
।लाघवादाह। भावनान्येमिति। इदं च पर्वलक्षणेन संभवति वेगस्थितिस्थापकयोरतिव्याप्तेः। यद्यपि संस्कारत्वान्यत्वे संस्का
रत्वावच्छिन्नान्यत्वं संस्कारत्वत्वं च संस्कारेतरासमवेतत्वे सति सकलसंस्कारसमवेतत्वमतस्तदपेक्षया भावनान्यत्वमेव ल
घुतयापि संस्कारत्वत्वेन प्रविष्टमपि तु स्वरूपतः। संस्कारत्वमेव प्रतियोगिताविशेषसंबंधेन भेदविशेषणं भावनान्यत्वे च
भावनाया अपि प्रवेशात् गौरवं न च भावनान्यत्वे विभावनान प्रविष्टा किंतु स्वावच्छिन्नप्रतियोगितासंबंधेन भावनात्वमेव भेदवि
शेषणं स्वावच्छिन्नत्वमपि न संसर्गप्रविष्टमपि तु संबंधसंबंध तया परिचायकमिति वाच्यं तस्य संस्कारत्वान्यत्वतुल्यत्वेपि प्रति
योगिघटितभावनान्यत्वपरित्यागस्यैव दीधितिकृतोक्तत्वेनादोषात् वक्ष्यमाणदोषवारणाय यावत्त्वं स्वाश्रयसमानाधि

गु.टी. करणपदं च प्रकारपितावच्छेदे। स्वाश्रयेति। स्वपदमग्रिमजातिपरं गुरुत्वत्वादेरपि पृथिवीत्वादिरूपद्रव्यविभाजकोपाध्यव
८१ च्छिन्नेतरेभ्यस्तेजःप्रभृतिभ्यो भेदप्रयोजकत्वाद्गुरुत्वादावतिव्याप्तिवारणाय यावत्पदं द्रव्यत्वं च पृथिवीजलयोरपि तादृशेतर
त्वेन तत्तो भेदाप्रयोजकत्वान्नातिप्रसंगः। पृथिव्यादेरपि जलत्वादिरूपद्रव्यविभाजकोपाध्यवच्छिन्नेतरत्वेन यावदंतर्गततया
४। गंधत्वादस्तत्तो भेदाप्रयोजकत्वादसंभवः स्यादतः स्वाश्रयसमानाधिकरणेति गंधत्वादेरपि तादृशघटत्वाद्यवच्छिन्ने
तरेभ्यो यावद्भ्यो भेदाप्रयोजकत्वात्तद्दोषतादवस्थ्यमतो द्रव्यविभाजकोपाधिरिति। द्रव्यविभाजकोपाध्यवच्छिन्नेतरत्वं च
द्रव्यविभाजकोपाधिपर्याप्तप्रतियोगितावच्छेदकताकभेदवत्त्वं तेन गंधत्वादेर्नित्यत्वादिविशिष्टपृथिवीत्वाद्यवच्छिन्नेतर
भेदाप्रयोजकत्वेपि नासंभवः भेदप्रयोजकत्वं न भेदजनकत्वं भेदानां नित्यत्वात् नापि भेदव्यापकत्वं गंधत्वादावसंभवात्
अत एव न भेदव्याप्यत्वमपि नापि तादृशभेदानुमापकत्वं अजनितानुमितावव्याप्तेः व्याप्त्यादिभ्रममादायातिव्याप्त्यापत्तेश्चेत्य
तः प्रयोजकत्वपदार्थमाह। तावन्निष्ठेति। तादृशद्रव्यविभाजकोपाध्यवच्छिन्नेतराणि यावंति तन्निष्ठेत्यर्थः। घटत्वादिमादायघ राम
८१

दादावतिव्याप्तिवारणाय गुणत्वव्याप्येति गुणवृत्त्यर्थकं जातिपदं च समवायसंबंधेन तद्वत्तालाभायेति भावः। अत्र यावत्त्वांत
र्भावेन गौरवादाह। स्वाश्रयेति। स्वपदमग्रिमजातिपरं गंधत्वादिमादाय लक्षणसमन्वयः। अभावश्च प्रतियोगिव्यधिकरणो
बोध्यः। तेन नासंभवः। सामान्याभावविवक्षणे गुरुत्वादावतिव्याप्त्यापत्तेः। अत्रापि स्वाश्रयसामानाधिकरण्यप्रवेशेन गौरवा
दग्रिमव्याप्यपदार्थविकल्पासंगतेः प्रकारांतरमाह। यत्किंचिदिति। द्रव्यविभाजकोपाधितावच्छिन्नव्यापकतानिरूपितव्या
प्यताप्रवेशे संख्यादावतिव्याप्तिरतः स्वरूपतो द्रव्यविभाजकोपाधेर्व्यापकतालाभाय यत्किंचित्पदं। गुणवृत्तिजातेर्द्रव्यविभा
जकोपाधिव्याप्यत्वस्य तत्समनियतत्वस्य चाभावादसंगतेराह। व्याप्यसमनियतेति। व्याप्यपदं समनियतपर इत्यर्थः। व्या
प्यत्वेति। व्याप्यत्वसमव्याप्यतावच्छेदकपर इत्यर्थः। प्रकाशे तस्येश्वरात्मान्यवृत्तित्वेनात्मत्वावच्छिन्नेतरभेदप्रयोजकत्वा
भावादित्युक्तं तच्चासंगतं सुखादेरीश्वरात्मान्यवृत्तित्वेपि जीवात्मन्येव तेनात्मत्वावच्छिन्नेतरभेदानुमानस्य शक्यत्वेनात्म
त्वावच्छिन्नेतरभेदप्रयोजकत्वसंभवादित्यतस्तन्मध्ये तथैव व्याचष्टे। आत्मत्वेति। तथा चात्मत्वावच्छिन्नेतरभेदप्रयोजकत्वाभा

गु.टी. वादित्यत्र सप्तमी तत्तु रूपइतिभावः। रूपादीति। आस्वरूपातिरिक्तरूपाद्यव्याप्तिरित्यर्थः। आदिपदात् रसपरिग्रहः। अव्या
८२ प्तिमेव विवृणोति। रक्तत्वमधुरत्वादीनामिति। आदिना शुक्लत्वनीलत्वादेः तिक्तत्वकटुत्वादेश्च परिग्रहः। अताद्दशत्वादिति द्र
व्यविभाजकोपाधिसमव्याप्यतावच्छेदकत्वविरहादित्यर्थः। ननु निखिलपृथिवीरूपरसमात्रवृत्तिं जलादिरूपरसव्यावृ
त्तां जातिमादाय पृथिवीरूपरसयोरेवं निखिलजलरूपरसमात्रवृत्तिं तदितररूपरसव्यावृत्तजातिमादाय जलवृत्तिरूपरस
योश्च लक्षणं संभवइत्यत आह। जलरूपादीति। आदिपदाद्रसपरिग्रहः। अनुगतेति निखिलपृथिवीरूपादिवृत्तीत्यर्थः।
ननु पृथिवीत्वावच्छिन्नजन्यतावच्छेदकतयैव तज्जातिसिद्धिः। नीलत्वपीतत्वादेस्तु जन्यतावच्छेदकत्वे गौरवादित्यत आह। शु
क्लेति। आदिपदेन शुक्लत्वादिजन्यतावच्छेदकजातिपरिग्रहः। ननु शुक्लत्वादिकं नानैवास्तु अनुगतव्यवहारस्तु नीलादिभि
न्नरूपत्वादिना कथंचित्समर्थनीय इत्यत आह। नीरसस्येति। विजातीयनानारसादिमदवयवारब्धस्य लड्डत्वादिः। तथा
च निखिलपृथिवीरूपरसमात्रवृत्तिजातिसत्त्वे विपाकर्षिवरसगंधयोरव्याप्तिर्दुर्वारा तद्वृत्तिजातेः पृथिवीत्वसमव्याप्यतावच्छे

दकत्वाभावादिति भावः। इदमुपलक्षणं जलीयरूपे व्याप्तिरपि दुर्वारा तेजसि पाकजनीलाद्युत्पत्तिवारणाय नीलादिकं प्रतिपृथि
वीत्वेन समवायिकारणत्वावश्यकत्वेपि जलीयशुक्लरूपं प्रति जलत्वेन समवायिकारणत्वे मानाभावेन निखिलजलरूप
मात्रवृत्तिजातौ मानाभावादित्यपि द्रष्टव्यं। ननु संयोगत्वादीनामपि नद्रव्यग्राहकमात्रवदिंद्रियग्राह्यत्वं मनसा तदग्रहात् संयोग
त्वादिमद्ग्रहीत्वेव विनष्टेन स्वेंद्रचक्षुषा तदग्रहाच्च तत्तत्प्रत्यक्षसंयोगादावतिव्याप्तिरतो व्याचष्टे। नयनेति तेजोविशेषेति। अनु
द्भूतस्पर्शोद्भूतरूपे त्वर्थः। तथात्वेत्विति पाठः। चक्षुर्मात्रवेद्यत्वेत्विति त्वर्थः। अतींद्रियत्वनये तु ग्राह्यत्वं तद्गतेनैव तद्वारणाय यथाश्रु
त्व ६ तमेव साध्विति भावः। बहिरिंद्रियवेद्यत्वेत्विति पाठः। स च प्रामादिकः त्रसरेणोस्त्वग्ग्राह्यत्वेन तत्परिमाणमात्रवृत्तिजातेर
पि त्वग्ग्राह्यत्वस्य सर्वैः सिद्धत्वात् तथा तु शब्दासंगतेः। ननु तादृशजातिमत्त्वोक्तावतींद्रियाव्याप्तिरूपं न विरुद्धमत आह। समु
दितेति। योग्यताया जातिघटितत्वे ईश्वरबुध्यादिव्याप्तिरसंगतेत्यतस्त[illegible]घटितां योग्यतां निरुच्यावतारणिकामाह। अथेति।
वत्त्वमिति। अंततः करणमात्रग्रहणयोग्यत्वं वत्त्वमित्यर्थः। निमित्तत्वेति। विषयतातिरिक्तरूपेणेत्यर्थः। संख्यात्वपरिमाण

गु.टी. त्वमादायसंख्यापरिमाणसामान्ययोरेवातिव्याप्त्या आत्मपर्यन्तानुधावनमसंगतमतः आत्मसंख्येत्यादिपङ्क्तिकां किं-
८३ चित्स्वरयित्वा व्याचष्टे। आत्मेति। साक्षात्कारो नेति। अन्यथा सर्वस्यैव तादृशलौकिकसाक्षात्कारविषयतया तादृशसा-
४३ क्षात्काराविषयस्यैवाप्रसिद्ध्यापत्तेरिति भावः। नन्वजन्यान्तद्वयं जन्यपदं च द्वितीयसाक्षात्कारविशेषणं किमर्थमि-
त्यत आह। अजन्येति। तल्लौकिकत्वेति द्वितीयसाक्षात्कारस्य लौकिकत्वलाभ इत्यर्थः। तदलाभे सामान्यलक्षणादिजन्य-
साक्षात्कारविषयगुरुत्वत्वाद्यादायातिव्याप्त्यापत्तेरिति भावः। गुणत्वव्याप्येतीति। गुणवृत्त्यर्थकमिति शेषः। परममहत्त्वे- म५
ति। तस्यात्मपरिमाणे लौकिकसाक्षात्कारविषयत्वादिति भावः। प्रकाशाकारलक्षणस्य बहिरिन्द्रियत्वादिप्रवेशेन गुरु-
तया स्वयं निष्कृष्य लक्षणमाह। चाक्षुषेति। सत्ता गुणत्वसंख्यात्वपरिमाणत्वादिमादायातिव्याप्तिवारणाय विषयान्तं
जातिविशेषणं व्रा(ण)सनादिनिर्विकल्पकाविषये तु न्नौ रसनादेः संख्यात्वाद्यग्राहकत्वात् संख्यात्वादावतिव्याप्तिताद(व)स्थ्य-
मतश्चाक्षुषपदं स्पार्शनघटितमपि लक्षणान्तरं बोध्यं चाक्षुषाविषये तु तत्त्वप्रसिद्धिः वस्तुमात्रस्यैवालौकिकचाक्षु- राम

वविषयत्वाद्यतो निर्विकल्पकेति निर्विकल्पकत्वं सप्रकारकभिन्नत्वं। तेनालौकिकचाक्षुषस्यांशतो निर्विकल्पकत्वा
न्नाप्रसिद्धिस्तादवस्थ्यं। रसत्वगंधत्वगुरुत्वत्वादिकमादाय रसगंधगुरुत्वादावतिव्याप्तिवारणाय विषयांतं जातिविशेष
णं। मानसविषयत्वमात्रोक्तौ उपनीतमानसविषयतामादाय रसादावतिव्याप्तितादवस्थ्यमतो निर्विकल्पेति। अत्रापि
निर्विकल्पकत्वं सप्रकारकभिन्नत्वं तेन मानसोपनीतमानस्यांशतो निर्विकल्पकत्वान्नातिव्याप्तितादवस्थ्यं न चैवं
ज्ञानेऽव्याप्तिर्ज्ञाने प्रत्यक्षे विषयस्य प्रकारतया भाननियमेन ज्ञानत्वादेः सप्रकारकान्यज्ञानाविषयत्वादिति वाच्यं। सप्रका
रकज्ञानलौकिकप्रत्यक्षं प्रत्येव ज्ञानत्वज्ञानस्य हेतुतया ज्ञानत्वज्ञानं विना विषयविशिष्टतया ज्ञानसाक्षात्कारानुदयात
चाक्षुषनिर्विकल्पकाविषयत्वे सति मानसनिर्विकल्पकविषयत्वमात्रोक्तौ निर्विकल्पकेश्वरज्ञानादावव्याप्तिरतो जा
तिमदिति। जातिपदं च समवायेन तादृशविषयकतालाभाय अन्यथा कालिकसंबंधेन ज्ञानत्वादिमत्त्वमादाय रूपादावति
व्याप्त्यापत्तेः। अत्रात्मत्वमादाय आत्मन्यतिव्याप्तिवारणाय चगुणपदमिति भावः। परममहत्त्वजातिपक्षे लक्षणमिदं पर

गु.टी. ममहत्वेति व्याप्तमतो लक्षणं तदभाह। संख्येति। सत्तागुणत्वसंख्यात्वपरिमाणत्वादिवारणाय वृत्त्यंतं जातिविशेषणमा
८४ त्मवृत्तिपदं स्पष्टत्वस्य प्रत्यक्षत्वे पृथक्त्वादौ तौ त्वपि वोध्यं। अन्यत्सर्वं पूर्ववत्। सावद्येति। अपरत्वसामान्ये कृष्टत्वे चैत्रत्वादिनिरूपि
८५ तनिरवच्छिन्नप्रकारिताशालिज्ञानस्य सार्वत्रिसंपादकत्वात्तादृशज्ञानस्य च चैत्रत्वादिनिर्विकल्पकाधीनत्वादिति भावः। त
दजन्यत्वेनेति। योगजधर्माजन्यत्वेनेत्यर्थः। अन्यथा गुरुत्वादेरपि योगजधर्मजन्यमानसनिर्विकल्पकविषयतया गुरु
त्वादावतिव्याप्त्यापत्तेरिति भावः। ननु सप्रकारकज्ञानलौकिकप्रत्यक्षं प्रति ज्ञानत्वज्ञानस्य हेतुत्वे मानाभावः ज्ञानत्वज्ञानं विना
विविषयविशिष्टतयाप्रथमानुव्यवसाये ज्ञानभानाभ्युपगमात् ज्ञानत्वादिकमनुपस्थितमेव प्रकार इति नये ज्ञानत्वस्य हेतुत्वा
संभवाच्च तथा च ज्ञानत्वादिप्रत्यक्षस्य विषयादिप्रकारतानियमेन तस्य मानसनिर्विकल्पकाविषयत्वात् तज्ज्ञाने व्याप्तिरित्य
त आह। ज्ञानत्वादेरिति। सविकल्पकमात्रेति विषयादिप्रकारकज्ञानमात्रवेद्यत्वमत इत्यर्थः। निर्विकल्पकं विहायेति
सप्रकारकभिन्नत्वरूपं निर्विकल्पकत्वं विहायेत्यर्थः। मानसं विशेषणीयमिति मानसविषयत्वं विशेषणीयमित्यर्थः। राम
८४

अन्यथालौकिकत्वेन मानसविशेषणे गुरुत्वत्वादेरपि विषयांतरांशे लौकिकस्य मानसप्रत्यक्षस्य विषयतया गुरुत्वादाव
तिव्याप्त्यापत्तेः। न चलौकिकत्वमलौकिकान्यत्वमिति वाच्यं। ज्ञानत्वादेरनुपग्रहापत्तेस्तत्तत्सास्साक्षात्कारस्य विषयांशे उपनीत
भानत्वनियमादिति ध्येयं। यन्नये लौकिकत्वं न विषयतानिष्ठविशेषणं तन्नये लौकिकत्वेन विषयताविशेषणं संभवात् स्वांशे
लौकिकसन्निकर्षजन्यत्वरूपलौकिकत्वेन मानसज्ञानमेव विशेषणीयं स्वपदं जातिपरं तथा च गौरवमित्यभिप्रायेणाह।
अंशिकं चेति। मानसनिर्विकल्पकविषये तत्र निर्विकल्पकपदेन स्वांशे निर्विकल्पकं वक्तव्यमित्यर्थः। एवं लक्षणे चाक्षुष
निर्विकल्पके तत्र तु निर्विकल्पकत्वं सप्रकारकभिन्नत्वमेवेति भावः। नन्वेवं गुरुत्वादावतिव्याप्तिर्दुर्वारेत्यत आह। तत्रेति। अंशि
कनिर्विकल्पकत्वं चेत्यर्थः। तत्रेति स्वाविशेष्यकत्वे सति स्वाप्रकारकत्वमित्यर्थः। स्वपदं जातिपरं क्रमेण दलद्वयव्यावृत्ति
माह। तेनेति। यद्यदभिधेयमिति एतत्र सत्यंतदलव्यावृत्तिः अस्य गुरुत्वत्वाप्रकारकत्वेपि वस्तुमात्र विशेष्यकत्वेन गु
रुत्वत्वविशेष्यकत्वादिति भावः। गुरुत्वत्वादेर्विशेष्यतयाऽवश्यं भाने प्रमाणसूचनाय। वीप्सोपादानं गुरुत्वमिति एतत्र विशेष्य

गु.टी. दलव्यावृत्तिः अस्य गुरुत्वत्वाविशेष्यकत्वादिति भावः। [stain]त्वगर्भत्वेनांशिकनिर्विकल्पकत्वस्याननुगतत्वमाशंक्य निर्विक
८५ ल्पकाननुपगन्तृमतसाधारण्याय च लक्षणं तत्राह। ज्ञानेत्यादि। सत्तागुणत्वसंख्यात्वपरिमाणत्वादिकमादाय अतिव्या
85 प्तिवारणाय अन्त्यां तज्जातिविशेषणं ज्ञानत्वादेरपि चक्षुःसंयुक्तात्मसमवेतसमवायवत्त्वात् संभववारणाय ज्ञानकार
णेति चक्षुःसंयुक्तसमवेतसमवायस्य विशेषणं। यद्यपि समवायस्यैकत्वेन चक्षुःसंयुक्तात्मसमवेतसमवायस्य मनःसं
युक्तात्मसमवेतसमवायाभिन्नतया ज्ञानकारणत्वमपि तत्रात्मत्वसंभवो दुर्वारः तथापि चक्षुःसंयुक्तसमवेतसमवाय वेतः=५
निष्ठचक्षुःसंयुक्तसमवेतसमवायत्वावच्छिन्नज्ञानकारणतायाः आधेयतासंबंधेनावच्छेदकत्वं अन्त्यां तद्दलार्थः सत्ता
दिकं च न तथा योगजधर्माद्यजन्यसत्तादिचाक्षुषत्वावच्छिन्नं प्रति सत्तादिनिष्ठचक्षुःसंयुक्तसमवेतसमवायत्वेन हेतुतया
सत्तादेः तादृशावच्छेदकत्वात् न च संनिकर्षस्य न तत्तद्विषयान्तर्भावेन हेतुत्वमपि चक्षुःसंयुक्तसमवेतसमवायत्वेन द्रव्य
समवेतसमवेतचाक्षुषत्वेन सामान्यतो हेतुहेतुमद्भाव इति वाच्यं। लौकिकविषयतानभ्युपगन्तृमते सामान्यतो हेतुहे =१

१=गुरुत्वात्वादिप्रत्यक्षवारणाय लौकिकविषयतायाः कारणताकल्पनस्य दुष्करत्वात् ॥ म

तुमद्गावस्था संभवात गुरुत्वत्वादिकमादाय गुरुत्वादौ रसत्वादिमादाय रसादौ चातिव्याप्तिवारणाय एतत्वं तं जातिविशेषणं
गुरुत्वत्वरसत्वादेरपि मनःसंयुक्तघटादिसमवेतसमवायशालित्वादतिव्याप्तिः तादवस्थ्यवारणाय ज्ञानकारणेति मनः
संयुक्तसमवेतसमवायस्य विशेषणं यद्यप्येवमपि समवायस्यैकत्वेन धर्मत्वादिसमवायस्य ज्ञानत्वादिसमवायाभिन्नतया
धर्मादिवतिव्याप्तिर्दुर्वारा तथापि मनःसमवेतसमवायनिष्ठमनःसंयुक्तसमवेतसमवायत्वावच्छिन्नज्ञानकारणतायाः
आधेयतासंबंधेनावच्छेदकत्वं शालित्वं तात्पर्यः जातिपदं च समवायसंबंधेन तादृशधर्मवत्वलाभाय नव ज्ञानकारणचक्षुः
संयुक्तसमवायजन्यज्ञानकारणमनःसंयुक्तसमवायशालित्वमित्येवास्तु किं समवायचतुष्टयघटनयाचेतिवाच्यं निर्विक
ल्पकेश्वरबुध्यादावव्याप्त्यापत्तेरिति भावः एतदपिपरममहत्वत्वजातिसत्वेपरममहत्वेतिव्याप्तं गुरुतरं चातोलक्षणां
तरमाह। सत्त्वेति। पृथक्त्वावृत्तीत्यपि बोध्यं प्रकाशं व्याचष्टे अन्यत्वमिति। अन्यपदाद्द्रव्यकर्मादिवतिव्याप्तेरिति भावः। अ
गुत्वत्वादीति। आदिना अनुद्भूतत्वजीवनयोनियत्नत्वपरार्धत्वादीनां परिग्रहः। प्रकाशे नित्यरूपनित्यपरिमाणादेरपिल

जाति।

मु.टी. स्यत्वाभिप्रायेण तन्त्राव्याप्तिवारणाय घटितं लक्षणमुक्तं तच्चासंगतं यः पापाकजानां कारणगुणजन्यत्वाभावादसंग्राह्य
८६ त्वं तथानित्यरूपादीनामपि तदभावादसंग्राह्यत्वस्यैवोचितत्वादित्यतो नित्यरूपादिनामप्यलक्ष्यत्वपरतयैव भाष्यं व्याचष्टे।
86 भाष्य इति। पाकं विनेति। स्वाधिकरणपाकाभावकाले जातमित्यर्थः। तथा च पाकस्याभावोऽपाकं अपाके सति जातमपाकजं
इति समासः सप्तम्यंताज्जनेर्डइति डप्रत्यय इति भावः। स्नेहांतानामिति वेगस्यपाकजत्वनित्यत्वयोरभावात्तत्र न विशेषणत्व
मिति भावः। जन्मनि विशेषणमिति जन्मनि व्यावर्तकमित्यर्थः। पाकजजातीयानां पाकाधीनजन्मनोऽपि संभवेन तस्यैव व्या
वर्तनीयत्वादिति भावः। उपरंजकं तु तदन्येषामिति जन्मनीत्यनुषज्यते तदन्येषां परिमाणैकत्वादीनां जन्मनि उपरंजकं वि
शिष्टप्रतीतौ प्रकारमात्रं न तु व्यावर्तकं व्यावर्त्याप्रसिद्धेरित्यर्थः। नित्यवर्गव्युदास इति। नित्यवर्गाणां लक्ष्यत्वव्युदास इत्य
र्थः। तेषां जन्माप्रसिद्धेरिति भावः। नन्वेवं कर्मजन्यवेगस्यापि संग्रहो विरुद्ध इत्यत आह। वेगपदमिति। कर्माजन्येति शत्यावेग
त्वरूपसामान्यधर्मेण विशेषपरमित्यर्थः। उपलक्षकं चेति लक्षणघटकजन्यस्थितिस्थापकपरमित्यर्थः। अन्यथा तस्यालक्ष्यत्वे राम

८६

कारणपूर्वकत्वस्य तत्रापि सत्त्वादतिव्याप्त्यापत्तेरिति भावः। भ्रान्तिलक्षणे योभयपदत्वे प्राचां नये युगपद्वृत्तिद्वयविरोधइत्य
तो जहत्स्वार्थलक्षणयोभयपदत्वमाह। कर्मजन्येति। सर्वत्रैवेति। अन्यथा परमाणौ वृत्तिस्थितिस्थापकस्यापि लक्ष्य
त्वापत्त्या तत्र नित्यत्वेन कारणगुणपूर्वकत्वाभावादव्याप्त्यापत्तेरिति भावः। लक्ष्यं व्याख्याय कारणगुणपूर्वकाइति व्याचष्टे।
कारणमिति। स्वाश्रयस्येति। अन्यथा सुखकारणगुणपूर्वकत्वस्य लक्षणत्वे संभवापत्तेरिति भावः। कारणत्वांशस्य वैयर्थ्या
त्तदपास्याह। स्वाश्रयसमवायीति। स्वपदं लक्ष्यत्वाभिमतपरं। न तु अवयवावयविनोरेक[illegible]त्वापांजनिते द्वित्वे कारण
कारणसंयोगादिजन्यसंयोगादौ चातिव्याप्तिरित्यत आह। स्वाश्रयसमवेतेति। तथा च स्वाश्रयसमवेताजन्यत्वे सति स्वाश्रय
समवायिगुणजन्यत्वं लक्षणं पर्यवसितं नित्यवर्गीनां रूपादिध्वंसानां च वारणाय विशेष्यदले स्वाश्रयसमवेताजन्यत्वेच
स्वाश्रयसमवेतजन्यं यद्यत्तद्भिन्नत्वं अन्यथा स्वपदस्य लक्ष्यपरत्वे स्वाश्रयसमवेताजन्यत्वे सति जन्यत्वस्य तथात्वे सति गु
णजन्यत्वस्य वा सम्यक्त्वेन स्वाश्रयसमवायपदवैयर्थ्यापत्तेः रूपादिना शब्दस्य समवायित्वरूपस्वाश्रयत्वाप्रसिद्धेर्वाति

गु.टी. व्याप्तिविरहात। नचैवमपि स्वाश्रयसमवेतजन्यं यद्घटतद्भिन्नत्वे सति जन्यगुणत्वस्यैव सम्यक्त्वेन स्वाश्रयसमवायिपदं व्यर्थमि
८१ ति वाच्यं। यथासंनिवेशे वैयर्थ्याभावादिति भावः। ननु पार्थिवपरमाणुगुरुत्वस्यापि जन्यत्वात्तत्राव्याप्तिरत आह। अजन्यत्व
87 मभिप्रेतमिति। अन्यथा तस्य जन्यत्वे कारणांतराभावात्पाकजत्वध्रौव्ये तद्वारणाय तत्रापि अपाकजत्वान्वयं वदेत्सः तथा
च मदुक्ते न जन्यत्वानाविशेषणेन तद्वारणमिति भावः। ननु मा भवतु तन्मते तत्राव्याप्तिः लीलावतीकारमते तु तत्राव्याप्तिरेव तेन प
रमाणुगुरुत्वस्यापि जन्यत्वस्वीकारादित्यत आह। लीलेति। भस्मीभावदशायामिति काष्ठाद्यारंभकपरमाणुषु भस्मविशिष्ट
=पतना६ तादशायामित्यर्थः। गुरुत्वापकर्षस्य दर्शनादिति भस्मनिष्ठगुरुत्वापकर्षे हेतुकानुमानेन गुरुत्वापकर्षस्य प्रतीयमानत्वादि
त्यर्थः। तदन्यथानुपपत्त्येति। तस्य नित्यत्वे काष्ठाद्यारंभणदशायामपि तत्सत्वात्काष्ठादावप्यपकृष्टगुरुत्वोत्पादप्रसंगोऽतो ज
न्यत्वावश्यकत्वे कारणांतरासंभवेन पाकस्य तद्धेतुत्वं विना तदनुपपत्तेरित्यर्थः। ननु मेन इति तथा च तन्मते परमाणुगुरुत्वस्या
पाकजत्वाभावेनालक्ष्यत्वादेव नाव्याप्तिः। न चैतावता तन्मते भस्मादिगुरुत्वारंभकापकृष्टगुरुत्वस्य पाकजत्वेपि काष्ठादिगुरुत्वा

राम
८१

रंभकोत्कृष्टगुरुत्वस्यापाकजत्वे मानाभाव इति वाच्यं। तदुत्कृष्टगुरुत्वस्यापि नित्यत्वे भस्मीभावदशायामपि तत्सत्त्वेन भस्म
न्यप्युत्कृष्टगुरुत्वोत्पादप्रसंगः गुरुत्ववति परमाणौ अपकृष्टगुरुत्वांतरोत्पादासंभवश्चातो जन्यत्वावश्यकत्वे परिशेषात्पा
कस्यैव तद्धेतुत्वात् न च काष्ठाद्यारंभकपरमाणूनां भस्मारंभकत्वमपि तु नित्यापकृष्टगुरुत्ववतां परमाण्वंतराणामेव तदा
रंभकत्वमिति वाच्यं। यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयकमिति नियमादिति भावः। क्वचित्तु अवयविनि गुरुत्वापक
र्षस्य दर्शनादिति पाठः। तत्रावयविनीत्यस्य तदारब्धे भस्मात्मकेऽवयविनीत्यर्थः। यतो भस्मीभावदशायामित्यस्यावय
विनीत्यनेनान्वयः तथा च काष्ठाद्यारंभकपरमाणुषु भस्मविशिष्टतादशायां वर्तमानेऽवयविनि काष्ठाद्यारंभकपरमाणुसम
वेते भस्मात्मकेऽवयविनीति यावत् नातो भस्मीभावदशायामित्यस्य वैफल्यं गुरुत्वापकर्षस्य दर्शनादिति पतनापकर्षहे
तुकानुमानेन गुरुत्वापकर्षस्य प्रतीयमानत्वादित्यर्थः। तदन्यथानुपपत्त्येति भस्मनिष्ठप्रतीयमानापकृष्टगुरुत्वस्य परमाणु
निष्ठापकृष्टगुरुत्वं विनानुपपत्त्येत्यर्थः। काष्ठाद्यात्मकेऽवयविनि भस्मीभावदशायां गुरुत्वापकर्षस्य दर्शनादिति यथाश्रुत

गु.दी. ख्यारव्यानं तु युक्तं भस्मीभावस्य भस्मत्वरूपस्य भस्मविशिष्टत्वरूपस्य वा काष्ठादावसंभवात्। भस्मनः काष्ठादिनाशानंतरो
८८ त्पन्नातिरिक्तद्रव्यत्वादिति ध्येयं। अत्र लीलावतीकारस्त्वत्रैकवचनेनास्वरसः सूचितः तद्बीजं तु गुरुत्वनिष्ठजातिरूपोत्क
88 र्षापकर्षयोरेव मानाभावः। न चैवं काष्ठादिगुरुत्वमपेक्ष्य भस्मनिष्ठगुरुत्वस्यापकर्षाभावे पतनापकर्षोपि न स्यादिति वाच्यं
गुरुत्वनिष्ठजातिरूपोत्कर्षापकर्षयोर्हि न पतनोत्कर्षापकर्षप्रयोजकत्वं। किंतु प्रचुरगुरुत्वसमवहितगुरुत्वमुत्कृष्टपतन
जनकमल्पतरगुरुत्वसमवहितगुरुत्वं चापकृष्टपतनजनकमित्येव सिद्धांतः गुरुत्वसमवहितत्वं च स्वसमवायिसमवेत
त्वस्वसमवायिसमवेतसमवेतत्वस्वसमवायिसंयुक्तस्वसमवायिसंयुक्तसंयुक्तत्वादिलक्षणपरंपरासंबंधघटितसामानाधि
करण्यसंबंधेन गुरुत्वविशिष्टत्वं संबंधाननुगमस्यादोषतया तादृशपरंपरासंबंधानामननुगतत्वेपि क्षतिविरहात्। एवं च
काष्ठादिगुरुत्वस्य काष्ठादिसंबंधिजलीयभागनिष्ठगुरुत्वसमवहितत्वेन बहुतरावयवगुरुत्वसमवहितत्वेन च प्रकृष्टपत
नजनकत्वं भस्मादिगुरुत्वस्य चाग्निसंयोगेन जलीयभागनाशादवयवस्याल्पत्वाच्चाल्पतरगुरुत्वसमवहितत्वेनापकृष्टप राम

ताननजनकत्वं। न च लाघवात् गुरुत्वनिष्ठजातिरूपप्रकर्षापकर्षयोरेव पतनोत्कर्षापकर्षप्रयोजकत्वमुचितमिति वाच्यं। त
थासत्यपकृष्टगुरुत्ववतां बहूनामवयविनां संवलनदशायामुत्कृष्टपतनानुपपत्तेरपकृष्टपतनापत्तेः स्वस्वसंवलनद
शायां प्रत्येकगुरुत्वात्तादृशोत्कृष्टपतनाभावेनापकृष्टपतनोत्पादेन च तत्र प्रत्येकगुरुत्वनिष्ठोत्कर्षस्य वक्तुमशक्यत्वा
त्। न च समाहारगुरुत्वस्यैव तत्र स्वनोत्कृष्टत्वम[.]पित्वपकृष्टत्वमेवयवयोत्कपरं प्रत्यासत्वं येन प्रचुरतरपतनसमवहि
ततनिर्वचनएवचोत्कृष्टत्वव्यवहार इति वाच्यं। तत्पासति सर्वत्रैव पतननिष्ठोत्कृष्टत्वापकृष्टत्वव्यवहारस्य प्रचुराप्रचुरपत
नसमवधानेनैव संभवात् पतननिष्ठोत्कर्षापकर्षयोरेवासिध्यापत्तेः। प्रकृते पि काष्ठभस्मपतनयोरुत्कृष्टापकृष्टत्वव्य
वहारस्य तेनैवमुपपत्तावुद्देश्यासिद्धेश्चेति[.] लेसजातीयपदोपादानप्रयोजनमाह। अवयवावयविनोरिति। कारणका
रणवृत्तिगुणप्रकर्षवत्त्वस्य सत्त्वेन तत्र पर्याप्तःसजातीयत्ववैयर्थ्यमिति भावः। नन्वेवं कृत्वस्या विसंख्यात्वेन द्वित्वसजाती
यत्वादतिव्याप्तिस्तदवस्थैवेत्यत आह। सजात्यमिति। ननु स्नेहे पार्थिवाप्यवयविद्रवत्वे चाव्याप्तिः गुणत्वव्याप्यव्याप्य

गु.कि
८५
85

जात्यातत्सजातीयाप्रसिद्धेरित्यत आह। स्नेहेचेति। तादृशोगुणत्वव्याप्यव्याप्यो पार्थिवादीति। आदिनातेजसा
वयविपरिग्रहः। जातिभेदादिति। परमाणुद्वित्वसाधारणोत्कर्षापकर्षरूपजातिभेदादित्यर्थः। तादृशादिति लिंगवि
भक्तिवारणमेनानुपपन्नेति। ननु गुणत्वव्याप्यव्याप्यजात्यासजात्यविवक्षणेसंयोगजसंयोगविभागजविभाग
वारणाय कृथंमात्रपदमप्यादियेत। तयोः गुणत्वव्याप्यव्याप्यजात्याभः स्वसजातीयस्वप जन्यत्वाभावीतकार
णकारणसंयोगकार्याकार्येसंयोगसाधारण्याः कारणकारणविभागकार्याकार्येविभागसाधारण्याद्गुणत्व
व्याप्यव्याप्यजातेरभावादत आह। संयोगजेति। तयोः संयोगजन्यतावच्छेदकविभागजन्यतावच्छेदकाभ्यामेव गु
णत्वव्याप्यव्याप्यजातिभ्यां सजातीयत्वादिति भावः। इदमुपलक्षणं कारणाकारणाभिघातादिजन्यकार्याकार्याभि
घातादावतिव्याप्तिर्बोध्या। आपिवेति। रूपादयः प्रायेण सजातीयगुणपूर्वका एवेति तदुपादानमित्यर्थः। नत्विति ल
क्षणमिति शेषः। अणुव्यादीति। घणुकनिष्ठाणुत्वस्य परमाणुद्वित्वेनजनकतात [illegible] स्यच गुणत्वव्याप्यव्याप्यजा राम

८५

त्वाणुत्वसजातीयत्वाभावादितिभावः। आदिना संख्यामात्रजन्यगुरुत्वस्य संख्यामात्रजन्यत्रसरेणुमहत्वस्य च परिग्रहः।
ननु संख्याया गुरुत्वजनकत्वेमानाभाव इति वाच्यं। गुरुत्वनिष्ठोत्कर्षापकर्षयोर्जातिरूपत्वाभ्युपगंतृनये गुरुत्वं प्रत्यपि सं
ख्याया हेतुत्वस्यावश्यकत्वादन्यथान्यूनाधिकसंख्याकसमानगुरुत्वाश्रयावयवारब्धयोरवयविनोर्गुरुत्वतारतम्या
नुपपत्तेः कार्यकारणभाववस्तुपरीमाणवदेवेतिभावः। नन्वेवं पूर्वोक्तावयवावयविद्वित्वातिव्याप्तिः कथमुद्धरणीयेत्यत आह।
मात्रपदेति। अकारणगुणेति। स्वाश्रयाकारणगुणजन्यत्वे सति स्वाश्रयसमवायिगुणजन्यत्वस्येत्यर्थः। अन्यथाका
रणाकारणपदयोः स्वकारणाकारणपरत्वेऽसंभवापत्तेः। अवयवावयविद्वित्वातिव्याप्तितादवस्थ्यापत्तेश्च। नित्यवर्णे रूपादि
नाशे चातिव्याप्तिवारणाय विशेष्यदलं। न च स्वाश्रयाकारणसमवेताजन्यत्वे सति स्वाश्रयसमवायिसमवेतजन्यत्वमित्ये
वास्तु किं गुणपदाभ्यामिति वाच्यं। समवेतत्वमपेक्ष्य गुणत्वस्य लघुत्वात्। वस्तुतस्तु स्वाश्रयाकारणीयाजन्यत्वे सति स्वाश्र
यसमवायीयजन्यत्वमेव लक्षणं समवेतत्वसंबंधेन स्वाश्रयाकारणीयात्वादिलाभाय च गुणपदमित्येव तत्वं नो नेति तस्य

गु.शि. स्वाश्रयाकारणस्यावयविनोगुणेनैकत्वेनजननादितिभावः। ननुप्रकाशेऽयोग्यत्वादित्यसंगतंपरिमाणादप्यपाक
९० जत्वस्याबाधितत्वेनायोग्यत्वाभावादित्यतआह। प्रकाशेऽयोग्यत्वादितिविशेषणत्वायोग्यत्वमेवकुतस्तदाह। परिमाण
90 दाविति। अवच्छेदकत्वायोगादिति। व्यावर्तकत्वासंभवादित्यर्थः। व्यावर्तकमेवचविशेषणमितिभावः। कारणद्वयस्य
परस्परसंयोगविभागाभ्यांकार्येसंयोगविभागयोरजननात्प्रकाशासंगतेराह। कारणद्वयमिति। अनन्वयादिति
पंचम्यर्थजन्यत्वस्यानन्वयादित्यर्थः। यथाश्रुतमेवोपपादयति। कारणद्वयेति। ननुकारणद्वयसंयोगाभ्यांकारणद्वयवि
भागाभ्यामपिनकार्येसंयोगविभागावितिसदोषतादवस्थ्यमतआह। अवस्थितिहीति। पटाकाशसंयोगमितिएवं
पटाकाशसंयोगमित्यर्थः। एतेनभाष्योक्तप्रकारेणव्याख्यातः। कारणद्वयविभागजन्यत्वेनव्याख्यातः। तंतुद्वयाकाश
विभागाभ्यामपिलाघवादेकस्यपटाकाशविभागस्यजननादितिभावः। योग्यतायदिजन्यतोऽप्यतेतदाद्वित्वादावतिव्या
प्तेरत एवं तुन्तरग्रंथासंगतिः संख्यात्वरूपत्वादेर्जन्यतावच्छेदकत्वाभावादतोव्याचष्टे। योग्यतेति। साजात्यस्यावच्छेदकाभावा राम ९०

व्याचष्टे। तदवच्छेदकत्वमिति। तत्सजातीयत्वमिति कारणगुणजन्यसजातीयत्वमित्यर्थः। गुणत्वसाक्षाद्व्याप्येति का-
रणगुणजन्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्वेन वक्तव्यमित्यर्थः। यथाश्रुते दूषणमाह तज्जन्यतेति। कारणगुणज-
न्यतेत्यर्थः। तदवच्छेदकत्वं कारणगुणपूर्वकयोग्यतावच्छेदकत्वं तथात्वासंभवेन कारणगुणजन्यतावच्छेदकत्वासंभवेन
उत्तरेति। प्रथमकल्पे स्पर्शव्याप्यतामतोर्द्दिताभावति व्याप्तिश्चेत्युत्तरग्रंथासंगतिरित्यर्थः। भेदेनेति। ग्रंथस्यायं गुणत्वस्यापि गुणत्व-
व्याप्यतया तद्व्याप्यरूपत्वादिमादाय पाकजावृत्ति व्याप्तिर्नादवस्थादिति भावः। गुणत्वपदं परं व्याप्येति गुणत्व● व्याप्य-
रूपत्वव्याप्येत्यर्थः। तथा च पाकजेऽतिव्याप्तिरिति भावः। यथाश्रुतेति। यथाश्रुते सजातीयपदं स्वरूपकथनमात्रं तथा-
पि सजातीयगुणपदं स्वरूपकथनमात्रं न तु विवक्षितमवयवावयविद्वित्वस्य सत्त्वं तद्दलेनैव वारितं तत्र याश्रयोजनाभावा-
दित्यर्थः। किंतु स्वाश्रयसमवायीयासमवायिकारणकृतीत्येव विवक्षितमिति भावः। यथापि सजातीयपदानुपा-
दानेऽकतंतुरूपद्वंद्वतिस्वावयवांशुसंयोगस्यासमवायिकारणतया तंतुपटमादाय द्रव्यमात्रेऽतिव्याप्तिरेवमसमवायि

गु.शि. कारणपदस्य कारणे कार्यपूर्वसत्त्वासत्त्वा कारणमात्रपरतया दध्यादावयववृत्तिरसविशेषादेस्तादृशकारणत्वेन तद
६१ दाद्यविद्व्यमात्रेति व्याप्तिः गुणत्वसाक्षाद्व्याप्यपदस्य गुणत्वन्यूनवृत्त्यपर्य्यकत्वात् तथाच्चैव तं तु रूपं दध्यादौ रसविशे
९१ षादेः कारणत्वं चानभ्युपगम्येदमभिहितं निरुक्तेति निरुक्तं यत्कारणपूर्वकत्वं तदभावस्येत्यर्थः। पाकजादावितिः। आदि
पदेन नित्यवृत्तिपरत्वादेः परिग्रहः। बुद्ध्यादावितीत्रत्वाश्रयस्य कारणपूर्वसिद्धेरितिभावः। ननु यन्निष्ठकारणतानिरूपितका
र्यत्वाभाववान् स्वाश्रयस्तदेवा कारणपदेन वक्तव्यमित्यस्वरसादाह। अतिप्रसक्तत्वाच्चेति। आत्ममनोयोगपूर्वकत्वादेरि
ति। आदिपदाद्भेर्याकाशसंयोगपूर्वकत्वशब्दपूर्वकत्वादिपरिग्रहः। अत्यंतापकृष्टेति। तादृशापतनस्यानित्यवृत्तित्वसं
पादनाय जन्यांतं पतनविशेषणं। अतिप्रसक्तमिति। तथा च तज्ज्ञात्याश्रयेऽपतनेऽति व्याप्तिरिति भावः। गुणवृत्त्यपकृष्टकमि
ति न च तथापि तादृशापकृष्टपतनजनकतावच्छेदकपरमाणुगुरुत्वमात्रवृत्त्यपकृष्टमादाय परमाणुगुरुत्वेति व्याप्तिरिति
वाच्यं। परमाणुगुरुत्वमात्रवृत्त्यत्यंतापकृष्टस्य गुरुत्वेतरासमवहितत्वरूपतया जातित्वाभावात्। अवयविनिष्ठगुरुत्व राम
६१

स्यावयवनिष्ठगुरुत्वसमवहितत्वनियमेन गुरुत्वांतरासमवहितत्वाभावादेव तादृशापकृष्टपतनाभावसंभवात्तन्नचला
घवाज्जातिरूपत्वमेवतस्येति वाच्यं। तथासति बहूनां परमाणूनां संवलनदशायामपि तादृशापतनापत्तेः। न चेष्टापत्तिस्त
दपकर्षस्यातीन्द्रियतया तदभावस्य च तत्त्वाप्रसिद्धेरिति वाच्यं। अतीन्द्रियत्वादेवानभ्युपगमे परमाणुपतनमात्रवृत्त्यप
कर्षस्याप्यसिद्ध्यापत्तेरिति भावः। केचित्तु प्रकाशे परममहत्त्वेऽतिव्याप्तिरित्यत्र परममहत्त्वपदं परमाणुगुरुत्वस्याप्युप
लक्षणं गुरुत्वावृत्तित्वेन वा जातिर्विशेषणीयेति नाद्येदोषइत्याहुः। तन्मात्रेति। नित्यवृत्तिमात्रवृत्तित्वं चेत्यर्थः। तदितरेति। नि
त्यवृत्तीतरवृत्तित्वमात्रं न तु वृत्तित्वांशोपि व्यर्थत्वादित्यर्थः। परमाणुत्वस्यापीति। तथा च परिमाणत्वेऽव्याप्तिरित्यर्थः।
इदमुपलक्षणं गुरुत्वावृत्तित्वस्य विशेषणत्वे परमाणुगुरुत्वस्याप्युपलक्षणं वाच्यं। कारणगुणपूर्वकवृत्तीति स्वाश्रयसम
वायिनिष्ठगुणजन्यवृत्तीत्यर्थः। तथा च स्वाश्रयसमवायिनिष्ठगुणजन्योपस्थितिपर्यंतं स्वाश्रयत्वान्यगुणत्वव्याप्यजाति
लक्षणविशेषगुणलक्षणमिति समुदितार्थः। तादृशविशेषगुणप्रसिद्धिर्वा रूपादिवृत्त्यंतं जातिविशेषणं भावनासंग्रहायेति स्वार

गु.शि. त्वान्येति जातिविशेषणं सत्ता गुणत्वमादाया संभववारणाय गुणत्वव्याप्येति गुणत्वान्यूनवृत्यर्थकं तेन गुणत्वव्युदासः अ-
६२ न्यतायाः समवायसंबंधावच्छिन्नप्रतियोगिताकत्वलाभाय जातिपदं परत्वापरत्वयोरतिव्याप्तिवारणाय विशेषगुणत्वमि-
92 तिपरत्वापरत्वान्यत्वार्थकं नच कारणगुणपूर्वकपदेन स्वाश्रयसमवायिनिष्ठगुणपूर्वकत्वमेवोच्यतां किं विशेषगुण-
त्वदलेनेति वाच्यं। परमाणुसंनिवेशवैयर्थ्याभावात्। अनुप्रकाशे नच परिमाणव्याप्तिरिति न संगच्छते संख्यापरिमाण-
जन्यपरिमाणस्यालक्ष्यत्वात्। अत्र च यज्जन्यपरिमाणे वैलक्षण्यं सत्वादिस्यात्तत्राह। प्रशिथिलेति। तदन्येति। प्रशिथिलसं-
योगजन्यस्यायोः कठिनावयवयोः संयोगे त्वपर्यः। प्रसंग्रहे लक्ष्यानन्तर्भावं तथा च तत्र लक्षणेतिव्याप्तिरिति भावः। ननु संख्या-
परिमाणान्यतरमात्रजन्यत्वमप्रसिद्धं समवायिकारणे द्रव्यजनकत्वात्तत्राह। मात्रपदमिति। असमवायिकारणं तत्र
संयोगरूपं पर्यवसितार्थः इति लाघवादधिकांशस्य निष्प्रयोजनत्वाच्चेति भावः। प्रकाशे उत्तरसंयोगपदं कर्मजन्यसंयोगपर-
तया व्याख्यातं तच्चापदार्थः इत्यतः स्वयं भाष्ये व्याचष्टे। भाष्य इति। एवं चोत्तरत्वं चरमविभक्तत्वमेवेति भावः। एतेन संयोग राम

६२

स्योत्तरत्वनिर्वचने न विभागो व्याख्यात इति शब्दोत्तरविभागो विभागजावित्यत्रोत्तरविभागोपि व्याख्यात इत्यर्थः। जन्या
श्रयोरिति अन्यपेक्षबुध्यादावव्याप्तिरिति भावः। द्रव्यकर्मणोरिति व्याप्तिवारणाय संयोगजगुणा इति। ननु प्रकाशे संयोग
जत्वमत्र संयोगासमवायिकारणकत्वमिति कथमुच्यते फलकृतैव तदपिधानादित्यत आह। प्रकाश इति। इतरस्येतीति
फलोन्नस्येत्यर्थः। तात्पर्यं तात्पर्यविषयीभूतं प्रयोजनं। ज्ञानादीति। प्रत्यक्षादीत्यर्थः। आदिपदात्सुखदुःखधर्माधर्म
ध्वंसपरिग्रहः। कर्मत्वयोरिति। कर्मत्वयोः संयोगयोः कर्मजयोर्विभागयोरिति योजना। अन्यतरकर्मोभयकर्मभेदादिव
चनं आद्यपदस्याद्यविभक्त्यैकत्वे लक्षणापत्तिरन्यतरकर्मजसंयोगविभागयोरेवाद्यविभागात्तत्रैव संग्रहापत्तिश्चेत्य
तो फलमत्तत्परतया आद्यपदं व्याचष्टे। संयोगजेति। फलमत्तत्वात्तत्साक्षात्संपरयाः वक्ष्यापेक्षितत्वात्तज्जन्यमात्रस्येति
। कार्यमात्रस्यैव भगवद्बुद्धिजन्यत्वादिति भावः। उपाधिविशेषइति क्षणत्रयावस्थायिबुद्धित्वरूपधर्मविशेष इत्यर्थः। न
नु चाक्षुषत्वादिव्याप्यो जातिर्वा अपेक्षोत्तानसंकर इत्यत आह। मानाभावाच्चेति। ननु द्वित्वादिजनकतावच्छेदकतयैव तत्सिद्धि

गु.शि संभवात् कुतो न मानं न च चाक्षुषत्वादिव्याप्यत्वेन नानात्वात् परस्परव्यभिचारेण कथं द्वित्वादिजनकतावच्छेदकत्वमिति
८३ वाच्यं। द्वित्वादिव्यापिनानाविजातीयस्य कार्यतावच्छेदकतया: स्वव्यवत्वात् तत्प्रत्यक्षत्वाऽपेक्षाबुद्धित्वं मानसत्वव्याप्यमेव द्वि
त्वत्वाद्यवच्छिन्नजनकतावच्छेदकं सर्वत्र मानसापेक्षाबुद्धितएव द्वित्वाद्युत्पत्तेः स्पार्शनविलंबस्यादोषत्वात् तावच्च चाक्षुष
९३ त्वादिव्याप्यत्वमादाय विनिगमनाविरह इति वाच्यं। ग्रंथकृत्पादैरपेक्षाबुद्धितोपि द्वित्वाद्युत्सत्ता यां चाक्षुषत्वादिव्याप्यत्वा
संभवात्। अप्रत्यापि स्मृतित्वाव्याप्यत्वमादाय विनिगमनाविरहः न च कल्पनीयतत्तत्स्मृतिव्यक्तिं प्रति तत्तदुद्बोधक
व्यक्तेः कारणत्वकल्पने गौरवमेव बाधकमिति वाच्यं। तवापि कल्पनीयतत्तन्मानसव्यक्तिं प्रति तत्तद्विशेषणज्ञानादि
व्यक्तेर्विशिष्य हेतुतावश्यकत्वेन तुल्यत्वात् न च यत्र मानसापेक्षाबुद्धिरेव तत्र प्रमानुभयवादिसिद्धा तत्र तव स्पार्शनद्व्यापत्ला
पापत्तिः संस्कारस्यापेक्षितत्वेन तत्तीयस्पार्शनएव स्मृतिसंभवादिति वाच्यं। तवापि यत्र परामर्शो व्याप्तिकाचाक्षुषापे
क्षाबुद्धिस्तत्र स्पार्शनद्व्यापत्लापाताच्च अनुमित्याद्युत्पत्त्यनंतरमेव मानसत्वानसंभवादिति चेन्न। यत्रापेक्षात्मकावेक्षाबु राम

८३

द्धितो द्वित्वाद्युत्पत्तिस्तत्र संस्कारव्यक्तिकल्पनागौरवस्यैव विनिगमकत्वात् तच्चाद्युपाद्यापेक्षाबुद्धिस्थले मानसव्य
क्तितज्जन्यसंस्कारादिव्यक्तिकल्पनायाश्च स्थले तज्जन्यसंस्कारादिव्यक्तिकल्पनासमानत्वात् न चापेक्षाबुद्धित्वे
चाद्युपत्वादिव्याप्यं नानैवास्तु मानसत्वव्याप्यमेकमेव वा उभयथापि द्वित्वादिजनकतावच्छेदकापेक्षाबुद्धि
त्वानां त्रित्वादिजनकतावच्छेदकापेक्षाबुद्धित्वैः समं सांकर्यात् द्वित्वाद्युत्पत्तिकाले नियमतः त्रित्वाद्युत्पत्तिवारणाय
तेषां भेदस्यावश्यकत्वाद्वाच्यं त्रित्वाद्यवधिकसंख्याजनकतावच्छेदकापेक्षाबुद्धित्वानां द्वित्वादिजनकतावच्छेदकापे
क्षाबुद्धित्वव्याप्यत्वात् नैवं त्रित्वाद्यवधिकसंख्योत्पत्तिकाले नियतं द्वित्वादिन्यूनसंख्योत्पादप्रसंग इति वाच्यं सक
लनव्यसंमततत्वेनैवत्वात् तथा प्राचीनमते च न्यूनसंख्यांप्रत्यधिकसंख्यासामग्र्याः प्रतिबंधकत्वादेव तदानीं तदनुत्पादात्
त्रित्वाद्युत्पत्तिकाले द्वित्वाद्युत्पादवारणाय तादृशप्रतिबध्यप्रतिबंधकभावस्यावश्यकत्वात् नव्यमते तु तेऽधिकसं
ख्योत्पत्तिकाले न्यूनसंख्योत्पत्तिरिति मते द्वित्वत्रित्वादिजनकतावच्छेदकापेक्षाबुद्धित्वानि परस्परविरुद्धान्येवतन्त्र

गु.टि. वंधकत्वकल्पनामपेक्ष्य लाघवात् इति मेवं परत्वापरत्वद्वित्वपृथक्त्वादिजनकतावच्छेदकापेक्षाबुद्धित्वमादाय स्व
५४ समूहालंबनापेक्षाबुद्धौ सांकर्यापत्तेः ईश्वरीयापेक्षाबुद्धेरहेतुत्वापत्तेश्च न चेष्टापत्तिरिदानीं परमाण्वादिनिष्ठद्वित्वाद्यु
त्पत्तेरसंभवादेरुपनीतभानात्मकापेक्षाबुद्धित्वे योगिनामपेक्षाबुद्धितो वासंभवे विसर्गादौ परमाणुबुद्धि [illegible] त्वोत्पाद
९७ संभवात् तान्न च मास्तु तदानीं तत्र द्वित्वाद्युत्पत्तिः किं ते नेति वाच्यं तदा सति [illegible] सर्गाद्यकालीनद्व्यणुकेषु परिमाणोत्पत्त्यसं
भवापत्तेः तान्न च ब्रह्माण्डान्तरीययोगिनामपेक्षाबुद्धित एव तदानीं परमाणुबुद्धित्वाद्युत्पत्तिरिति वाच्यं एकस्मिन् ब्रह्माण्डे प्रल
यदशायां ब्रह्माण्डान्तरे जन्यद्रव्यसत्त्वे मानाभावे न सर्वस्मिन्नेव ब्रह्माण्डे युगपत्प्रलयाभ्युपगमात् किं च द्वित्वत्वावच्छि
न्नं प्रति तत्तद्व्यक्तीयापेक्षाबुद्धित्वेन हेतुतायां न कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिः एकत्रापेक्षाबुद्धिसत्त्वेऽन्य
त्रापि द्वित्वोत्पत्त्यापत्तेः नापि यत्र समवायेन द्वित्वोत्पत्तिस्तत्र विषयतासंबंधेनापेक्षाबुद्धितो विद्यमानद्रव्यमात्र एव द्वित्वो
त्पत्तिप्रसंगात् तत्तद्व्यक्तिसमवेतद्वित्वत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वधर्मितावच्छेदकैकत्वप्रकारकापेक्षाबुद्धित्वेन हेतुत्वमि
बुद्धिरिति दैशिकसामानाधिकरण्यं प्रत्यासत्तिः अयमेकः अयमेक इति द्रव्यमात्रं चैकत्ववदिति समूहालंबनापेक्षा २ राम
५४

तिचेत्तर्ह्यननुगतकार्यकारणभावाभावेन जातिकल्पनाप्रयोजनाभावात्तत्प्रयोज्यबुद्धित्वेनैव हेतुत्वस्य सम्भवत्वादिति दिक्
।ननु जन्यमात्रएवातिव्याप्तिसत्वात्संस्कारादावितिविशेषाभिधानमसंगतमतआह। संस्कारादावितिं। तस्य कार्यमात्र
स्य तद्धेतीति अपेक्षाबुद्धित्वं हीत्यर्थः। जातित्वस्य प्रागवदूषितत्वादिति भावः। ताद्रूप्येनेति। द्वित्वद्विपृथक्त्वपरत्वापरत्वो
दिसाधारणस्य कार्यतावच्छेदकस्यैकस्याभावादेकत्वान्यसंख्यात्वैकपृथक्त्वान्यपृथक्त्वादिप्रत्येकधर्मावच्छिन्नं प्रतिते
नरूपेण हेतुत्वे मानाभावादित्यर्थः। द्वित्वाद्युत्पादकापेक्षाबुद्धित्वोद्विपृथक्त्वपरत्वादेर्द्विपृथक्त्वाद्युत्पादकापेक्षाबुद्धि
त्वञ्च द्वित्वादेरुत्पादकारणं यद्द्वित्वपृथक्त्वत्वाद्यवच्छिन्नं प्रतिविशिष्य हेतुहेतुमद्भावस्यावश्यकत्वादिति भावः।ना
नैकत्वेति। एकत्वद्वयविषयकबुद्धित्वादिकमित्यर्थः। आदिपदादेकपृथक्त्वद्वयविषयकबुद्धित्वदूरत्वनिकटत्ववि
षयकबुद्धित्वचिरकालोत्पत्तिकत्वस्वल्पकालोत्पत्तिकत्वविषयकबुद्धित्वादिपरिग्रहः। अननुगमादिति। ताद्रूप्येण
जनकतानामननुगतत्वादित्यर्थः। तथा चैकैकस्य लक्षणघटकत्वे परस्परमव्याप्तिः समुदायस्य लक्षणघटकत्वे असंभ

गु.शि वः। लक्षणत्रयावस्यापि बुद्धिनिष्ठजनकतात्वेन चानुगमेऽव्यौक्तातिप्रसंगस्तदवस्थ एवेति भावः। गंधत्वेति। रूपत्वादेर्नि
८५ त्यावृत्तीत्यनेनैव वारणात् द्विहायगंधत्वाद्यनुधावनं। आदिना सुखत्वद्वेषत्वभावनात्वादिपरिग्रहः। संयोगत्वादीति दुः=२
95 आदिना विभागत्वकर्मजन्यतावच्छेदकसंयोगादिनिष्ठजात्यादेः परिग्रहः। तज्जातीयत्वं चेति कर्मजन्यजातीयत्वं चेत्यर्थः
। गुणत्वव्याप्येति। अन्यथा सत्तागुणत्वमादाय असंभवापत्तेरिति भावः। परिमाणत्वादीति। आदिना संख्यात्वपृथक्त्वादि
परिग्रहः। ननु कर्मत्वादेर्मनोगुणवृत्तीत्यनेनैव वारणात् गुणत्वव्याप्यपदं व्यर्थमत आह। मनोगुणपदस्येति। तथा च मनो
वृत्ति वृत्तीत्यर्थः इति भावः। गुणत्वव्याप्येति। गुणवृत्त्यधिकमिति शेषः। यत्त्वर्थः। अत्र वदंतीति पाठस्तु प्रामादिकः। विभाजकोपा
धिपरमिति। तद्घटितं च विभाजकोपाधितानियामकसंबंधेन वक्तव्यं तेन कालिकादिसंबंधमादाय नातिप्रसंगः। तत्परत्वे हेतुमाह।
देशिकेति। तथा च तदपरतायां कालिकपरत्वापरत्वयोरव्याप्तिः स्यादिति भावः। नन्वेवं जातिविरहेऽपि कालिकपरत्वापरत्वत्वरू
पावांतरजातिमादायैव तत्र लक्षणसमन्वयः स्यादित्यत आह। कालिकयोरिति। तथा च कालिकपरत्वापरत्वयोर्मनोवृत्तित्वमे

राम
८५

वनास्तीति भावः। नन्वेवं द्वित्वादावव्याप्तिर्द्वित्वादीनां विभाजकोपाधित्वाभावात् संख्यात्वस्य च नित्यवृत्तित्वादित्यत आह
विभज्यते चेति। तथा चानेकद्रव्यसमवेतसंख्यात्वरूपविभाजकोपाधिमादायैव तत्र लक्षणसमन्वय इति भावः। ननु तथा
पि द्विपृथक्त्वादावव्याप्तिः द्विपृथक्त्वादेर्विभाजकोपाधित्वाभावात् पृथक्त्वस्य च नित्यवृत्तित्वादित्यत आह पृथक्त्वं चेति। पृ
थक्त्वमपीत्यर्थः। विभज्यत इत्यनुषज्यते। तथा च तत्रापि अनेकद्रव्यवृत्तिपृथक्त्वत्वरूपोपाधिमादायैव लक्षणसमन्वय इ
ति भावः। अस्मिन्कल्पे गुणत्वव्याप्यपदप्रयोजनं संदर्भशुद्धं न भवतीत्यतः कालिकपरत्वापरत्वयोर्व्याप्तिवारणाय प्रकारान्तर
माह। मनोगुणेति। वेति तथा च कालिकपरत्वापरत्वमपि परत्वत्वापरत्वत्वोपाधिना मनोगुणसजातीयमेवेति तद्वृत्ति कालिकपरत्वत्वा
परत्वत्वमादाय तत्र लक्षणसमन्वय इति भावः। गंधादिरपि गुणत्वादिना मनोगुणसजातीय एवेत्यतिव्याप्तिरत आह। सजातीयं चेति।
गुणत्वव्याप्यपदप्रयोजनं चानुपदमेव वक्ष्यते। लाघवादाह। मनःपदं चेति। अत्राणुसामान्यपरत्वे निर्गन्धनीरसाणुपरत्वे वा
पाकजन्यतावच्छेदकपृथिवीतेजोद्रव्यत्ववृत्तिजातिमादाय तदाश्रयद्रव्यत्वेऽतिव्याप्तिरतो नीरूपाणुपरत्वमिति कश्चित्तद
सत् तज्जातित्वस्यापि कर्मव्याप्यतया गुणविभाजकोपाधिसाक्षाद्व्याप्यत्वाभावात्। वस्तुतस्तु निर्गन्धेति कृतेनुरस्पनुरस्पा

गु.शि
९६
96

रब्धनिर्गंधपरमाणुवृत्तिरसाद्इति कटुत्वादिमादाय रसावद्वृत्तिव्याप्तिः नीरसेति कृतेपि जातीयरसवदारब्धनीरसपरमाणुवृत्तिगंध
वृत्तितिगंधत्वमादाय गंधेति व्याप्तिरेवम् अणुसामान्यपरत्वेपीत्यतो नीरूपपदं एवंच वायुपरमाणुकमादाय कालिकपरत्वापरत्व
योर्लक्षणसमन्वयः अनुष्णाशीतस्पर्शजन्यतावच्छेदकजातिमादाय स्पर्शेनातिप्रसंगः तज्जातेरनुष्णाशीतत्वव्याप्यतया साक्षा रूप=३
द्व्याप्यत्वाभावादिति भावः। वृत्तिद्वयएव गुणत्वव्याप्यपदप्रयोजनमाह। एवं चेति। जातिविशेषेति। अपकर्षरूपेत्यर्थः। त
स्य वायुपरमाणुकमादाय नीरूपाणुगुणवृत्तित्वमिति भावः। ननु तज्जातिविशेषोपि गुणत्वव्याप्य एवेत्यत आह। गुणविभाजकेति। त
ज्जातिविशेषस्तु न तथा तस्य गुणविभाजकपरिमाणत्वव्याप्याणुत्वत्वव्याप्यत्वादणुत्वत्वजातेस्तु नित्यावृत्तिपदेनैव निरासइति भावः
गुणत्वसाक्षाद्व्याप्येस्तु तेनोद्वित्वादावव्याप्तिः द्वित्वत्वादिजातेर्गुणत्वव्याप्यसंख्यात्वव्याप्यत्वादतो गुणविभाजकोपाधीत्युक्तं। नन्वेवम
पि द्वित्वादावव्याप्तिः द्वित्वत्वादेर्गुणविभाजकसंख्यात्वादिव्याप्यानेकद्रव्यसमवेतसंख्यात्वादिव्याप्यतया तत्साक्षाद्व्याप्य
त्वाभावादित्यत आह। तत्वं चेति। विभाजकोपाधिसाक्षाद्व्याप्यत्वं चेत्यर्थः। अनेकद्रव्यवृत्तिसंख्यात्वादिकं च न जा

राम
९६

तिरिति भावः। मूले लोकेति व्याख्यायामनुत्पन्नपदस्नेहपदान्यतरवैयर्थ्यात् तस्यात्तं अणभाष्यं व्याचष्टे। रूपादय इति। विजातीये
ति क्रियाशब्दादिरूपविजातीयारंभकाभाव इत्यर्थः। संयोगादय इति। आदिना विभागपरिग्रहः तस्यापि स्वविजातीयस्य
शब्दस्य जनकत्वादिति भावः। सजातीयमिति। तथा चातिव्याप्तिरिति भावः। पाकजनिमित्तत्वादिति। पाकजरूपादिनि
मित्तकारणत्वादित्यर्थः। तथा च विजातीयाजनकत्वेऽपि सजातीयजनकत्वमुष्णस्पर्शेनास्तीत्यव्याप्तिः स्यादिति तस्य
लक्ष्यबहिर्भावाय लक्ष्येऽनुत्पन्नपदमिति भावः। रूपादिकमिति। रसगंधस्पर्शपाकजादिपरिग्रहः। सुखादीत्यादिना दुःखध्वंस
योः परिग्रहः। बलमस्थिमध्यस्थितो द्रव्यविशेषः प्रकृष्टमहत्त्वशाली प्राणिनां पुष्टिस्तत्त्ववय[illegible]वोपचयः। आदिना जीवना
रोग्यपरिग्रहः। अभिघातमिति। शब्दजनकविभागपाषाणादिकमपि बोध्यं। जनयतीति। विजातीयमिति। तथा च सत्त्वंतद
लभावादेतेष्वव्याप्तिरिति भावः। ज्ञानादीत्यादिपदात् सुखादेः बलपुष्ट्यादिसंग्रहपरिग्रहः। एकाश्रितमिति। यद्यपि संयोगान्ये
त्पुन्नावप्यभिघातसंग्रहकारणं संभवति तथाप्येकत्वादिना विजातीयद्वित्वादिजननात् स्पर्शेन च शब्दजनकविभागा

गु.टी. दिजननात्तदव्याप्तिवारणाय गुरुत्वैकाश्रितत्वस्य प्रवेशः ह्रस्वत्वाणुत्वादावित्याद्युपादानात्परममहत्त्वदीर्घत्वयोः परिग्र
८७ हः रूपादावितिआदिनोत्तावयविरूपादिपरिग्रहः। अव्याप्तिरिति तेषां विजातीयाजनकत्वेपि सजातीयजनकत्वाभावा
६७ दिति भावः। अजनितेति। अजनितः पाको विलक्षणतेजःसंयोगो येन तेजोवयवेन तद्वृत्ति यदुष्णत्वमुष्णस्पर्शस्तत्रेत्यर्थः
अजनितपाकत्वस्योष्णत्वविशेषणत्वं तु न संगच्छते उष्णस्पर्शस्य पाकजरूपादिजनकत्वेपि पाकजनकत्वे मानाभा
वात् अपक्वपाकः पाकं पाकजरूपादि तथा चाजनितः पाको ऽजनितं पाकजरूपादि येन तेजोवयवगतोष्णत्वे नात्रेत्य
र्थः। विजातीयाजनकत्वसंपादनाय अजनितपाकेत्युक्तं सजातीयजनकत्वसंपादनायावयवगतेत्युक्तं आदिना विजाती
याजनकसंयोगादिव्यक्तिपरिग्रहः। स्वेत्यादि स्वपदसमभिव्याहृतयत्परं स्पर्शत्वोष्णस्पर्शत्ववारणाय वृत्त्यन्तं च
रमजातिविशेषणं एवं चोष्णस्पर्शस्य स्वावृत्तिरूपत्वाद्याश्रयपाकजरूपादिजनकत्वान्नातिव्याप्तिः रूपत्वादिसंग्र
हाय स्वावृत्तिगुणत्वसाक्षाद्व्याप्यजात्याश्रयस्येत्येकाश्रितस्य विशेषणं नीलरूपादेः स्वावृत्तिनीलादिजन्यतावच्छे

राम
८७

दकृजात्याश्रयजनकत्वादव्याप्तिवारणाय गुणत्वसाक्षाद्व्याप्येति स्नेहस्पर्शयोः संग्रहमभिघातादिजनकत्वादव्या
प्तिवारणायैकमात्रवृत्तिस्येति रूपादेस्तादृशजात्याश्रयज्ञानादिजनकत्वादव्याप्तिरतो ज्ञानादिभिन्नत्वेकमात्रवृत्तिविशेष
णं। आदिपदात्संग्रहव्यतिरिक्तपर्वेक्तिसकलपरिग्रहः। अन्यत्सर्वस्वयमेव वक्ष्यते साक्षाद्व्याप्यत्वप्रवेशे गौरवादा
ह। स्ववृत्तीति। असंभववारणाय गुणत्वव्याप्येति चित्रत्वादीति। आदिपदात् लीलादिजन्यतावच्छेदकजातिपरिग्रहः। सा
क्षादितीति गुणत्वसाक्षाद्व्याप्येतीत्यर्थः। कर्मणः स्ववृत्तिगुणत्वसाक्षाद्व्याप्यजात्याश्रयस्य वेगस्य जनकत्वात्तज्जाती
याजनकत्वाद्वेनिरास इति भावः। द्वितीयविवक्षायां गुणपदस्य व्यावृत्तिमाह। स्पर्शस्येति। तथा च स्पर्शेऽव्याप्तिरिति भा
वः। तदनभ्युपगमे तु तादृशाध्वंसजनकतयाऽव्याप्तिवारणाय तदुपादेयं एतत्कल्पे कर्मणः स्ववृत्तिगुणत्वव्याप्यजा
त्यप्रसिध्यावृत्त्यंतदलेनाकारणेऽविसजातीयजनकत्वदलेनैव वारणे प्रतिधेयं। प्रपत्वकत्वादीति। अन्यथा तमाप्य
यद्विषयकत्वाभावति व्याप्तिः स्यादिति भावः। संख्यायाः स्वविजातीयपरिमाणजनकत्वात्संख्यात्वं विहाय पृथक्पद

गु.टी. त्वत्वानुधावनं भावनाकारणायेति भावनाया अपि पटुतरभावनाजनकत्वस्य प्राप्यकृताऽप्रसिद्धितात्वाद्भावना
९८ त्वमादाय भावनायामतिव्याप्तिवारणाय भावनान्येति सजातीयविशेषणमित्यर्थः। यद्यप्यग्रे प्रत्यक्षत्वेन जातेर्वि
९४ शेषणीयतया भावनात्वमादायन भावनायामतिव्याप्तिरेवमग्रे कर्मत्वमवान्तरादिकारणवृत्तित्वेन जातेर्विशेषणीयतया सं
स्कारत्वमादायापि नातिव्याप्तिः। तथाप्युद्भपदं उद्भूतोत्पत्तिमित्येव वक्ष्यमाणद्वितीयविवक्षापक्षे भावनात्वमादायैव भाव
नायामतिव्याप्तिर्वोध्या जातेः प्रत्यक्षत्वविवक्षापक्षेतु भावनान्येति नोपादेयमिव वस्तुतस्तु लक्षणे भावनान्येति पाठः प्रामादिकः
अत्र भावनावारणाय भावनान्येतीति पाठोऽपि प्रामादिकः किंतु उद्भपदं वा उद्भूतोत्पत्तिमित्यनंतरमेव भावनावारणा
य भावनान्येति वक्तव्यमिति पाठः। तादृशपाठासत्वमेव वा भावनायाः भावनांतरजनकत्वे मानाभावादित्येव तत्वं। परत्वा
दीति। आदिपदात् परत्वयोः सुखदुःखयोश्च परिग्रहः सजातीयेत्यादिपदात् जनकतापरिग्रहः जनकमात्रोक्तौ परत्वादेरपि
स्वध्वंसस्वसाक्षात्कारजनकत्वात्तद्दोषतादवस्थ्यमतः सजातीयपदं साजात्यं च सत्ताव्याप्यजात्या तेन परत्वादिसाक्षात्कारस्या

जन्य व्याप्य

राम
९८

२

पि गुणत्वसत्ताभ्यां परत्वादिसजातीयत्वेपि नैतद्दोषतादवस्थ्यं गुणत्वव्याप्यजात्या तु साजात्यं न वाच्यं पृथक्त्वादिवार
णायेति पूर्वोक्तासंगतेः द्रव्यत्वस्य पृथिवीत्वादिजात्या सजातीयजनकवृत्तित्वेपि गुणत्वव्याप्यजात्या सजातीयजनका
वृत्तित्वेनादिपदग्राह्यत्वाभावात् तत्रादिपदस्य न्यपाठे तु गुणत्वव्याप्यजात्यैव साजात्यं वक्तव्यं द्रवत्वादीत्यादिना गुरुत्व
वेगस्थितिस्थापकानां परिग्रहः। कर्मासमवायीति इत्थं च द्रवत्वगुरुत्वादेः स्पंदनपतनाद्यसमवायिकारणत्वान्नातिप्रसं
ग इति भावः। अभिघातजनकर्मणि स्पर्शस्य निमित्तकारणत्वात्तत्राव्याप्तिवारणाय असमवायीति प्रत्यक्षत्वेनापीति जा
तिविशेषणीयेत्यनुषज्यते। अनुद्भूतत्वव्युदास इति अन्यथा उद्भूतोष्णस्पर्शस्यैव पाकजनिमित्ततया तैस्यापि विजातीय अनुद्भूतत्व=
जनकावृत्तित्वेन सजातीयावयविनिष्ठानुद्भूतस्पर्शजनकवृत्तित्वेन च तदापाद्युद्भूतोष्णस्पर्शेऽतिव्याप्त्यापत्तिरिति भा
वः। प्रत्यक्षत्वविशेषणे गौरवादाह। उष्णपदं वेति भाष्ये नुष्णस्पर्शेत्यत्र प्रतियोगिकोटावुष्णपदमित्यर्थः। तथा च भाष्ये
नुष्णस्पर्शेत्यस्योद्भूतोष्णस्पर्शभिन्नस्पर्शपरतया विशिष्टभिन्नत्वेनानुद्भूतस्पर्शेपि लक्ष्य एवेति नातिव्याप्तिरिति भावः। ननु

गु.टि
९९
९९

ज्ञानत्वादेः सजातीयजनकवृत्तित्वेऽपि विजातीयजनकीभूतज्ञानादिवृत्तितया ज्ञानाद्यवृत्ति व्याप्तिविरहेऽपि द्वेषेऽतिव्याप्तिः
तस्य विजातीयाजनकत्वादुपायद्वेषं प्रति फलद्वेषस्य हेतुतया सजातीयजनकत्वाच्चेत्यत आह। इच्छावदिति। यथेच्छायाः
कार्यमात्रं प्रति हेतुत्वेन वाह्यगुणजनकत्वं तथा द्वेषस्यापि निवृत्त्याख्यफलद्वारा चीत्कारादिशब्दात्मकवाह्यगुणजनकत्वादि
त्यर्थः। ननु द्वेषस्य चीत्कारादिशब्दात्मकवाह्यगुणजनकत्वे मानाभावादत आह। द्विष्यान्यत्वं चेति। यद्यपि द्वेषस्य निवृत्तिज
नकतया विजातीयाजनकत्वमेव नास्ति कुतोऽतिव्याप्तिः न च ज्ञानादिभिन्नत्वे सति वृत्तिमत्त्वस्यापि प्रवेशादतिव्याप्तिरिति वाच्यं
तद्भेदप्रवेशे प्रयोजनविरहात् तथापि ज्ञानसुखदुःखानां प्रत्येकं भेदप्रवेशे गौरवात् तत्समवेतत्वावच्छिन्नप्रतियोगिता
कभेद एव प्रवेशनीयस्तथा च वृत्तिभेदोऽपि प्रविष्ट इति भावः। गुरुत्वादीति। आदिना द्रवत्ववेगस्थितिस्थापकपरिग्रहः। ननु
गुरुत्वादेरपि स्वनिष्ठगुणत्वव्याप्यजातिमदन्यस्य पदसमवायिकारणं तद्वृत्ति भवत्येव तस्य द्रव्यवृत्तित्वादित्यत आह।
फलत इति। गुरुत्वाद्यवृत्ति व्याप्तिवारणरूपफलनिर्वाहायेत्यर्थः। इत्थं च गुरुत्वत्वादिजातेस्तादृशजातिमदन्यपतनाद्यस

राम
९९

३

समवायिकारणवृत्तित्वान्नातिव्याप्तिरिति भावः। स्वनिष्ठत्वेन गुणत्वव्याप्यजातेरविशेषणे संभवः रूपत्वादेर्गुणत्वव्याप्य
गंधत्वादिजातिभिन्नावयवविरूपासमवायिकारणावयवरूपवृत्तित्वादिति हृदयं एकत्वत्वादेरिति केचिदिति तत्र मते को ग्रन्थः
स्वनिष्ठगुणत्वव्याप्यजातिभिन्नत्वे सति भिन्नत्वेन तादृशजातिसामान्याभावः स्वनिष्ठत्वस्य वैयर्थ्यप्रसंगात् गुणत्वव्या
प्यजातिभिन्नं गुणमपि न समवेतत्समवायिकारणत्वस्य रूपादौ बाधितत्वेनासंभवाभावात् किंतु स्वनिष्ठगुणत्वव्याप्यजा
तिप्रतियोगिकोऽभावः तथा चैकत्वादावव्याप्तिः एकत्वत्वादेः स्वनिष्ठगुणत्वव्याप्यएकत्वत्वादिजातिभिन्नद्वित्वाद्यसमवायि
कारणैकत्वादिवृत्तित्वादतः स्वनिष्ठगुणत्वव्याप्यत्वत्र गुणत्वव्याप्यपदं गुणत्वसाक्षाद्व्याप्यपरं व तत्व्याप्तिरिति केचिदाहुरिति
समुदायार्थः। एकत्वत्वादेरित्यादिना एकपृथक्त्वत्वस्य रूपादिपरिग्रहः। द्वित्वादीत्यादिना द्विपृथक्त्वत्वविभक्त रूपादिपरिग्रहः
केचिदित्यनेनास्वरसः सूचितः तद्वीजं तु भिन्नत्वं यदि स्वनिष्ठगुणत्वव्याप्यजातिप्रतियोगिकोऽभावस्तदा वंध्यप्रतियो
ग्यसमानाधिकरणत्वेनाभावो विशेषणीयः अन्यथा वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादाय असंभवापत्तेः त

गु.शि.
१००
100

प्याच प्रतियोग्यसमानाधिकरणत्वसाक्षात्वयोः प्रवेशे गौरवं स्वनिष्ठव्याप्यपदयोर्वैयर्थ्यं च प्रतियोगिव्यधिकरणगु
णत्वाभाववद् समवायिकारणवृत्तित्वस्यैव सम्यक्त्वादिति अखंडाभाव इति। अपरे तु स्वनिष्ठगुणत्वव्याप्यजाति
मन्येत्वत्र अन्यत्वं सामान्याभाव एवं वा तेनैकत्वादावव्याप्तिः अखंडाभावतया चैनं स्वनिष्ठपदव्याप्यपदयोर्वैयर्थ्यमित्या
हुरित्यर्थः। इदमपि न सम्यक् अखंडाभावतया वैयर्थ्याभावेऽपि निष्प्रयोजनकत्वात्। द्वितीयगुणत्वव्याप्यपदवैयर्थ्या
द्वेत्यतो परे त्विति त्युक्तं स्वनिष्ठेति स्वनिष्ठव्याप्यजातिमन्यत्वं च तादृशजातिसामान्याभावो वोध्यः। अन्यथैकत्वादौ एवं व
दव्याप्तिः व्याप्यजातिमन्यासमवायिकारणमप्रसिद्धं सामान्यादेरेव व्याप्यजातिमन्यतया तदसमवायिकारणप्रसिद्धेर
तः स्वनिष्ठेति स्वनिष्ठजातिमन्यासमवायिकारणेति कृते प्यप्रसिद्धिः असमवायिकारणमात्रस्यैव स्वनिष्ठसत्तारूप
जातिमदसमवायिकारणत्वादतो व्याप्येति जातिपदं समवायेन अन्यतालाभाय अन्यथाऽसंभवापत्तेः। स्वनिष्ठव्या
प्यजातिमन्यकारणवृत्तित्युक्तावप्यसंभवः रूपत्वादेरपि स्वनिष्ठव्याप्यजातिमन्यध्वंसज्ञानादिकारणवृत्तित्वादतोऽस

राम
१००

समवायीति परत्वापरत्वगुरुत्वादावतिव्याप्तिवारणाय समवायिकारणवृत्तीति जातिविशेषणं परत्वादेरपि ध्वंसद्वारानादि
कारणत्वादसमवायीति। जातिपदं समवायेन तद्वत्तालाभाय अन्यथा कालेऽतिव्याप्त्यापत्तेः गुणत्वशून्येति गुणत्वशू
न्यस्यापदसमवायिकारणं तदवृत्तीत्यर्थः गुरुत्वत्वादिवारणाय वृत्त्यंतं। असमवायिवारणाय गुणत्वशून्येति शेषं पूर्वव
त्। ननु सत्ताया अपि प्रमेयत्वादिव्याप्यतादास्थ्यलक्षणे व्याप्यपदेन वक्तुं सत्ताया वारणमत आह। आद्येति। जातिसमा
नाधिकरणाभावेति जातिपदं समवेतमात्रपरं जातित्वघटकनित्यत्वादिप्रवेशे प्रयोजनविरहात्। अभावश्च स्वसमवायिवृत्ति
वैध्याः स्वपदं व्याप्यत्वाभिमतजातिपरं अन्यथा सत्ताया अपि तादृशव्यधिकरणसंबंधवैशिष्ट्यव्यासज्यवृत्तिधर्मा
वच्छिन्नाभावप्रतियोगितया व्याप्यत्वापत्तेः एतस्य गुरुत्वादाह। सत्तान्यत्वेति। ननु कर्मत्वगुरुत्वत्वादीनामप्यसमवायि
कारणवृत्तित्वादेकवृत्तिमात्रवृत्तित्वाज्जातिव्याप्तिरित्यत आह। अप्रसिद्धेति। अप्रसिद्धिवारणार्थकं स्वनिष्ठपदं मत्वदले
तदुपादानादेवेत्यर्थः। अप्रसिद्धिवारकस्वनिष्ठपदघटितावृत्त्यंतदलोपादानादेवेति फलितार्थः। स्वनिष्ठपदस्यापि व्या

गु.टी० वृत्तिं दर्शयितुमप्रसिद्धिवारकेति स्वनिष्ठपदविशेषणे यथाश्रुतं तु न संगच्छते स्वनिष्ठपदानुपादाने व्याप्यजातिशू
१०१ न्यासमवायिकारणाप्रसिद्ध्या कर्मगुरुत्वादिवृत्ति व्याप्तेरवासंभावितत्तया स्वनिष्ठपदोपादानस्य तद्वारकत्वासंभवा
101 त् कचिद्व सत्तान्यत्वं वा प्रसिद्धिवारणार्थं कमिति पाठः तदनंतरं छेदः तदनंतरं स्वनिष्ठपदोपादानादिव कर्मत्वगुरुत्वा
दीनां निरास इति पाठः। तत्र अप्रसिद्धिवारणार्थकमित्यस्य व्याप्यपदं विहाय स्वनिष्ठजातिशून्यासमवायिकारणेति
कृतिः समवायिकारणमात्रस्यैव स्वनिष्ठसत्तारूपजातिमदसमवायिकारणत्वादप्रसिद्धिः स्यादिति तद्वारणार्थं निरुक्त
व्याप्यत्वमित्यर्थः। ननु तथापि स्वनिष्ठपदं व्यर्थं व्याप्यजातिशून्यासमवायिकारणवृत्तित्वस्यैव सम्यक्त्वात् व्याप्यजा
तिशून्यपदेन व्याप्यजातिप्रतियोगिकाभाववद्विवक्षायै वाप्रसिद्धिवारणसंभवात् अप्रवृत्तित्वमपि वृत्तित्वप्रतियोगिका
भावो वक्तव्यः तेन तदसमवायिकारणवृत्त्यसमवायिकारणवृत्तिजातेरपि नाप्रसिद्धिरित्यत आह। स्वनिष्ठेति। स्वनिष्ठ
पदमनुपादाय विशेषाभावविवक्षणे कर्मत्वगुरुत्वत्वादिमादायातिव्याप्तिः स्यादिति भावः इति योजनीयं। कर्मत्वगुरुत्वत्वा

राम
१०१

५

दीनामित्यादिना वेगत्वद्रवत्वत्वस्थितिस्थापकत्वपरिग्रहः। संख्यात्वेतिश्रन्यथाद्वित्वद्विपृथक्त्वादावतिव्याप्त्यापत्तेरितिभावः।
एकत्वैकपृथक्त्वादौ च एकत्वत्वादिकमादाय लक्षणसंभवइतिहृदयं। ननुगुणत्वभिन्नासमवायिकारणवृत्तित्वं गुणत्वभि-
न्नसमवायिकारणवृत्तित्वावच्छिन्नप्रतियोगिताकोभेदः सचाप्रसिद्धः कर्मासमवायिकारणवृत्तित्वमपि स्पर्शगुरुत्वयोर्गु-
णत्वभिन्नसमवायिकारणवृत्तित्वस्याभेदप्रतियोगितानवच्छेदकत्वात् द्रव्यसमवायिकारणवृत्तेः संयोगत्वस्यापि कर्मास-
मवायिकारणवृत्तित्वादित्यत आह। द्वितीय इति फलितइति। कर्मासमवायिकारणवृत्तीत्युक्तावेव गुणत्वभिन्नेत्यस्य यत्क-
ल्पं गुरुत्वादावतिव्याप्तिवारणं तस्य निर्वाहादित्यर्थः। कर्मत्वादीति। कर्मत्वस्य गुणत्वभिन्नासमवायिकारणवृत्तित्वादितिभा-
वः। आदिना कर्मत्वव्याप्यजातिपरीग्रहः। ननु गुणत्वव्याप्यत्वं गुणत्वाभाववदवृत्तित्वे सति गुणत्वसमानाधिकरणत्वं तथा
च गुणत्वसामानाधिकरण्यमित्येवास्तु तावतैव कर्मत्वादिवारणात् किमव्यभिचरितत्वपर्यन्तेनेत्यत आह। गुणत्वाभा-
ववदवृत्त्यर्थकमिति। एवं च गुणत्वसमानाधिकरणत्वस्यात्राप्रवेशान्नैवैयर्थ्यमितिभावः। ज्यायइति। लघुत्वादि

गु. शि.
१०२

102

तिभावः। पूर्वोक्तेति। सुखदुःखध्वंसबलपुष्टिजीवनारोग्याभिघातोपलक्षकमित्यर्थः। अन्यथा रूपादेः ज्ञानितरस्य
स्वनिष्ठगुणत्वव्याप्यजात्या विजातीयस्य सुखदुःखध्वंसादेः कारणत्वादव्याप्त्यापत्तेरिति भावः। संग्रहजनकस्य स्नेह
स्यात्र लक्ष्यतात् पूर्वोक्तस्यापि संग्रहस्य परित्यागः। तादृशस्येति पूर्वोक्ताभिघाताभिन्नस्येत्यर्थः। अन्नाश्रयगुणस्येत्यं
तं विजातीयार्थः। तदन्यमात्रवृत्तित्वं तदवृत्तित्वे सति तदन्यवृत्तित्वं तत्र विशेष्यभागस्य वैयर्थ्यमाह। फलतस्तदवृत्तीरि
ति एकवृत्तिमात्रवृत्तित्वमनेकवृत्त्यवृत्तित्वे सत्येकवृत्तिवृत्तित्वं तत्रापि विशेष्यभागस्य स्वसाक्षात्कारध्वंसयोर्वारणायेदं वै
वैयर्थ्यमाह। अनेकवृत्त्यवृत्तीरिति परत्वापरत्वादावतिव्याप्ति वारणाय दूरयति। ता तद्धर्मेतरेतिहौ तद्धर्मेतरं भावज
(शिरोमण्युपलक्षणं) नकवृत्तीत्यर्थः। दीधितौ भावपदं नास्तीति हृदयं। अन्यविशेषणत्रयोजनं पूर्वोक्तमिति। अस्मदीयस्मानजात्यारंभकलक्ष
णोक्तेत्यर्थः। अत्रापि द्र[illegible]वत्वगुरुत्ववेगत्वस्थितिस्थापकत्ववारणाय कर्मासमवायिकारणत्वेन जातिविशे
षणीया एवमुक्त[illegible]स्पर्शनिष्ठानुद्भूतत्ववारणाय प्रत्यक्षत्वेनापि सा विशेषणीयेत्यर्थः। प्रकाशोक्तलक्षणे नमलस्वर णए

' स्वसाक्षात्कारध्वंसयोर्वारणायेदं)
१०२

सत्त्वसिद्धेश्चेतः स्वातन्त्र्येण सफलं व्याचष्टे। सफलमिति। सजातीयेति उभयारंभकेति प्रसंगवारणाय सत्यंतं अजनकेऽतिप्रसंग
वारणाय विशेष्यदलं। भावपदार्थध्वंसजनकपरत्वादौ नातिव्याप्तिः। ननु कार्यकारणान्यतरवृत्त्वे कार्य्यसमवायप्रत्या
सत्त्या यत्सजातीयजनकं तदन्यत्वं वाच्यमित्यनुशयादाह। फलेच्छेति। सत्यंतदलाभावाधीनामव्याप्तिमभिधाय
विशेष्यदलाभावाधीनामव्याप्तिमाह। वृद्धिधीरिति। इद्धादिनेत्यादिपदाद्द्वेषपरिग्रहः क्रियानुपहितप्रयत्नो नास्तीति न
तत्राव्याप्तिः। ननु भावजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वोक्तौ न तत्राव्याप्तिरतआह। द्वित्वादाविति। तस्य सजातीयाज
नकत्वात् ज्ञानपरिमाणजनकत्वेन भावजनकतोक्तेति भावः। आद्यादिना परत्वापरत्वादिपरिग्रहः। ज्ञानेतरेति। रूपादिसं
योगाद्यो इति प्रसंगवारणाय सत्यंतं ज्ञानेतरसविषयकाद्भिन्नं यत्सजातीयं तज्जनकवृत्तिगुणत्वव्याप्यजातिशून्य
त्वे सतीत्येवास्तु किं जातिघटनयेति वाच्यं। अवयवविरूपादावतिव्याप्त्यापत्तेः इच्छाद्वेषप्रयत्नाभ्यां अदृष्टद्वारा प्रयत्नयोः
फलेच्छाद्वेषाभ्यामुपाये इच्छाद्वेषयोर्जननात्तत्राव्याप्तिरितिभिन्नांतं सजातीयविशेषणं। ज्ञानस्यापि सविषयकभिन्नसजाती

२ सतीत्यर्थः। न च तादृशजातीयजनकताशून्यत्वे २

गु.टि
१०३
103

स्याजनकत्वात्तज्जातिव्याप्तिरिति ज्ञानेतरेति स्वविषयकविशेषणतयाद्ध्वंसं च ज्ञानस्य तादृशसजातीयज्ञानजनकत्वाज्जातिप्र
संगः ज्ञानेतरभिन्नसजातीयाजनकत्वोक्तौ रूपादावतिव्याप्तितादवस्थ्यं तस्य ज्ञानेतरभिन्नसजातीयाप्रसिद्धेः सजा
तीये त्वनुक्तौ च संभवः। सुखादेरपि ज्ञानेतरस्वविषयकभिन्नज्ञानध्वंसजनकत्वात् सा जात्यंशे गुणत्वन्यूनवृत्तिजात्या
वो ध्वंस। अन्यथा ज्ञानस्यापि गुणत्वादिना सुखादिसजातीयत्वादसंभवापत्तेः। सत्तामादायासंभववारणाय गुणत्व
व्याप्येति गुणत्वन्यूनवृत्त्यर्थकत्वे न गुणत्वमादाय नासंभवः। जातिपदं समवायेन स्वरूप्यतालाभाय। अन्यथा यत्किं
चित्संबंधेन स्वरूप्यतामादाय रूपादावतिव्याप्त्यापत्तेः सजातीयाजनकपरत्वादावतिव्याप्तिवारणाय स्वव्यधि
करणेत्यादि विशेष्यदलं। स्वव्यधिकरणयोग्यज्ञातत्वधर्मस्तदितराभावजनकवृत्तिर्यो गुणत्वव्याप्यजातिस्तद्वत्वे
तदर्थः। परत्वादेरपि ज्ञातत्वधर्मितास्य ध्वंसस्याजनकत्वादतिव्याप्तितादवस्थ्याच्चावेति स्वव्यधिकरणज्ञातत्वधर्मितर
स्य ध्वंसस्य जनकत्वादतिव्याप्तितादवस्थ्याच्चावेति स्वव्यधिकरणज्ञातत्वधर्मितरोजनकत्वमात्रोक्तौ तादृशभावानुप

राम
१०३

धायेव सुखादिव्यक्तावति व्याप्तिरतो जातिगर्भतावच्छेदकत्वसत्ताद्रव्यत्वादिकमादाय कर्मादावति व्याप्तिवारणाय गुण
त्वव्याप्येति गुणत्वमन्यूनवृत्त्यर्थकं। अन्यथा गुणत्वमादाय परत्वादावति व्याप्तितादवस्थ्या जातिपदं समवायेन तद्व
त्तालाभाय अन्यथा कालेति व्याप्त्यापत्तेः। ननु भावजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्येवास्तु किमितरं तेन भाव
विशेषणेनेत्यत आह। परत्वादीति। अन्यथा परत्वादेरपि स्वविषयकसाक्षात्कारात्मकभावजनकत्वादतिव्याप्त्या
पत्तेरिति भावः। सुखदुःखेति। इच्छाप्रयत्नयोः कार्यमात्रंप्रति कारणत्वेनैव ज्ञातत्वधर्मेतरभावंप्रति जनकत्वात्तल्लक्षणसं
भवः। द्वेषस्यापि निवृत्तिद्वारा ज्ञातत्वधर्मेतरपलायनादिक्रियाजनकत्वात्तल्लक्षणसंभवः। सुखदुःखयोरव्याप्तिः तयोः
स्वव्यधिकरणे यत्ज्ञातत्वधर्मेतरस्तस्याजनकत्वादित्यत आह। ज्ञातत्वधर्मविशेषणमिति इत्थं च स्वसमानाधिक
रणेच्छादिजनकत्वमादायैव तत्र लक्षणसमन्वय इति भावः। न च स्वव्यधिकरणे तदभावजनकवृत्तीत्येव सम्यक् किं
ज्ञातत्वधर्मेतरेत्यनेनेन तावतैव परत्वापरत्वादिवारणात प्रयत्नस्य स्वप्रत्यक्षजनकत्वादेव लक्षणसंभवादिति वाच्यं। अ

४सुज्ञातत्वधर्मातिरिक्तभावाजनकत्वात्तद्विशेषणाज्ञानेऽपयग्रहो नस्यादितिभावः। ननुतथापि सुखदुःखयो ४

गु. शि.
१०४
104

स्वं ऽभावे वैयर्थ्याभावात् न च तत्पापि निष्प्रयोजनकमेवेति वाच्यं । तदनुपादाने मलेऽप्रयत्ने ज्ञिशाया जनकत्वमादाय
लक्षणे ऽप्रपादनानुपपत्तेः । ज्ञिया याः प्रयत्नव्यधिकरणत्वात् तत्स्थं चेति स्वव्यधिकरणत्वस्य ज्ञात धर्मविशेषणत्वे वै
यर्थ्यं । इच्छाद्वेषाजनकत्वेति । सुखदुःखज्ञानयोरेव तज्जनकत्वादिति भावः । न क्षतिरिति । नाव्याप्तिरित्यर्थः । स्वविष
य क प्रत्यक्षजनकत्वादेव तत्र लक्षणसंभवादिति भावः । नातिप्रसंग इति । सत्यं तदलस्यैवाभावादिति भावः । स्वत्रयस्या
धर्मजनकत्वादिति पाठः समानाधिकरणधर्माधर्मजनकत्वादिति पाठे समानाधिकरणपदं स्वरूपकथनं अतिप्रसंगा
भावे सजातीयजनकत्वस्यैव तंत्रतया सामानाधिकरण्यविशेषणस्य व्यर्थत्वादिति ध्येयं । ननु श्रेणाप्रवृत्यपरमा
पूर्वं जनकाव मते धर्मस्य धर्मजनकत्वं ~~नास्तीति वाच्यं सजातीयजनकत्वं हि प्रत्यक्षमसाधारणकारणत्वं वक्तव्यं~~
मेवेति प्रधर्मस्याधर्मजनकत्वमानाभावः । न चादृष्टत्वेनाधर्मस्य कार्यत्वावच्छिन्नं प्रति कारणत्वेन धर्मजनकत्व
मप्यस्तीति वाच्यं । सजातीयजनकत्वं हि प्रवश्यमसाधारणकारणत्वं वक्तव्यं अन्यथा सुखदुःखयोरपि कालत्वे

राम
१०४

८

२ द्वारा चाक्षुषादिजनकत्वनत्सुखादेर्विषयतया ज्ञान ३

नसुखदुःखंप्रतिकारणत्वेनाव्याप्त्यापत्तेः किंच संस्कारत्वजात्यनंगीकर्तृनये भावनात्वमात्मनो भावनाया मतिव्याप्ति
रतश्चाह । प्रत्यक्षत्वेनेति चरमजातिरित्यर्थः । प्रकाशकत्वं धारयति । वक्ष्यत इति । ननु चक्षुरादेः संयोगादिनिष्ठज
नकतावच्छेदकत्वेपि संयोगाद्यनिष्ठजनकतावच्छेदकत्वेपि संयोगाद्विषयजनकत्वं न विरुद्धमित्यतो भावार्थमाह । ज्ञान ३
पुत्रसुखस्येति । पितृपरोक्षत्वात्पितुः पुत्रसुखे लौकिकसंनिकर्षाभावेन लौकिकप्रत्यक्षाविषयत्वात् । ज्ञानयोरेवे
ति ज्ञाने चाव्याप्तिव्यातएवेत्यर्थः । अतीन्द्रियमात्रावृत्तित्वस्य ऐन्द्रियकावृत्तित्वे सतिपदं तीन्द्रियवृत्तितदन्यत्वरू
पस्य प्रवेशे गौरवादाह । ऐन्द्रियकेति । संस्कारत्वगुणत्वकर्मत्वादीनामात्मगुणमात्रवृत्तिपदेनैव वारणाद्विशेषपद
गुणत्वव्याप्यपदयोर्वैयर्थ्यात्लक्षणद्वयपरतया व्याचष्टे । गुणत्वशब्दस्येत्यादिना । गुणत्वेत्यत्र गुणशब्दस्येत्यर्थः । सुख
त्वादेः संग्रहवारणायाह । तन्मात्रवृत्तित्वमिति । मात्रवृत्तित्वस्यापि सामानाधिकरण्यघटितत्वे सुखादेः संग्रहः स्यादित्यत
आह । तत्समानाधिकरणेति भावना तत्समानाधिकरणेत्यर्थः । ऐन्द्रियकवृत्तीति ऐन्द्रियकवृत्ति रूपवज्ज्ञाने तरात्मगुणमा

गु॰शि॰टी॰ तद्वृत्तिर्या जातिस्तद्वत्वमर्थः । धर्मत्वाधर्मत्वभावनात्वमादायातिव्याप्तिवारणायैन्द्रियकवृत्तीति । द्रव्यादावतिव्याप्तिवार

१०५ णाय द्वितीयवृत्त्यन्तं । तत्र ज्ञानेऽतिव्याप्तिवारणाय ज्ञानेतरेति गुणविशेषणं रूपादावतिव्याप्तिवारणायात्मेति

105 संस्कारत्वगुणत्वसंख्यात्वादिवारणाय मात्रेति ज्ञानान्याऽऽत्मगुणान्यावृत्तिरित्यर्थः । जातिपदं समवायेन तद्वत्ता

लाभायैन्द्रियकेति संख्यात्वपरिमाणत्वादिकमादायातिव्याप्तिवारणाय विशेषेति संस्कारत्ववारणाय भावने

त्यादिऽभावः प्रतियोगिव्यधिकरणो बोध्यः । तेन संस्कारत्वस्य भावनानिष्ठविशिष्टाभावादिप्रतियोगित्वेपि न क्षतिः

ऽन्यत्सर्वं पूर्ववत् । ऐन्द्रियकवृत्तित्वापेक्षया जातेरैन्द्रियकत्वविशेषणं लघिष्ठत्वमभिप्रायेणाह । ज्ञानान्येति । योग्यत्वमैन्द्रि

यकत्वं लौकिकसाक्षात्कारविषयत्वमिति यावत् । मात्रापि प्रवेशे गौरवादाह । ज्ञानेति संस्कारत्वादिवारणाय प्रत्यक्षेति

आत्मगुणविशेषणं आत्मपदं पक्षस्य प्रत्यक्षत्वेप्यपक्षत्वावृत्तीत्यपि बोध्यं । आत्मसंयोगादेरप्रत्यक्षत्वात् संयोगादे

नातिव्याप्तिरितितु ज्यायः इति । इतितु पूर्वलक्षणद्वयादपि ज्यायः इत्यर्थः । ततो लघुत्वादिति भावः । तादृशेति ज्ञानभिन्नेत्यस्य राम

१०५

रविशेषगुणजातीयपरमित्यर्थः। अन्यथा ज्ञानभिन्नो य ईश्वरविशेषगुणस्तदन्यत्वमस्मदादीच्छादीनामपीति तत्रा
तिव्याप्तिः स्यादिति भावः। लाघवादाह। इच्छाप्रयत्नेति। इच्छाप्रयत्नयोरेव ज्ञानभिन्नेश्वरविशेषगुणजातीयत्वादिति भा
वः। सुखदुःखद्वेषाणां तु सजातीयाजनकत्वादेव निरास इति हृदयं। एकस्या इति एकत्वस्य सजातीयैकत्वादिजनक
त्वेपि ज्ञानेतरविजातीयजनकत्वात् द्वित्वादेश्च विजातीयपरिमाणजनकत्वेपि सजातीयजनकत्वादित्यर्थः। न क्षतिः
नातिव्याप्तिः। ननु एकस्यैव कपालैकत्वस्य घटैकत्वजनकत्वात् घटकपालतुद्वित्वजनकतया च एकस्या अपि सं
ख्याव्यक्तेः सजातीयविजातीयोभयजनकत्वमस्त्येवेत्यत आह। गुणत्वेति। वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्व
रूपस्य स्वविजातीयत्वस्येत्यर्थः। गुणत्वसाक्षाद्व्याप्यत्वं तु गुणत्वव्याप्यजातिव्याप्यत्वमात्रेण तु गुणत्वव्याप्यजात्यव्या
प्यत्वे सति गुणत्वव्याप्यत्वं विशेष्यदलवैयर्थ्यात्मलेपतनमादाय गुरुत्वे लक्षणसंगमनस्यासंगतत्वापत्तेश्च। केचित्तु।
विजातीयत्वं स्वनिष्ठगुणत्वसाक्षाद्व्याप्यजातिभिन्नत्वं तत्साक्षाद्व्याप्यत्वं च तन्न्यूनवृत्तित्वमित्याहुः। तदसत्। ध्वंसजनकता

गु.टि

१०६

106

सामानाय रूपादावतिव्याप्तिप्रसंगात् गुणत्वव्याप्यपदेन गुणत्वन्यूनवृत्तित्वलाभसंभवेन साक्षात्पदवैयर्थ्यप्रसंगाच्चाश्रयपदे
ति। स्वावृत्तिजातिमत्त्वस्य स्ववृत्तियत्किंचिज्जातिशून्यत्वे सति समवेतत्वस्य वा स्वविजातीयपदार्थत्वमित्यर्थः। एकस्मादेवे
तिइदमुपलक्षणं पाकजनीलादिव्यक्तेर्नीलजनीलादिजनकत्वादपि रूपादावतिप्रसंगो बोध्यः। यद्वीत्या जातिपरत्वप
क्षे वेगस्थितिस्थापकयोरतिव्याप्तिः स्यादित्यावृत्तिपरत्वपक्षेपीत्यत आह। समुच्चय इति। व्यक्तिपरतापक्षे समुच्चय
इत्यर्थः। प्रप्रसंग इति कर्मजनकतासामानाधिकरण्यप्रसंग इत्यर्थः। तस्येति। स्वाश्रयसमवेतविशेषगुणत्वेति इष्टव्याप्तिमत्
त्वस्येत्यर्थः। एतस्याभिहितस्येत्यस्य विशेष्यं उभयारंभकेति संयोगादीत्यर्थः। विवक्षणीयस्येति भाष्यस्य स्वाश्रयस
मवेतारंभकपदेन विवक्षणीयस्येत्यर्थः। तत्संग्रहार्थं बुद्धिसंग्रहार्थं परसमवेतेति परसमवेतविशेषगुणानारंभ
कत्वे सति स्वाश्रयसमवेतारंभकाभिप्रायकत्वादित्यर्थः। अन्यथा स्वसमानाधिकरण [redacted] सुखदुःखात्मकविशे
षगुणारंभकधर्माधर्मयोः स्वसमानाधिकरणधर्माधर्मसुखदुःखजनकप्रयत्ने चातिव्याप्तिरिति भावः। प्रत्यक्षणुका

राम

१०६

द्विपरिमाणजनके परमाणुवृत्तिद्वित्वादावतिव्याप्तिवारणाय विशेष्यदले स्वाश्रयसमवेतपदं एतच्च व्यक्तिपरत्वपक्षेऽतः
जातिपरत्वपक्षे विपरसमवेतविशेषगुणजनकावृत्तिस्वाश्रयसमवेतजनकवृत्तिजातिमत्त्वस्य तदभिप्रेतत्वादन्यथा धर्म
धर्मप्रयत्नेष्वतिव्याप्तेः अणुपरिमाणत्वनैमित्तिकद्रवत्वान्यतरत्वस्य वारणाय विशेष्यदले स्वाश्रयसमवेतपदमिति
ध्येयं। तच्च विवक्षणीयमिति। एतदतिव्याप्तिवारणायैव विशेषगुणत्वविवक्षणीयापि तात्पर्यः। तयोरिति प्रसंगात जातिपर
त्वपक्षे तयोरिति प्रसंगस्य दुर्वारत्वात् नवसंस्कारत्वस्य परसमवेतस्वप्रत्यक्षात्मकविशेषगुणजनकवेगवृत्तित्वात्कु
तस्तदाद्यजातिपरत्वपक्षेऽतिव्याप्तिरिति वाच्यं एतदस्वरसेनैव बुद्धिशब्दयोरव्याप्तिश्चेति वक्ष्यमाणत्वादिति भावः।
स्वित्वस्त्वेर्थ इति। तथाच व्याप्तिपरत्वायामित्यस्य परसमवेतविशेषगुणानुपधायकत्वे सति विशेषगुणोपधायकत्वाप
रत्वापत्तिः तात्पर्यः। जातिपरत्वे चैतस्य परसमवेतविशेषगुणजनकावृत्तिजातिमत्त्वपरत्वे चैतत्तात्पर्यः। अतिव्याप्तिरित्यस्य
स्वसमानाधिकरणस्मरणजनकभावनावृत्तिसंस्कारत्वमादायातिव्याप्तिरित्यर्थ इति भावः। एवं सति तात्पर्यमितिग्रपस्या

गु.टि
१०७
107

नुपयुक्तत्वात्प्रकारान्तरेणतदवतारयति।नन्विति।ननु विशेषगुणत्वस्येति तथाच विशेषगुणत्वप्रवेशादेव व्यावृत्तेः परत्वापक्षे
न तयोरतिव्याप्तिरिति प्रकाशाभिप्रायः पूर्वोक्तास्वरसेनैव बुद्धिशब्दयोरव्याप्तिरित्यपि प्रकाशोऽवतरणीय इति भावः। यथा
श्रुतलक्षणस्य संस्कारत्वमादाय वेगस्थितिस्थापकयोरतिव्याप्तत्वात् अनित्यगुणवृत्तित्वे गुणपदस्यैव यथाश्रुतं स्वपर
तया व्यावृत्तेः पदनित्यपस्युगुणइति। ननु सतिसप्तम्याः सामानाधिकरण्यार्थकत्वात् स्वव्यधिकरणतादृशगुणजनका
नित्यावृत्तित्वं जातिमतो विशेषणं लभ्यते। तथाच परमाणुरूपादावतिव्याप्तिः तस्यतादृशजनकानित्यावृत्तित्वादत
आह। जातीति। तथाच रूपत्वादेरतथात्वान्नातिव्याप्तिरिति भावः। ज्ञानभिन्नपदस्य व्यावृत्तिमाह। शब्दस्येति। शब्दादेरित्य
र्थः। कृतिभिन्नेति दर्शितं विनेत्युक्तौ कृतेरपि मेयविधानादिवादेव शब्दादिविशेषगुणजनकत्वात्तज्जातिप्रसंगः स्यादिति कृ
तभिन्नत्वमुक्तं नक्षतिः। नाव्याप्तिः नकृतिर्द्वारमिति शब्दादिरूपविशेषगुणजनने इत्यर्थः। तेन तत्र समानाधिकरण धर्मा
धर्म सुखदुःखजनकत्वसत्वेपि [redacted] नातिव्याप्तिरिति भावः। धर्मेति। तथाचावृत्तं तदलाभावादेव तत्र नातिव्याप्तिरिति

राम
१०७

भावः। तादृश जनकेति कार्यमात्रं प्रत्येव भगवज्ज्ञानत्वादिना साक्षाज्जनकत्वादिति भावः। संस्कारत्वेति। अन्यथा सं
स्कारत्वस्यापि तादृशानित्यावृत्तितया ज्ञानभिन्नपदेतरभावनाख्यात्मवृत्तिविशेषगुणजनकभावनावृत्तितया तद्वृत्तिवेगा
दावति व्याप्तिः स्यादिति भावः। परिमाणत्वादौ त्वादिपदात् पृथक्त्वगुरुत्वत्वादेः परिग्रहः। ज्ञानभिन्नेतीति द्वितीयज्ञा
नभिन्नेत्यर्थः। एवमपीति ज्ञानभिन्नेति विशेषगुणविशेषणे भावनाया ज्ञानभिन्नगुणजनकत्वात् अव्याप्तिरित्य
र्थः। इदमुपलक्षणं संस्कारत्वबाधक वेगावृत्तित्वदलवैयर्थ्यं च तस्य वृत्तित्वदलाभावेनैव वारणादिति द्रष्टव्यं। मिथ्या
ज्ञानवासनायाः मिथ्याज्ञानजन्यवासनायाः मिथ्याज्ञानजन्यवासनाया धर्माधर्मजनकत्वे मानाभावात्। विहित
निषिद्धकर्मण एव धर्माधर्मजनकत्वात् तत्त्वज्ञाने सति तत्त्वज्ञानस्य प्रतिबंधकत्वात् प्रागभावाभावाद्वा धर्माधर्मा
नुत्पत्तेरतश्चाह। भावनायाइति। भावनाया भावनाजनकत्वे मानाभावादाह ज्ञानेति। तथा च स्मृतिजनकत्वादेव न भा
वनायामव्याप्तिरिति भावः। न तथा नाव्याप्तिः परिमाणादौ त्वादिना संख्यागुरुत्वपरिग्रहः। ज्ञानपदेनेति द्वितीयेनापि

गु.शा. ज्ञानपदेनात्मधर्मोपलक्षणे सुखादेरात्मधर्मेतराजनकत्वादव्याप्तिः स्यादित्यर्थः सुखादीत्यादिपदात् दुःखद्वेष
१०८ भावनापरिग्रहः। ज्ञानेच्छयोस्तु भगवज्ज्ञानेच्छामादायैव लक्षणसमन्वयसंभव इति भावः। विशेषगुणेति द्वितीयविशे
ज्ञा२ षगुणेत्यर्थः। नन्वेवं द्वितीयं [illegible]नभिन्नपदं व्यर्थं घटादिसंस्कारादेः स्वप्रत्यक्षजनकत्वेपि स्वाश्रयसमवेतविशेषगुण
108 जनकत्वाभावादेव निरासात् अत आह तत्स्वाधिकपति। आत्मेति। ननु तथापि तयोः सुखादिजनकत्वादतिव्याप्तिर्दु
वारेत्यत आह। तयोश्चेति। आत्मैकत्वमहत्त्वयोश्चेत्यर्थः। ननु अभिघातात्मकतेजःसंयोगेनापि पाकजननात् त
स्य च स्वव्याधिकरणशब्दजनकत्वादवृत्तं तदलेनैव तन्निरास इत्यत आह। पारीरात्मेति। न चात्ममनोयोगवृत्ति
वैजात्यस्वीकारादेव वक्ष्यमाणेति प्रसंगनिरासे किं तत्रवैजात्यस्वीकारेणेति वाच्यं विनिगमकाभावात् कारणतावच्छेद
कलाघवानुरोधाच्च उभयत्रैव जातिस्वीकारादिति भावः। कर्मजन्यतावच्छेदकजात्या संकरभिया तदनुपगमे त्वाह। आ
त्मेति। ननु जातिभेदमानाभाव इत्यत आह। तत्संयोगमात्रस्येति। तेजःसंयोगमात्रस्यात्ममनःसंयोगमात्रस्येत्यर्थः। त

एतस्य त्रियामात्रैजन्यत्वान्नसंभव इति भावः ॥१॥
अवयवाभावादात्ममनसोरिति ॥

राम
१०८

प्यात्वेपाकजनकत्वे ज्ञानसुखादिजनकत्वेऽप्रतिप्रसंगादिति। यथाकथंचित्तेजःसंयोगा[redacted]दृष्टाद्युत्पत्तिप्रसंगात् सु
षुप्तिकालेप्यात्ममनःसंयोगसत्वात् ज्ञानसुखाद्युत्पत्तिप्रसंगाच्चेत्यर्थः। विजातीयात्ममनःसंयोगविरहादेव न ज्ञाना
द्युत्पाद इति भावः। नन्वेवं संस्कारत्वस्य वेगवृत्तित्वात् भावनात्वस्य गुणत्वसाक्षाद्व्याप्यताभावात् भावनायामव्याप्तिर
त आह। गुणत्वसाक्षाद्व्याप्यत्वं चेति भावनात्वस्य साक्षाद्व्याप्यत्वसंपादनाय संस्कारत्वान्येति सुखत्वादेरपि गुणत्वव्या
प्यज्ञानसुखान्यतरत्वव्याप्यत्वादुक्तं। जातीति यत्नेतरोयः प्रत्यक्षगुणस्तत्त्वव्याप्यजातिमद्विभुविशेषगुणत्वमित्य
र्थे ज्ञानेच्छाभावनादावव्याप्तिः तत्रैकतादृशजात्यभावात्। अतो व्याचष्टे। यत्नेतरस्मिन्निति वृत्तित्वप्रवेशे गौरवादाह।
यत्नेतरप्रत्यक्षेत्वेतिप्रथमाद्विवचनं सामानाधिकरण्येन तादात्म्येन प्रकाशकारोक्तलक्षणस्य वक्ष्यमाणव्याख्यानु
सारेत्वेवमलंयोजयति। मलइति। मध्यमिति पदमाणं तादृत्यनंतरमध्याहार्यमित्यर्थः। तेनात्मपरिमाणस्य स्वाश्र
यस्वप्रत्यक्षजनकत्वे स्पर्शस्य स्वाश्रयेपि घातजनकत्वेपि नाव्याप्तिरिति भावः। शेषइति। परत्रैवेत्यनंतरमध्याहार्यं

गु.वि
१०९
109

इत्यर्थः। प्रकाशं व्याचष्टे। समानाधिकरणेतीति। शब्दत्वादीति शब्दत्वस्यान्त्यशब्दे समानाधिकरणजनकवृत्तावपि
न तन्मात्रवृत्तित्वमिति व्यवच्छेदः। आदिना बुद्धित्वसंयोगत्वादिपरिग्रहः। त्रित्वद्वित्वविभागादिजनकवृत्तित्वेऽपि समाना
धिकरणजनके ~~[illegible]वपि न तन्मात्रवृत्तित्वमिति व्यवच्छे~~ मात्रवृत्तित्वाभावात् इति भावः। तादृशमात्रवृत्तित्वं यदि स्व
समानाधिकरणजनकावृत्तित्वे सति स्वसमानाधिकरणजनकवृत्तित्वमुच्यते तदा विशेष्यदलवैयर्थ्यमत आह।
ज्ञानेति। समानाधिकरणेत्यस्य स्वसमानाधिकरणेत्यर्थः। ज्ञानाभिघातभिन्नेत्यस्य फलमाह। भिन्नान्तेति। परिमाणत्वे
ति। अन्यथा त्वपरिमाणस्य स्वसमानाधिकरणज्ञानजनकत्वात् स्पर्शस्य स्वसमानाधिकरणाभिघातजनकत्वात् प
रिमाणत्वस्पर्शत्वयोः संग्रहो न स्यादिति भावः। स्पर्शस्य नोदनं प्रत्यपि जनकत्वस्य वक्ष्यमाणत्वाद् अभिघातपदं संयोगसामा
न्यपरं बोध्यं एवमुत्तरत्रापरत्वादिनापीति। यौवनादिभेदेनेति भावः। द्वित्वत्वादीति। आदिपदात् त्रित्वत्वादिपरिग्रहः। सजाती
यजनकवृत्तीत्यत्र सजात्यं परिच्छिन्नजात्या गुणत्वव्याप्यजात्या वा विवक्षितं। नाद्यः। परत्वादावतिव्याप्तेः। तस्मादपि गु

राम
१०९

णत्वादिना सजातीयस्य ज्ञानस्य जनकत्वान्नात्यः। गुणत्वंपदव्याप्यपदवैयर्थ्यादित्यत आह। साजात्यं चेति। प्रथमसाजात्यंच
गुणत्वव्याप्यजात्यैवेति भावः। पृथिवीत्वादीति। पृथिव्यादेर्गुणत्वव्याप्यजात्यासजातीयाप्रसिद्ध्या तस्यापि समानाधि
करणसजातीयजनकावृत्तित्वात् सत्ताव्याप्यव्याप्यपृथिवीत्वादिना सजातीयो घटादिः तज्जनककपालादिवृत्तित्वाच्चेति भावः
। आदिपदाज्जलत्वादिपरिग्रहः। गुणत्वव्याप्येतीति गुणवृत्त्यर्थकं इति शेषः। ननु पृथिवीत्वादेः कर्मजनकवृत्तितया वक्ष्यमा
णकर्मजनकावृत्तित्वरूपविशेषणदलेनैव वारणात् कृतं गुणत्वव्याप्यपदेन किंच गुणत्वव्याप्यजात्या साजात्यमात्रविवक्ष
येव पृथिवीत्वादेर्वारणसंभवेन सत्ताव्याप्यव्याप्यजात्या साजात्यं विवक्षयित्वा तद्वारणाय यथोक्तगुणवृत्तित्वप्रवेशो न
युक्तः प्रक्षालनाद्धीति न्यायात् तद्रूपस्वरसादाह। वस्तुतस्त्विति। तत् गुणत्वव्याप्यपदं वेगत्वेति। संस्कारत्वस्य सजातीयभा
वना जनकभावनावृत्तित्वादेव वारणमिति भावः। ननु कर्मजनकावृत्तीति जातिविशेषणत्वे स्पर्शे व्याप्तिः तस्य कर्मजनक
त्वादित्यत आह। स्पर्शस्त्विति। तस्य कर्मजनकत्वेप्यव्याप्तिं परिहरति। कर्मेति। कर्मजनकत्वं कर्मासमवायिकारणत्वं च

त्त्वमित्यर्थः। तथा च स्पर्शस्य कर्मकारणत्ववादिमतेपि न तस्य कर्मासमवायिकारणत्वमिति नातिव्याप्तिरिति भावः। स्व
समानाधिकरणैकाश्रिताजनकत्वे सति जनकत्वं यथाश्रुतम् लार्थः संसंख्याद्यव्यक्तावतिव्याप्तं इत्यतो व्याचष्टे।
ज्ञानसुखदुःखेति। ज्ञानसुखदुःखभिन्नं यत्स्वसमानाधिकरणमेकाश्रितं तदजनकत्वे सति अनेकवृत्तिवृत्तिर्यो गुण
निष्ठाभावप्रतियोगिनी जातिस्तत्शून्यत्वे च सति ज्ञानधर्मेतरजनकत्वमित्यन्वयः। शब्दकर्मगुरुत्वाद्यतिव्याप्तिवार
णाय प्रथमं सत्यंतं एवं च तस्य स्वसमानाधिकरणशब्दवेगक्रियाजनकत्वान्नातिव्याप्तिप्रसंगः। जनकत्वं च कार्यत्वा
नवच्छिन्नजन्यताप्रतियोगिकजनकत्वं बोध्यं अन्यथा प्रयत्नेजन्यरूपादौ चाव्याप्तेः तस्य यत्नत्वेन कालत्वेन वा कार्य
मात्रं प्रतिजनकतया स्वसमानाधिकरणएकाश्रिताजनकत्वाभावात् लौकिकप्रयत्नस्य स्वसमानाधिकरणैकाश्रितज्ञा
नसुखदुःखजनकत्वाद्व्याप्तेर्वारणाय ज्ञानसुखदुःखेतरेत्येकाश्रितविशेषणं ज्ञानधर्मेतरेत्युक्तौ विहितनिषिद्ध
विषयकप्रयत्नेऽतिव्याप्तिः चेष्टाजनकत्वेन तत्र विशेष्यदलसत्वादतो ज्ञानसुखदुःखेतरेत्येकाश्रितंरूपादिजन

•+१ विशेषणं एवं च तत्र तादृशधर्माधर्मजनकत्वान्नातिप्रसंगः रूपादावपि ज्ञानसुखदुःखेतरैकाश्रित १

१करणाधि

कत्वादसंभवइतिस्वसमानाधिकरणैत्वेकाश्रितविशेषणं स्पर्शस्यस्वसमानाधिकरणघातादिजनकतयास्नेहस्यस्वसमाना
करण संग्रहजनकतयाप्रयत्नस्यापिस्वसमानाधिकरणसंयोगजनकतयाऽव्याप्तिरितिएकाश्रितेतिएकाश्रितत्वे
एकविनिरुक्तमेवसंख्यापृथक्त्ववारणाय द्वितीयंपरत्वंतत्त्वनाशगुणत्वमादायासंभववारणायप्रतियोग्यंतं जातिविशेष
णं अभावस्यस्वप्रतियोगिसमवायवृत्तिर्बोध्यः। क्वचित्प्रतियोग्यंतस्थानेगुणत्वव्याप्येतिपाठः तत्रगुणत्वव्याप्यत्वंगुण
त्वन्यूनवृत्तित्वं तेनगुणत्वमुपादाय रूपत्वरसत्वसुखदुःखजनकपरत्वादिवारणायज्ञानात् धर्मेतरजनकत्वमितितादृश
भावजनकत्वमित्यर्थः। जनकत्वंचकार्यतानवच्छिन्नजन्यताप्रतियोगिकजनकत्वंबोध्यं। अन्यथापरत्वादेरपिज्ञानात्
धर्मेतरभावजनकत्वमस्त्येवकालत्वेनतस्यकार्यमात्रंप्रत्येवकारणत्वात् लौकिकप्रयत्नेचचेष्टाजनकत्वमादाय
लक्षणसमन्वयः। द्वयमपीति। प्रथमदलस्योत्तरदलस्यापीत्यर्थः। प्रथमस्यतथात्वेफलमाह। अजनितपतनादि
विति सप्तम्यंतद्वयं चरमगुरुत्वादावित्यस्यविशेषणं तत्रप्रथमसत्यंतसत्वरूपचनायाघं सप्तम्यंतं ज्ञानात् धर्मेतरजनक

गु.दि
१११
।।।

त्वस्य च नायं द्वितीयं सन्नपपन्नमतं गुरुत्वादावित्यादिपदेनाजनितस्य पतनादेः जनितावयविद्रवत्वादेर्द्रवत्वादेरजनितेष्वादे
जनितद्वित्वादेर्बुद्धेश्चापरिग्रहः। चरमस्य तथात्वे फलमाह। अजनितरूपाद्यवितात। तत्त्वात्स्वावयविवृत्तिरूपादिकमितिभा
वः। लौकिकत्वमिति। तथात्वे प्रथमसत्त्वं तदलाभावात्तत्राव्याप्त्यापत्तेरितिभावः। लौकिकत्वं विहितनिषिद्धागोचरत्वं नन्वंसा
वयविरूपादावव्याप्तिः। अवयविरूपादिकं प्रतिरूपादेरवयवरूपत्वादिनैव जनकतया तस्य जातत्वधर्मेतरं प्रतिस्वरूपा
योग्यत्वादित्यत आह। अवयवीति। अवयविपदं जलपरमाणुरूपादेः पाकजरूपादेश्च व्यवच्छेदाय। अवयवित्वं स
मवेतत्वं तथा च समवेतवृत्ति रूपत्वेन कार्यतां स्वाश्रयसमवेतत्वसंबंधेन रूपत्वेन कारणतेतिभावः। न त्ववयवेति। अ
वयवत्वं द्रव्यसमवायित्वं अस्यावयविरूपादेः स्वरूपयोग्यत्वे रूपादिकथं न जनयतीत्यत आह। अवयविन इति। सम
वायिकारणविरहेणेति स्वजननीयरूपस्य समवायिकारणविरहेणेत्यर्थः। तथा च स्वाश्रयसमवेतत्वस्य कारणताव
च्छेदकसंबंधतया अंत्यावयविरूपस्य च स्वाश्रयसमवेतत्वसंबंधेन क्वाप्यसत्त्वान्न रूपादिजनकत्वमिति भावः। ननु परि

परमाण्ववयवाद्यसाधारणः ४)

राम
१११

महत्त्वेन

माणत्वेनावयविपरिमाणत्वेन न कार्यकारणभावः। किं तु विलक्षणमहत्वत्वेन विलक्षणदीर्घत्वत्वेन दीर्घत्वत्वेन च ता
था च ह्रस्वत्वाणुत्वयोरव्याप्तिः तयोर्नित्यधर्मे तदभावं प्रति स्वरूपायोग्यत्वादित्यत आह। परिमाणपदेनेति। तथा च ह्र
स्वत्वादेरलक्ष्यत्वान्नाव्याप्तिरिति भावः। ननु यदि महत्वत्वेन विलक्षणमहत्वत्वेन न कार्यकारणभावो नित्यस्येत्या
किंतु दिव्याप्तिस्तत्वेन आकाशमहत्वाडितोविमहत्वोत्पत्तिप्रसंगात् जन्यमहत्वत्वेन विलक्षणमहत्वत्वेन तदपरममहत्वे
ऽव्याप्तिः तस्य नित्यधर्मे तदभावं प्रति स्वरूपायोग्यत्वादत आह। जन्येति। नादृशी ह्रस्वत्वाणुत्वभिन्नं द्व्यणुकपरिमा
णेऽव्याप्तिवारणाय चेदं अव्याप्तिरिति। तयोर्नित्यधर्मे तदभावं प्रति स्वरूपायोग्यत्वादिति भावः। ननु महत्वत्वेन वि
लक्षणमहत्वत्वेन दीर्घत्वत्वेन विलक्षणदीर्घत्वत्वेन कार्यकारणभावात्तथावयविमहत्वदीर्घत्वमपि महत्वदीर्घत्वप्र
त्येव स्वरूपयोग्यमित्यत आह। महत्वादिनेति। फलोपधानेति। विलक्षणमहत्वाद्युपधायकत्वप्रसंगादित्यर्थः। नि
त्यस्य स्वरूपयोग्यस्य फलोपधायकत्वनियमादिति भावः। सिद्धांतोपं कते। जन्येति। तथात्वं महत्वादिजनकत्वं तदपे

ष्ट्यजन्यमहत्वमपेक्ष्यप्रतियोगितासंबंधेन प्रागभाववन्महत्वस्य जन्यमहत्वरूपत्वादितिभावः। द्रव्यवदिति। मतुवर्थः
सामानाधिकरण्यं तच्चनांशतः अवयविमहत्वादावित्यव्याप्तिरितिभावः। ननुद्रव्यवन्महत्वेत्यत्र मतुवर्थः सामानाधिक
रण्यं तद्घटकस्वसंबंधः समवायः समवायत्वं च नित्यसंबंधत्वं नित्यत्वं ध्वंसाप्रतियोगित्वं तथाचेदमपि गुरुतरमि
त्यत आह। समवायइति। पुनः। सिद्धांती शंकते स्पर्शवदिति। अत्रापि मतुवर्थः सामानाधिकरण्यं एतच्चांशत्वावयविसा
धारणमेवेति नाव्याप्तिरितिभावः। नियमेनेति। कदाचिदप्यजनकेन वर्तते यदि त्यर्थः। अलघोः अजनकव्यावृत्तरू
पादलघोः। तथात्वायोगादिति कारणत्वावच्छेदकत्वायोगादित्यर्थः। लघुत्वे अजनकसाधारणस्यैवावच्छेदकत्व
मितिभावः। लघुत्वादिति। द्रव्यवन्महत्वत्वादेः सामानाधिकरण्यस्य मतवर्थतया गुरुत्वादितिभावः। मूर्तमहत्व
त्वादेरिति। मूर्तवन्महत्वत्वादेरित्यर्थः समवेतत्वं मत्वर्थः। आदिना मूर्तवद्दीर्घत्वपरिग्रहः। नचप्रागभावत्वस्यासंब
द्धोपाधितया प्रागभाववत्वमूर्तत्वयोः समशरीरतया प्रागभाववन्महत्वत्वमपेक्ष्यमूर्तवन्महत्वत्वं न लघ्विति वाच्यं

प्रागभावत्वस्योपाधित्वेनानंतस्वरूपविशेषणानां तत्संबंधत्वादनंतप्रतियोगितानां मतत्वर्थसंबंधत्वाच्च प्रागभा
ववन्महत्वत्वस्य मूर्त्तविन्महत्वत्वमपि स्पर्शगुरुत्वात् मूर्त्तवदित्यत्र मतत्वर्थसमवेतत्वस्य समवायस्वरूपत्वेने
कत्वात् तद्गतिरिति भावः। एतच्च नित्यस्यैत्वादिव्याप्तिमभ्युपेत्य तदनभ्युपगमे तु महत्वत्वादिनैव जनकत्वमित्यवधेयं। न त्वपे
क्षाबुद्ध्यावति व्याप्तिः तस्यापि ज्ञानसुखदुःखेतरस्वसमानाधिकरणैकाग्निताजनकत्वात् ज्ञातत्वधर्मेतरघटादिवृत्तिद्वित्व
जनकत्वाच्चेत्यत आह। अपेक्षाबुद्धेरिति। न च स्वरूपयोग्यत्वे कथं न फलोपधानमिति वाच्यं। तत्पुरुषीयापेक्षाबुद्धिजं घटित
न्याने कसंख्यादिसामग्र्या तत्पुरुषीयात्मविशेषगुणोत्पत्तौ प्रतिबंधकत्वात्। न चैतत्पापित्वाद्युत्पत्त्यनंतरं कथं न सं
स्कारोपधानमिति वाच्यं। सर्वत्रैव धारावाहिकसंस्कारद्वयापत्त्याऽवश्यमिति संबंधेनैव ज्ञानस्य संस्कारजनकत्वादिति
भावः। न च ज्ञानत्वेन जन्येच्छात्वेन द्वेषत्वेन च कार्यकारणभावात् तत्र प्रथमस्यैतदलाभावादेवनातिव्याप्तिरिति
किंमेतावत्प्रयासेनेति वाच्यं। इच्छां प्रति तद्विशेष्यकतत्प्रकारकेष्टसाधनताज्ञानत्वेन तादृशोपायेच्छात्वेन सुखेच्छात्वे

४ अपेक्षाबुद्धावतिव्याप्तिः तस्याः संस्कारस्वरूपयोग्यत्वेमानाभावात्

गु॰ टी न सुखज्ञानत्वेन दुःखाभावविषयकेच्छात्वेन दुःखाभावगोचरज्ञानत्वेनत्वेवंरूपेण कार्यकारणभावस्यावश्यकतयातेन
११३ रूपेण कार्यकारणभावे प्रमाणाभावात् एवं द्वेषं प्रत्यपि तद्विशेष्यकतत्प्रकारकानिष्टसाधनताज्ञानत्वेन तादृशोका
113 यगोचरद्वेषत्वे न दुःखद्वेषत्वेन दुःखगोचरज्ञानत्वेनेत्येवंरूपेण कार्य्यकारणभावस्यावश्यकतयातेन रूपेणका
र्यकारणभावे मानाभावादित्ति निगर्वः। ननु तथापि उपेक्षाबुद्ध्यात्मकापेक्षाबुद्धावतिव्याप्तिर्दुर्वारेत्यत आह। एका
श्रितेति। ज्ञानत्वधर्मेतरजनकत्वज्ञानत्वधर्मेतरएकाश्रितजनकत्वं वक्तव्यमित्यर्थः। अपेक्षाबुद्धिश्च न तथा तस्या द्वित्वा
दिकं प्रत्येव जनकत्वादित्ति भावः। ननु तथापि परत्वापरत्वजनकापेक्षाबुद्ध्यात्मकापेक्षाबुद्धावतिव्याप्तिरिति वाच्यं।
एतदस्वरसेनेव प्रकाशकारीयलक्षणव्याख्यानानंतरं वस्तुतस्त्वित्यादिना लक्षणांतरस्यावश्यमाणत्वात् परत्वापर
त्वान्यत्वे नैकाश्रितं विशेषणीयमित्यपि केचित् द्वितीयपक्षत्वं तस्य व्यावृत्तिमाह। संख्येति। अलक्ष्यत्वेनेति निरासान्वयी
अव्याप्तिमिति अदृष्टजनकत्वेन प्रथमपक्षत्वं ताभावात् प्रसक्ताव्याप्तिमित्यर्थः। ननु धारकप्रयत्नेऽव्याप्तिः तस्य ज्ञानत

राम
११३

=एवं चद्वीधितौ प्रथमं जनकत्वमित्यत्र प्रथममिति पदं नास्तीति लभ्यते शेषेत्यादिकं द्वितीयजनकतायाः स्वरूपयोग्यतारूपाया विवरणमिति बोध्यं =४

धर्मेतरं प्रत्यसाधारणजनकत्वाभावादित्यत आह। धारकइति। तज्जनकेति चेष्टाजनने तात्पर्यः। आद्यैः संग्राह्यैः ननु त्वत्र रूपादाववाप्तिः। अत्र वयवि रूपत्वावच्छिन्नं प्रति रूपत्वादिना जनकत्वेन स्वसमानाधिकरणे स्वस्मिन्नेव तस्य स्वरूपयोग्यत्वात् एतत्ताहत्त्याभावेन फलानुपधानादित्य स्वरसादाह। वस्तुतस्त्विति। अजनितपतनादौ गुरुत्वादावतिव्याप्तिं निवारयति। कर्मेति। स्पर्शप्रयत्नयोः कर्मनिमित्तत्वाद समवायिपदं अजनितरूपादौ रूपादावव्याप्तिं निवारयति। दोषे चेति। ज्ञानत्व धर्मेतर जनकत्वमित्यत्रेत्यर्थः। जनकेति। ज्ञानत्वधर्मेतरेकास्मित जनके त्यर्थः। जनकत्वं च पूर्ववत्कार्यत्वानवच्छिन्नजन्यताप्रतियोगिकं ग्राह्यं तेन भगवद्ज्ञानेच्छयोः स्वसमानाधिकरणे काश्चित् कार्याप्रसिध्या प्रथमदलसत्वे विनाति व्याप्तिः। न च तथापि भगवद्यत्ने लौकिकप्रयत्नवृत्तियत्नत्वमादायातिव्याप्तिः विहितनिषिद्धगोरचत्वेन तस्यालक्ष्यत्वात् इति वाच्यं। स्वसमानाधिकरणे दृष्टानुपधायकप्रयत्नस्यैवात्र लक्ष्यत्वादेवं अस्मिन्कल्पे परिमाणसामान्यस्यैव लक्ष्यत्वमिति परिमाणत्वमादाय ह्रस्वत्वाणुत्वयोरविनाति व्याप्तिः। न च तथापि अप्रत्यशब्दे

गुणि॰ ११८ ११५

शब्दजनकशब्दवृत्तिशब्दत्वमादायातिव्याप्तिर्ज्ञानत्वधर्मेतरत्ववत्शब्दे तदत्वेनाप्येकाश्रितस्य विशेषणीयत्वात् । नन्वेवं
प्रथमसत्त्वं तद्वैयर्थ्यमिति वाच्यं । अदृष्टोपधायकयत्नवारणायैव तदुपादानादिति भावः ॥ केचित्तु शेषे च जनकवृत्तिजा
तिमत्त्वं वक्तव्यमित्यस्य शेषे चपकलोपधायकवृत्तिजातिमत्त्वं वक्तव्यमित्यर्थः । तथा च ज्ञानसुखदुःखेतरस्वसमाना
धिकरणैकाश्रितानुपधायकत्वे सति अनेकवृत्तिवृत्तिगुणत्वव्याप्यजातिमन्यत्वे च सति यत्परत्वापरत्वज्ञानत्व
धर्मेतरैकाश्रितोपधायकं तद्वृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणार्थः । इदं च शब्दजनकशब्दवृत्तिशब्दत्वमादा
यनांत्यशब्दे अतिव्याप्तिः शब्दजनकशब्दे प्रथमसत्त्वेनाभावात् शेषदलोऽउपधायकत्वप्रवेशान्नांत्यशब्दवृत्तिश
ब्दत्वमादाय शब्दमात्रेति व्याप्तिः । न चैवं शेषोपधायकलौकिकप्रयत्नवृत्तियत्नत्वमादाय विहितनिषिद्धगोचरयत्ने
ऽतिव्याप्तिः । तस्यापि लक्षणे मूलविरोधादिति वाच्यं ॥ तादृशप्रयत्नान्यत्वे सतीत्यनेनापि विशेषणीयत्वात् । न च संग्रह
भिघातानुपधायकस्नेहस्पर्शवृत्तिस्नेहत्वस्पर्शत्वमुपादाय निखिलस्नेहस्पर्शयोर्लक्षणसमन्वयसंभवात्प्रथमस

राम ११८

त्वं ते प्रतियोगिकोपावेकाश्रितत्वविशेषणं व्यर्थमिति वाच्यं। तस्यानुपादेयत्वात् विशेष्यदले एकाश्रितत्वलाभायैवम्
ले एकाश्रितपदोपादानादिति दीधितिकृतो निगर्वः इत्याहुः। प्रकाशमवतारयति। स्वत्वादिस्वसमानाधिकरणैक
वृत्तिजनकावृत्ति धर्मो ज्ञानेतरैकाश्रितस्य जनके वर्तते गुणत्वव्याप्या जातिः तद्वत्वमित्यर्थः संख्यात्वादिवारणं न सं
भवतीत्यन्यथा व्याचष्टे। विशिष्टेति। स्वसमानाश्रयैकवृत्तिजनकावृत्तीत्यर्थः॥ शब्दत्वादीति। अथादिना संस्कार
त्वगुरुत्वत्वादिपरिग्रहः। तत्र अदृत्वं ते स्पर्शत्वेति अन्यथा स्पर्शत्वेनाभ्यां स्वसमानाधिकरणमिथ्यात संग्रह
जननात्तत्संग्रहो न स्यादिति भावः। नन्वात्मापरिमाणस्य स्वसमानाधिकरणप्रत्यक्षजनकत्वात् प्रयत्नस्य
च स्वसमानाधिकरणैकवृत्तिस्वप्रत्यक्षधर्माधर्मसुखादिजनकत्वात् तयोरव्याप्तिरित्यत आह। यत्नत्वेति पूर
णीयमिति स्वसमानाश्रयैकवृत्तीत्यनंतरं पूरणीयमित्यर्थः। तथा च स्वसमानाश्रयैकवृत्तेरनात्मधर्मस्याजो
जनकस्तदवृत्तीत्यर्थः। विहितनिषिद्धविषयकप्रयत्नस्याप्येतन्मते लक्ष्यतादीदशापरलेप्यदोषइत्यग्रेस्फुटी

गु.टि
११५
115

भविष्यति। संस्कारत्वादेति। आदिना एषवृत्तित्वपरिग्रहः। ज्ञानेतरएकाश्रितमात्रवृत्तीति ज्ञानत्ववारणाय ज्ञाने
तरपदं संख्यात्वादिवारणाय एकाश्रितमात्रपदमिति भावः। ननु इच्छायामति व्याप्तिः। इच्छात्वस्यापि स्वसमानाधि
करणैकवृत्त्यनात्मधर्मजनकावृत्तित्वात्। ज्ञानेतरैकाश्रितमात्रवृत्तित्वात् इच्छायाः कार्यमात्रं प्रति जनकत्वेन जन
कवृत्तित्वाच्चेत्यत आह॥ जनकत्वं चेति। जनकवृत्तीत्यत्र जनकत्वमित्यर्थः। एवं विवक्षितो इच्छायामति व्याप्त्यभावं
स्फुटयति। इच्छाचेति। किंचित्प्रवृत्त्यादिकं तत्र च साक्षात्त्वविशेषणेनैव तद्वारणं साक्षाज्जनकत्वं च तज्जनकाजन
कत्वे सति तज्जनकत्वं तेन ईश्वरेच्छावृत्तित्वेपि इच्छात्वस्य न क्षतिरिति भावः॥ परत्वादेरपि स्वप्रत्यक्षं प्रति साक्षा
ज्जनकत्वादिच्छाया अपि प्रत्यक्षप्रवृत्त्यादिकं प्रति साक्षाज्जनकत्वादति व्याप्तिः। ताहृदस्थमतो ज्ञानत्वधर्मेतरेति
कार्यपदं च भावकार्यपरं। नन्वेवं ज्ञानेतरेति व्यर्थं ज्ञानस्य ज्ञानत्वधर्मेतरकार्यं प्रति साक्षाज्जनकत्वाभावेनैव ज्ञानत्व
स्य वारितत्वात्। किंच प्रयत्नाव्याप्तिः तस्यापि ज्ञानत्वधर्मेतरकार्यं प्रति साक्षाज्जनकत्वाभावादित्यत आह। ज्ञानं चेति।

राम
११५

घटत्वादिवारकस्य गुणत्वव्याप्यपदस्य गुणत्वसाक्षाद्व्याप्यार्थकतया व्याचष्टे। एकत्वत्वादीति। आदिना एकपृथ
क्त्वत्वपरिग्रहः। ऽ नन्वस्य साक्षाज्जनकत्वप्रवेशेन जातिविशेषणीभूतप्रयत्नत्वप्रवेशेन च गुरुत्वादर्थान्तरमाह
।यद्वेति। आत्मपरिमाणस्य स्वसमानाधिकरणस्वप्रत्यक्षजनकत्वात् परिमाणत्वासंग्रहो न स्यादिति ज्ञानेतरेति का
र्यविशेषणं। प्रयत्नस्य स्वसमानाधिकरणधर्माधर्मसुखदुःखजनकत्वात् प्रयत्नत्वस्यासंग्रहो न स्यादतो प्रयत्नभिन्नेद
ति। आत्मपरिमाणं तु न सुखदुःखजनकमिति भावः। इच्छायां तु नातिव्याप्तिः इच्छात्वस्य प्रयत्नात्मकतादृशकार्यजनक
प्रयत्नभिन्नायामिच्छायामवृत्तेः। परत्वत्वादिवारणाय ज्ञानादिभिन्नेति। आदिना सुखदुःखपरिग्रहः। तदनुपादाने पर
त्वापरत्वयोरपि सुखदुःखजनकत्वे तज्जातिव्याप्यापत्तेः। कार्यजनके भावकार्यजनके संख्यात्वादिवारणाय एका
त्ममात्रवृत्तीति। अन्यत्सर्वं पूर्ववत् बोध्यं। भाष्यमिति भाष्ये सामान्यतः प्रयत्नमात्रस्यैवोपग्रहादिति भावः। आचारि
येति। अन्यथा तेन विहितनिषिद्धविषयकप्रयत्नस्यालक्ष्यत्वस्वीकारात् तज्जातिव्याप्यापत्तेरिति भावः। लक्षणेप्रयो

[illegible]

गु.टी जनांतरप्रत्यक्षविहितनिषिद्धविषयत्वं जातिमतो विशेषणं प्रक्षिप्य लक्ष्यं भाष्योक्तप्रयत्नपदस्य प्रयत्नविशेषपरतया
११६ मूलकारव्याख्यानस्य संगमनं न संदर्भसुखं पूर्वोक्तस्वीयलक्षणद्वयं च परत्वापरत्वजनकेपि स्यात्कालेपि स्याद्बुद्धावति
116 व्याप्तमित्यस्वरसात्तस्वारस्यात्तं अन्यलक्षणांतरमाह। वस्तुतस्त्विति। संस्कारत्वमादाय भावनायां सुखविशिष्टां दुःखं द्वेषं जनय
तीति मते सुखदुःखेच्छादिव्याप्तिवारणाय प्रयत्नसत्वं तेन तत्र यत्नसंग्रहाय यत्नेतरपदं गुणत्वादिमादाय असंभववा
रणाय मात्रपदं न च यत्नेतरात्मगुणान्यत्वे सतीत्येवज्याय इतिवाच्यं आत्मपरिमाणे व्याप्तेः। गुरुत्वादिवारणाय द्विती
यसत्वं तेन तत्रात्मपरिमाणस्यात्व समानाधिकरणस्वप्रत्यक्षजनकत्वात् लौकिकप्रत्यक्षस्य च स्वसमानाधिकरणज्ञा
नसुखदुःखजनकत्वाद् व्याप्तेर्वारणायेतरेतं असंभववारणाय स्वसमानाश्रयेति स्वसमानाश्रयत्वं च भेदगर्भं ते
नावयविरूपादेः स्वसमानाधिकरणे स्वस्मिन्नेव स्वरूपयोग्यत्वेपि नाव्याप्तिः वैशेषिकनयेपि ठरूपकाभावो देकस्मि
नि न्नवयविनि नानारूपाभावात् निरुक्तस्पर्शसंग्रहाय एकवृत्तीति जनकतावत्स्वरूपयोग्यता ग्राह्या तेनाजनितपतनादेर्ज

रूपत्वे न पूर्वरूपस्योत्तररूपं प्रति स्वरूपयोग्यत्वात् =२ राम ११६

नित्यावयविगुरुत्वादौ गुरुत्वादौ नातिप्रसंगः। न वांत्यशब्दे तिप्रसंगः। ज्ञानादिजनकपरत्वापरत्ववारणाय प्रथमवृत्त्यं
तं ज्ञानादीत्यादिना सुखदुःखपरिग्रहः तदनुपादाने परत्वापरत्वयोः सुखदुःखजनकत्वे तज्जातिव्याप्त्यापत्तेः। सं
त्वा. ख्यात्वपर्याप्त्यधिकरणत्वमादाय संख्यापर्याप्त्यधिकरणयोरतिव्याप्तिवारणाय द्वितीयं वृत्त्यंतं एकत्वत्वैकपृथक्त्वादिवारणाय गु
णत्वसाक्षाद्व्याप्येति विहितनिषिद्धगोचरप्रयत्ने च स्वसमानाधिकरणधर्माधर्मजनकतया द्वितीयस्य तत्ताभावा
देवनातिव्याप्तिरिति भावः। आचार्यैरतिव्याप्तिभिया भाष्यानुपात्तत्वेऽपीह विहितनिषिद्धगोचरयत्नद्विपृथक्त्वादीनाम
पिलक्षे उपग्रहः कृतः स यथाश्रुतभाष्यसंदर्भविरुद्धत्वतो भाष्यं स्यात्तेषां संगमयति संयोगादयश्चेति ज्ञानेति
अत्र वृत्त्यंतद्वयमवृत्त्यंतमतिरिक्तं तेन जातिविशेषणं रूपादिवारणायेति अवयवरूपादेर्व्यधिकरणावयविरूपज
नकतया रूपत्वादेरपि व्यधिकरणरूपजनकवृत्तित्वा[illegible]दिति भावः। तत्र वृत्त्यंते ज्ञानसंग्रहेति यथासंख्यंपरिमाण
दिषु अन्वितं अवयवपरिमाणादेर्व्यधिकरणावयविपरिमाणजनकतया परिमाणत्वादेरपि व्यधिकरणजनक

गु.शि
११७
117

वृत्तित्वादिति भावः । भिन्नां तमिति समानाधिकरणविशेषणमिति शेषः । परिमाणस्य चेन सुखादिजनकत्वमि
तिभावः । परिमाणस्य सुखादिजनकत्वे च ज्ञानपदं सुखदुःखयोरप्युपलक्षकं धर्माधर्मयोरिच्छादिजनकत्वादेव
लक्षणसमन्वय इति वोध्यं । शब्दकारणमेति शब्दस्य समानाधिकरणत्वात् तज्जनकतया शब्दत्वादेरपि समाना
धिकरणजनकवृत्तित्वादिति भावः । शब्दस्यापि स्वव्यधिकरणज्ञानसुखादिजनकत्वादात्मधर्मेतरेति व्यधिकर
णस्य विशेषणमिति हृदयं । अदृष्टेतरात्मविशेषगुणेति यथाश्रुतेनेन सुखदुःखयोर्वारणं सुखत्वदुःखत्वादे
रपि स्वविषया वृत्तित्वाद् विभुद्वितीयवृत्तित्वं तेनैव तद्वारणं तथा आत्मविशेषगुणेत्यस्य व्यधिकरणजनकात्मविशेष
गुणेत्यर्थः स च ज्ञानमिच्छा प्रयत्नश्च ज्ञानस्य कार्यमात्रजनकत्वेन द्वित्वादिजनकत्वेन च व्यधिकरणजनकत्वादि
च्छायाश्च कार्यमात्रजनकत्वेन व्यधिकरणजनकत्वात् । प्रयत्नस्यापि कार्यमात्रजनकत्वेन शरीरवृत्तिचेष्टाजनकत्वे
न च व्यधिकरणजनकत्वात् समानाधिकरणजनकत्वं तु ज्ञानस्येच्छाप्रयत्नसंस्कारजनकत्वमादाय इच्छायाश्च द्वेषप्र

राम
११७

यत्वधर्मो धर्मादिजनकत्वमादाय अयत्नस्य च धर्माधर्मादिजनकत्वमादाय बोध्यमिति भावः। द्विपदत्वादावति
व्याप्तिवारणाय च पदपत्वकत्वातिरिक्तेति एकपदत्वेऽपि एकपदत्वत्वमादायैव लक्षणसंगतिरिति हृदयं। द्रव्यत्वावार-
णायेति। कपालादेः स्वव्यधिकरणघटादेः स्वसमानाधिकरणस्वस्वावयववृत्तिद्वित्वादेश्च जनकतया द्रव्यत्वाद-
दृष्टित्वादृष्टजातित्वादिति भावः। ननु मूले अप्रकारेण त्वघोतनायेति कथमुक्तं द्विपदत्वादेर्लक्षणत्वप्रतिपादनस्यै-
व तत्त्वप्रयोजनत्वसंभवात् इत्यत आह तत्तदाशयं प्रकाशयति। मूले इति। ननु व्यवच्छेदाय नतु लक्षणत्वव्यवच्छेदाय यतथायसं-
ख्या सामान्यवत्त्वपदत्वसामान्यमपि लक्षणमिति मूलकृतोऽभिप्रेतमिति भावः। स्वपदेति। उपादायेत्यर्थः। एवमु-
त्तरत्रापि त्वसामान्यं इत्यस्य ज्ञानादिभिन्नकार्यसामान्यमुपादायेत्यर्थ इति भावः। एवं चेति। कार्यसामान्यमादायोभ-
यत्रापि भवत्स्यैव लक्षणत्वे चेत्यर्थः। गुणत्वन्यायतया सन्निहितोपादानतुल्ययुक्त्या सन्निहितस्य स्वसमानाधिकरणसंग्रहस्तु व्यधि-
करणावयविसन्निहितोभयजनकत्वात् स्पर्शस्यापि स्वसमानाधिकरणाभिघातस्य व्यधिकरणावयविस्पर्शोभयजन

कृत्वात् स्पर्शस्यापि स्वसमानाधिकरणाभिघातस्वव्यधिकरणावयविस्पर्शोभयजन्यकत्वादिति भावः। अभिघा
तेन स्वाश्रयाभिघातजनकत्वरूपसंबंधेन उपलक्षणमिति संयोगपदमिति शेषः। पृथक्त्वसामान्यस्य लक्षणत्वे प्र
काशोक्तं लक्षणं द्विपृथक्त्वादावव्याप्तं गुरुतरं चेत्यतो द्विपृथक्त्वादिसाधारणं अगुरुलक्षणं स्वयमाह। इत्थं चेति।
अत्र रूपादिवारणाय प्रथमं वृत्यंतं तत्र स्वसमानाधिकरणस्वप्रत्यक्षजनकीभूतपरिमाणवृत्तिपरिमाणत्वादिवार
णाय ज्ञाने तदंतं समानाधिकरणस्य विशेषणं गुणत्वादिवारणाय द्वितीयं वृत्यंतं तादृशज्ञानादिजनकवृत्तिश
ब्दत्वादिवारणाय आत्मधर्मेतरेति समानाधिकरणे छेदः स्वव्यधिकरणद्वित्वादेरजनके ज्ञानादावतिव्याप्तिवा
रणाय वृत्यंतं अदृष्टजनकयत्नसंग्रहाय च तत्रयत्नेतरेति सविषयविशेषणं एवं च यत्नत्वमादाय लौकिकप्रत्य
क्षेऽतिव्याप्तिवारणाय अंतं स्वसमानाधिकरणद्वित्वादेरजनकस्वव्यधिकरणरूपादेरजनके घटादावतिव्याप्तिवा
रणाय च गुणपदमिति भावः। रूपत्वादीति। अवयवरूपादेः स्वव्यधिकरणावयविरूपजनकतया तस्यापि स्वव्यधि

कारणजनकवृत्तित्वादितिभावः। परिमाणत्वादावादिपदान्महत्त्वत्वपरिग्रहः। वैकल्पिकमिति। आत्मपरिमाणावृत्ति
परिमाणत्वादेरन्यतरपदेनैव वारणसंभवात्तथा च स्वसमानाधिकरणज्ञानेतरजनकवृत्तिः स्वसमानाधिकर
जनकानित्यवृत्तिर्वा तादृशी जातिस्तद्वत्त्वमित्यर्थः इतिभावः। शब्दत्वादीति। शब्दजनकशब्दं प्रागायतत्रापिप्र
यत्नवृत्तित्वं तत्त्वादितिभावः। आदिपदात्कत्वादिपरिग्रहः। शब्देन सुखत्वादेरपि जननात् नापायत्वादि शब्दे नादृष्टस्यापिज
नकत्वमाह। ज्ञानपदमिति द्वेषजनिवृत्त्यारव्ययत्नस्य व्यधिकरणरूपादिजनकत्वे मानाभावादाह। अदृष्टेति। ब्राह्म
णादिगोचरद्वेषेण दुरदृष्टमुत्पाद्य शरीरे क्षिप्रमादिरोगजननादितिभावः। नच्यतिः नातिव्याप्तिः। ज्ञानत्वानुमितित्वा
रा दीति तस्यापि स्वसमानाधिकरणेच्छासंस्कारादिजनकवृत्तित्वात् स्वव्यधिकरणपदत्वपरत्वादिजनकानुमितित्वस्य
कापि स्पायुद्धवृत्तित्वाच्चेतिभावः। आदिपदात्शाब्दत्वादिपरिग्रहः। ननु तथापि श्रनुमितित्वादिमादाय अतिव्याप्ति
तादवस्थ्यमित्यत आह। ईश्वरविशेषगुणेतीति। लौकिकप्रयत्नवारणाय यत्नसामान्यपरत्वे ऽदृष्टजनकप्रय

गु.श्रि तेन व्या[redacted]प्तिः तत्तत्त्वादित्यागः। एवं चेति। ईश्वरविशेषगुणपदस्य ज्ञानेच्छामात्रपरत्वे चेत्यर्थः। साधारण्येति। लौ
११९ किकेत्यर्थः। मिश्रमतमाशंक्य निराकरोति। यत्विति। विहितनिषिद्धविषयकोपईश्वरविशेषगुणजातीयस्तदव
119 तित्वप्रवृत्तित्वात् तस्यापेक्ष्यं कल्पयितव्येत्यर्थः। विहितनिषिद्धविषयकावृत्तीत्येतावन्मात्रे कृते संयोगादावव्याप्तिरत
ईश्वरविशेषगुणजातीयेति। अनुमितित्वादिवारणाय जातीयपदं गुणत्वमादाय जातीयापर्थकं विहितनिषिद्धगोचर
प्रयत्नयोरव्याप्तिवारणाय विषयकान्तं जातीयविशेषणं। धर्माधर्मेति धर्मत्वावच्छिन्नजनकतावच्छेदकेत्यर्थः
। यत्नत्वावान्तरेति। प्रवृत्तित्वादिकं च तत्साप्य विरुद्धभेदेन नानेति भावः। लक्षणसमर्पनमिति विहितनिषिद्धगो
चरप्रयत्ने लक्षणसमर्पयामीत्यर्थः। धर्माधर्ममयेति। एवेनादिगोचरप्रयत्नइत्यर्थः। इदमुपलक्षणं प्रयत्नेवि
नाबाधानीतगंगाजलाभिषेकादिसंयोगाधर्माधर्मयोस्तस्याव्यभिचाराच्चेत्यपि बोध्यं। नव धर्ममात्रजनकेऽश्वमे
धादिगोचरप्रयत्ने तत्तद्धर्मविशेषमात्रजनकतावच्छेदकाऽएकाजातिः एवम धर्ममात्रजनके परदारादिगोचरप्रयत्ने

राम
११९

तितद्धर्मविशेषमात्रजनकतावच्छेदिकाया एकजातिः श्येनादिगोचरप्रयत्नेच तत्तद्धर्माधर्मविशेषोभयजनकतावच्छे
दिकाया परजातिरिति तादृशजातिमिदेव तत्र मर्थनमिति वाच्यं। तादृशजातौ मानाभावादिति भावः। भावेनेति। आदि
पदेन स्थितिस्थापकत्रिष्ठयत्वादिपरिग्रहः। व्याप्यत्वांशे गुणत्वसामानाधिकरण्यस्य प्रवेशे तावन्मात्रस्यैवानतिप्र
सक्तत्वान्नियमांशप्रवेशो व्यर्थ इत्यत आह। गुणत्वाभावेति। स्पर्शस्येति वस्तुतस्तुल्यन्यायतया स्नेहवत्त्वोपि लक्ष्य
एवेति भावः। ननु भाष्ये विशेषपदस्य गुरुत्वादौ सर्वत्रान्वयात् फलोपधायकव्यक्तिरेव लक्ष्यं फलोपधायकत्वस्यैव
विशेषत्वात् तथा च प्रकाशकृतां जातिघटितं लक्षणं फलानुपधायकप्रयत्नादावतिव्याप्तं जातिघटनाप्रयासस्य वैफ
ल्यं चेत्यत आह। गुरुत्वादिति। संयोगमात्रान्वितार्थकमिति संयोगविशेषादित्यादिग्रंथेनेति भावः। प्रयत्नसामा
न्यस्य प्रयत्नादिसामान्यस्य वान्वितत्वेव पाठः। आदिपदाद् गुरुत्वादिसामान्यपरिग्रहः। दर्शितं स्वचितं ननु तथापि सं
योगविशेषान्नोदनाभिघात॰ तलक्षणादित्यावार्थव्याख्यानान्नोदनाभिघाताव्यवलक्ष्यौ तथा च प्रकाशोक्तलक्षणं

गु.शि. क्रियाजनके प्रयत्नवदात्मसंयोगादावतिव्याप्तिमित्यत आह। अभिहितञ्चेति। उपलक्षणतया ननु व्यावर्त्तकतया। उप
१२० लक्षणत्वे हेतुमाह। प्रयत्नवदिति। आदिना अदृष्टवदात्मसंयोगपरिग्रहः। तथा च प्रयत्नवदात्मसंयोगादीनामपि
120 लक्ष्यत्वमेवेति भावः। तत्र च तेषु च मध्ये ननु कर्मासाधारणकारणत्वं कर्मत्वावच्छिन्नकार्यताप्रतियोगिककारणता
प्रयत्ने तच्च गुरुत्वादसंभवीत्यत आह। तदसाधारणेति। तन्मात्रवृत्तीति कर्ममात्रवृत्तीत्यर्थः। मात्रपदात् कार्यत्वाव
च्छिन्नजनकस्य भगवज्ज्ञानादेर्व्युदासः। नन्वेवं धर्माधर्मयोरव्याप्तिः तयोः साधारणकारणत्वादित्यत आह। अस्ति
चेति। इदं इदमपि धर्माधर्मविशेषाणामिति। भर्केपादिजनकानां धर्माधर्माणामित्यर्थः। तथा च तद्वृत्तिजातिमा
दायैव धर्माधर्मसामान्यलक्षणसमन्वय इति भावः। क्रियासाधारणेति। मूर्त्तत्वे न क्रियात्वेनैव कार्यकारणभावा
दिति भावः। यद्यपि गुणत्वव्याप्यपद[illegible]दाने सत्तागुणत्वमादाय पदार्थत्रय एवातिव्याप्तिरिति विशेषानुधावनम
संगतं तथापि संयोगत्वपदं कर्मजनकतावच्छेदकमन्यसंयोगवृत्तिपरतया व्याख्येयं तथा च सत्तागुणत्वमादाय न दोषः राम
१२०

तिविशेषणानुधावनमनर्थकमिति अतिव्याप्तिवारकमपि त्यर्थः। कुतोऽतिव्याप्तिरत आह। सर्वेषामिति। तथा च तदुपाद
नेपि कर्मजत्वादिकमादायैवातिव्याप्तिरिति भावः। ननु तथापि संयोगजसंयोगेऽतिव्याप्तिवारकं भवत्येवेत्यत आह।
संयोगजेति। तथा च संयोगजसंयोगे विसंयोगजन्यतावच्छेदकजातिमादायैवातिव्याप्तिरिति भावः। एतदापं कान्तु
कर्मजत्वादेर्नोदनत्वादिव्यापकत्वमतो व्याप्यत्वमतेनुनक्तो विशेष इति ध्येयं। संस्कारत्वान्येत्यपीति संस्कारत्वस्य
कर्मकारणतानवच्छेदकत्वेनैव वारणादिति भावः। अपिशब्दात् संयोगत्वान्यत्वस्यापि व्यर्थतास्समुच्चिता। संयोगत्व
स्यापि कर्मजनकतानवच्छेदकत्वात्। संयोगत्वेनेति। संयोगत्वपदेनेत्यर्थः। कर्मजनकेति कर्मजनकतावच्छेदकम
त्पोयः संयोगः तदवृत्ति धर्मस्येत्यर्थः। तथा च संयोगत्वान्येत्यस्य तादृशधर्मान्येत्यर्थः। कर्मजत्वादिकं तु तादृशधर्म ए
वेति तद्वारणमिति भावः। अत्र कर्माजनकेति कृते कर्मानुपहितनोदनादिव्यक्तिवृत्तितया नोदनत्वादेरप्यसंग्रहः इति
अवच्छेदकपर्यन्तं संयोगपदानुपादाने धारकत्वप्रयत्ने कर्मत्वरूपायोग्य धर्माधर्मयोश्चाव्याप्तिः स्यादिति प्रयत्नत्वादे

गु.टि
१२१
121

स्तादृशाऽन्यवृत्तित्वादतस्तदुपादानमितिमंतव्यं। कर्मजनकतावच्छेदकजातिविरहेत्विति तथाचविभागादावलक्षण
संगतिरितिभावः। कर्मजनकेति। कर्मजनकतावच्छेदकमन्योन्यः संयोगस्तदन्यत्वेनेत्यर्थः। अत्रातिव्याप्तिः पूर्ववद्बो
ध्यानतुअवच्छिन्नपरिमाणस्यक्रियासमवायिकारणतावच्छेदकत्वेप्रमाणाभावः द्रव्यत्वेनैवसमवायिकारणत्वसंभ
वात् इत्यत आह द्रव्यत्वेनेति। स्वरूपयोग्यत्वे क्रियास्वरूपयोग्यत्वे नतु गगनादेः स्वरूपयोग्यत्वेपि कर्मासमवायि
कारणाभिघाताभावादेवनक्रियानित्यस्येत्यादिव्याप्तेरप्रयोजकत्वादित्यत आह। अभिघातस्यापीति। दंडादिकर्म
णो ये फलके दंडाद्यभिघातो सति समये गगनादावभिघातो सतो बाधकाभावात्। अयमभिघातं प्रति लाघवात्केवल
समवायिघटितसामानाधिकरण्यप्रत्यासत्त्यैव स्पर्शस्य हेतुत्वात् गगनादौ नाभिघातसंभवः। नचतथापिदंडादिकर्मणो
त्पत्त्र दंडादिनोदनोत्पत्तिसमये गगनादौ नोदनो दुर्वार इतिवाच्यं। तत्रापिलाघवात्केवलसमवायघटितसामानाधिकरण्य
प्रत्यासत्त्यैवस्पर्शस्यहेतुत्वादितिचेन्न। स्पर्शस्यनोदनाभिघातहेतुत्वेमानाभावात् प्राचीनसिद्धांतस्यनिर्युक्तिकत्वेनहे

राम
१२१

यत्वात्। न च गगनादौ नोदनादिसत्त्वे कर्मोत्पत्तेर्दुर्वारतया तत्र कर्मोत्पत्तिवारणाय वेगस्पर्शवन्नोदनाभिघातहेतुत्वं क-
ल्पनीयमिति वाच्यं। तत्र कर्मोत्पत्तिवारणाय नोदनत्वाभिघातत्वावच्छिन्नं प्रतिस्पर्शत्वेन कार्यकारणभावद्वयकल्पना-
मपेक्ष्य मूर्तत्वेन कर्मसमवायिकारणताकल्पनाया एव लघुत्वात्। अत एव वेगस्य मात्रैकदेशिमते व्यतिरिक्तजातिक-
ल्पनापि न दोषाय नोदनत्वाभिघातत्वावच्छिन्नं प्रतिस्पर्शत्वेन कार्यकारणभावकल्पनामपेक्ष्य कर्मसमवायिकार-
णतावच्छेदकत्वेनैकजातिकल्पनाया एव लघुत्वात् इति भावः। ननु तथापि प्रकाशोन्तु मसंगतमेव अवच्छिन्नप-
रिमाणवत्त्वस्य कारणतावच्छेदकत्वकल्पनामपेक्ष्यावच्छिन्नपरिमाणत्वेन कारणत्वकल्पनाया एव लघुत्वात्। न च
तथापि समवायिकारणस्य द्रव्यत्वकारणतया कारणताद्वयकल्पनमेव गौरवमिति वाच्यं। द्रव्यत्वेन जन्यसत्त्वेन सा-
मान्यतः समवायिकारणकार्यकारणभावेनैव निर्वाहात् कर्मणि समवायिकारणस्य विशिष्यद्रव्यकारणत्वाक-
ल्पनात् इत्यस्वरसात् तत्र च मतमाह। क्रियेति। लाघवादिति। अवच्छिन्नपरिमाणवत्त्वेनावच्छिन्नपरिमाणत्वेन वा का-

ऽसंभवेन मूर्तत्वेनैव क्रियासमवायिकारणत्वे

गु.टी रणताकल्पनमपेक्ष्य लाघवादित्यर्थः। ननु गगनसाधारणभूतत्वेन सांकर्यान्मूर्तत्वस्य न जातित्वसंभव इत्यत आह।
१२२ भूतत्वं चेति। न च द्रव्यसमवायिकारणतावच्छेदकतया भूतत्वजातिसिद्धिरिति वाच्यं। द्रव्यसमवायिकारणतावच्छेद
कतया सिद्धस्य भूतत्वस्य गगनवृत्तित्वे मानाभावेन मूर्तत्वव्याप्यत्वात्। गगने भूतत्वव्यवहारस्य आत्मान्यविशेषगुण
वत्त्वोपाधिनैवोपपत्तेः द्रव्यत्वस्य मूर्तत्वस्य वा द्रव्यसमवायिकारणतावच्छेदकत्वसंभवेनातिरिक्तजातौ मानाभावाच्चेति
भावः। ननु द्रव्यत्वेन क्रियासमवायिकारणत्वे गुरुत्वस्य पतनहेतुत्वे मानाभावः। क्रियासामान्यकारणतावच्छेदकमूर्त
त्वाभावेनैवात्मादेः पतनाभावोपपत्तेः। वायुमनसोरतीन्द्रियतया तत्कर्मणोऽप्यतीन्द्रियत्वेन तत्र पतनाभ्युपगमे
ऽपि क्षतिविरहात्। न च तथापि तेजसि पतनापत्तिर्दुर्वारेति वाच्यं। अंगारादिसंबंधवह्न्यादेः सुवर्णरजतादेश्च प
तनस्यानुभवसिद्धतया तेजस्यपि पतनाभ्युपगमात्। सुवह्निस्तु वर्णरजतादेः पतनानुभवस्य परंपरासंबंधेन पार्थि
वभागवृत्तिपतनविषयकत्वे मानाभावादिति चेन्न। सौराद्यालोकादेरंगाराद्यसंबद्धवह्न्यादेश्च पतनवारणाय गुरुत्वस्य प

राम
१२२

तन्नहेतुत्वावश्यकत्वात्तद्गुरुत्वोत्कर्षापकर्षोपलंभात् तस्यहेतुत्वावश्यकत्वाच्चानन्यथासिद्धगुरुत्वस्य पतनहेतुत्वं । तथा
विगुरुत्वस्य सर्वदैवप्रविशिष्टतया कुतो न पतनं अथ पतनं प्रति परिवेसंयोगस्य प्रतिबंधकतया तत्सत्त्वादेव न
सर्वदा पतनमिति चेन्नहि पतनपूर्वसंयोगयोः केनरूपेण प्रतिबध्यप्रतिबंधकभावः । न तावत्संयोगत्वेन वृक्षादिल
ग्नजतुवस्त्रादिसंयोगे सत्यपि शरीरस्याद्यादेः पतनोत्पत्तेः । नापि क्रियाविरहविशिष्टनिरूपितसंयोगत्वेन प्रतिबंधकत्वं ।
चलद्हस्तादिघटपटादेरपि पतनापत्तेः । न च पतनविरहविशिष्टनिरूपितसंयोगत्वेन प्रतिबंधकत्वमिति वाच्यं । वा
य्वालोकसंयोगसत्त्वे घटादिपतनानुपपत्तेः । न च पतनविरहविशिष्टगुरुत्ववत्संयोगत्वेन प्रतिबंधकत्वं । स्थिरवायु
संयोगस्य देवदत्तादिपतनप्रतिबंधकत्वानुपपत्तेः । वृंतादिसंयुक्तफलादेर्वृंतादिक्रियाधीनवृंतादिसंयोगनाशानं
तरं निष्क्रियपत्रादेर्यथा कथंचित्संयोगसत्त्वेपि पतनोत्पत्तेः फलस्य पतनोत्पत्त्यनंतरमेव विभागाधीनपत्रा
दिसंयोगनाशात् एतेनात्मसंयोगत्वेन प्रतिबंधकत्वमित्यपि निरस्तं । निष्क्रियस्य वृंतादिसंयुक्तफलादेर्वृंतादि

गु॰प्रि॰
१२३
12-3

क्रियाधीनवृंतादिसंयोगनाशे सत्यपि चात्मसंयोगे पतनानुपपत्तेर्न हि फलक्रियां विना फलात्मसंयोगनाशः संभवती
ति उच्यते। पतनप्रतिबंधकतावच्छेदकः संयोगनिष्ठा जातिविशेषः कर्मजत्वादिना सांकर्यापत्त्या तस्य नानात्वेपि
नक्षतिः प्रतिबंधकतावच्छेदकाननुगमस्यादोषत्वात्। न चैवं वृंतसंयुक्तशाखाच्छेदे वृंतसंयुक्तफलस्य वृंतेन सहपत
नं न स्यात् वृंतसंयोगस्य सत्वात्। तत्संयोगस्य वैजात्यानाश्रयत्वे शाखाच्छेदप्राक्कालेपि पतनापत्तेः। शाखासंयो
गस्य फलनिष्ठपतनप्रतिबंधकत्वासंभवात् इति वाच्यं पतनविरहविशिष्टत्वजातीयसंयोगत्वेन प्रतिबंधक
तया वृंतसंयुक्तफलस्य वृंतेन सहपतने बाधकाभावात्। न चैवं तथापि फलवृंतयोर्युगपदेव पतनोत्पत्त्या पतनप्राक्का
ले पतनविरहविशिष्टवृंतसंयोगस्य विद्यमानत्वात् पतनमनुपपन्नमेवेति वाच्यं। फलबले न तत्र वृंतपतनानंतरमे
व फलपतनकल्पनात् क्षणैकविलंबस्यादोषत्वात्। न चैवं तथापि फलमादायैव तस्य पतनाभावविशिष्टत्वं संयोगस्य दिष्टत्वा
दिति वाच्यं तत्तद्व्यक्तिभिन्नात्मकैकाधिकरणवृत्तित्वस्य वैशिष्ट्यत्वात् प्रतिबंध्यतावच्छेदकमपि तत्तद्व्यक्तिसमवेतपतनत्वमे

राम
१२३

वंपतनस्याव्याप्यवृत्तित्वेएकावच्छेदेनतत्तद्व्यक्तिभिन्नात्वैकाधिकरणवृत्तित्वमेववैशिष्ट्यंविशिष्टपर्वसत्तायाअपे
क्षितत्वेनकालांतरेपतनाभाववविशिष्टत्वमादायनदोषःप्रतिबंधकतावच्छेदकक्लृप्त्यासत्तिश्चसमानावच्छेदकतांपतन
स्यव्याप्यवृत्तित्वेतुसमवायघटितसामानाधिकरण्यमेवप्रत्यासत्तिः।किंवातादृशसंयोगविशिष्टद्रव्यत्वंप्रतिबंधकं।ति
नसंयोगस्याव्याप्यवृत्तित्वेपिनक्षतिः।प्रतिबंधकतावच्छेदकंचद्रव्यत्वसत्तादिसाधारणंतादृशसंयोगविशिष्टत्वमे
वलाघवात्।अतएवसत्तादिमादायविनिगमनाविरहोपिप्रत्युक्तः।नचफलवतेनतत्रवृंतपतनानंतरमेवफलपतन
पित्सेवायुक्तफलवृंतसंयोगस्यतादृशत्वेजात्याश्रयस्यद्विष्ठतयातस्यवृंतेपिसत्वेवृंतपतनस्यापिप्रागसंभवादिति
वाच्यं।सामान्यतःप्रतिबंधकतावच्छेदकोनेकोजातिविशेषः।किंतुतत्तद्व्यक्तिपतनमात्रप्रतिबंधकतावच्छेदकास्ततद्व्य
क्तिवृत्तिसंयोगनिष्ठाःनानैवजातयः।तथाचवृंतसंयुक्तफलसंयोगस्यफलपतनप्रतिबंधकत्वेपिवृंतपतनाप्रति
बंधकतयातत्सत्वेविशावृंतपतनोत्पत्तौबाधकाभावः।एवंयुक्तसंयोगेनव्याप्यभयपतनप्रतिबंधकः।तेननजातिसां

गु.वि कर्य्यमिति समासः। व्याप्यांतमिति। व्याप्यांतं समुदितदलमित्यर्थः। जातिविशेषपरिचायकमात्रमिति लक्षणीभूतनोदन
१२४ त्वजातेरपि घातत्वापेक्षया वैलक्षण्यबोधकमात्रं न तु तादृशसंयोगत्वव्याप्यजातित्वेन लक्षणघटकमित्यर्थः। तथा च
[redacted] नोदनत्वरूपजातिविशेषणएवतादृशसंयोगत्वव्याप्यत्वाविशेषितः सन्लक्षणमिति भावः। अन्यथा तादृशसं
124 योगत्वव्याप्यजातित्वेन लक्षणघटकत्वे ज्ञानीदीति। आदिना सुखादिपरिग्रहः। अतिप्रसंगादिति। नोदनलक्षणत्व
प्रसंगादित्यर्थः। निविडत्वेति। निविडत्वादीनामविभूतपाच्चवृत्तिसंयोगवृत्तित्वनियमेन शब्दासमवायिकारणसं
योगावृत्तित्वादिति भावः। न च नोदनत्वं कुतो जातिः कर्मसंयोगजन्यतावच्छेदकजातिभ्यां सांकर्यादिति वाच्यं। कर्मसं
योगजन्यतावच्छेदकजात्यो नोदनत्वव्याप्यविरुद्धभेदेन नानात्वोपगमात् कार्यतावच्छेदकनानात्वस्यादोषत्वात्
। नोदनत्वस्य कर्मविशेषजनकतावच्छेदकस्य नानात्वेव्यभिचारापतिः। कर्मनिष्ठकार्यतावच्छेदकजातीनां नानात्वाप
त्तेर्वा। न च तथापि तस्य द्रव्यारंभकतावच्छेदकसंयोगनिष्ठवैजात्येन सांकर्यान्न जातित्वसंभवः तस्य नानात्वे व्यभिचारा

राम
१२८

नेऽति वाच्यं। [redacted] द्रव्यारंभकतावच्छेदकवैजात्यस्य नोदनत्वविरुद्धत्वात् नोदनात्मकसंयोगादविद्रव्योत्पत्तिमाना
भावादिति न कार्यानुपपत्तिः। जातिविशेषस्येतरभेदानुमाने पक्षतावच्छेदकतया प्राचीननयेन निर्विशेषितस्य लक्षण
त्वसंभवदुक्तेः समुदायमेव लक्षणपरतया व्याचष्टे। यद्वेति। अविवक्षितमिति तद्विवक्षणे शब्दनिमित्तभेरीदं
डाभिघातवृत्तित्वविशिष्टत्वादिकं भेरीदंडाभिघातवृत्तिशब्दनिमित्तकारणतावच्छेदकजातिं चादायातिव्याप्त्यापत्तेः
।केवलसमवायघटितसामानाधिकरण्यप्रत्यासत्त्या स्पर्शस्याभिघातहेतुत्वनये स्पर्शमात्रवृत्तिसंयोगस्यैवा
भिघातत्वेन शब्दासमवायिकारणस्य भेरीकाशसंयोगादेरभिघातत्वाभावादभिघातत्वमादायाभिघातेऽतिव्या
प्त्यापत्तेश्चेति भावः। स्पर्शजन्यवृत्तीति संयोगत्वव्याप्यपदस्यैव स्पर्शजन्यसंयोगवृत्त्यर्थकत्वादिति भावः
अभिघातत्वस●तागुणत्वादिमादायातिव्याप्तिवारणाय वृत्त्यंतम्। एतेनाभिघातत्वव्याप्यभेरीदंडाभिघात
वृत्तिविशिष्टत्वादेः द्रव्यारंभकतावच्छेदकजात्यादेश्चाप्रसिद्धेः तेषां शब्दनिमित्तकारणवृत्तित्वात् (कारणता

गु.टि चासाधारणी ग्राह्येति न नोदनस्य कारणत्वेन शब्दजनकत्वे विनाऽसंभवः। एवमवच्छेदकतासंबंधानवच्छिन्नत्वे
१२५ नर नापि कारणतानिवेशानीयाते नैः शरीरादिनिष्ठकारणीभूतावच्छिन्ननोदनात्मक वायुसंयोगे व्याप्तिर्नोदनत्वस्य त
125 द्वृत्तित्वेन शब्दकारणवृत्तित्वविरहादसंभवो वा। आत्ममनोयोगादिवृत्तिवैजात्यवारणाय वृत्तित्वे तन्न च स्पर्श
वत्संयोगवृत्तित्वे वास्तु किं जन्यत्वविशेषेणेति वाच्यं। शरीरात्मसंयोगवृत्तिवैजात्यमादायातिव्याप्त्यापत्तेः।
अभिघातत्वादिनाऽसांकर्यभिया निविडत्वादिर्नानात्वेनाभिघातत्वादिविरुद्धनिविडत्वादिमादायातिव्याप्त्या
पत्तेश्च। अभिघातात्मसंयोगस्यैव शब्दनिमित्तकारणत्वेन तस्याविशब्दकारणवृत्तित्वात् स्पर्शत्वमादाय स्पर्शे
ऽतिव्याप्तिवारणाय संयोगेति। ननु नोदनस्य स्पर्शजन्यत्वादिदं न संभवतीत्यत आह। अभिघातस्यै[illegible]भेर्या
काशसंयोगत्वेन तथात्वे वैजात्येन वा शब्दविशेषं प्रति हेतुत्वनये नोदनात्मकं वेति। ननु तथापि भेर्याकाश
संयोगे व्याप्तिः तद्वृत्तिजातेः शब्दजनकावृत्तित्वविरहात्। भेर्याकाशसंयोगवृत्तिशब्दजनकतावच्छेदकजातेर्नोदन

त्ववेति। ननु तथापि र

त्वविरुद्धत्वे नोदनात्मकभेर्याकाशसंयोगमात्रस्थले व्यभिचारापत्तेः। तत्र नोदनेतरभेर्याकाशसंयोगविरहात् तानव
भेर्याकाशसंयोगस्य नोदनत्वे मानाभावइति वाच्यं भेरीक्रियया देशांतरे भेर्यादेः प्रत्यक्षसिद्धनोदनोत्पत्तिसम
ये गगनेपि नोदनोत्पत्तौ बाधकाभावादिति चेन्न। अभिघातं प्रति स्पर्शस्य यत्किंचिदाश्रयनिष्ठतया हेतुत्वो
पगमेपि नोदनं प्रति स्पर्शस्य यावदाश्रयनिष्ठतयैव हेतुत्वोपगमात् गगने नोदनासंभवादिति भावः। ननु
शब्दविशेषं प्रति भेर्याकाशसंयोगादेरसमवायिकारणत्वं न भेर्याकाशसंयोगत्वादिना गौरवात् नापि
सामान्यतः शब्दविभागाजन्यशब्दत्वावच्छिन्नं प्रति अभिघातत्वेन संयोगजन्यनिष्ठत्वभेर्याकाशसंयो
गस्यापि शब्दासमवायिकारणव्यवहारभाजनतया तदसंग्रहात् तत्तस्य वेगवताद्रव्ययोज्यत्वाभावेनाभिघा
ताद्दशा...२ तत्वासंभवात् नापि सामान्यतः शब्दासमवायिकारणी ^ तत्स ॰ शब्दत्वावच्छिन्नं प्रति संयोगत्वेन भेरीदंड
संयोगविरहदशायामपि तादृशनिष्ठत्वभेर्याकाशसंयोगादभिघातादि लक्षणनिमित्तकारणविरहे

असमवायिकारणीभूतेत्यर्थः १

गु.प्र ऐवातिप्रसंगात्संभवेपि संयोगत्वावच्छिन्नकारणताया असमवायिकारणताव्यवहारविषयेप्यग्निगगनसंयो
१२६ गनोदनादौ चसत्वेन तस्या असमवायिकारणतात्वासंभवादपितु जातिविशेषेणासा च जातिर्नो निमित्त
कारणभेरीदंडाभिघातादिसाधारणीमानाभावात् कारणतावच्छेदकावच्छिन्नयत्किंचित्कारणसत्वस्यैव कार्यो
126 त्पत्तिप्रयोजकतया भेरीदंडसंयोगविरहदशायामपि केवलात्तादृशभेर्याकाशसंयोगात् शब्दोत्पत्तिप्रसंगा
च्च भेर्याकाशयोरुभयोरपि तादृशसंयोगसत्वात् एवं सा जातिर्नाभिघातत्वव्याप्या निर्वेगभेर्याकाशसंयोगस्या
विशब्दासमवायिकारणत्वेन तत्रापि सत्वात् नाप्यभिघातत्वव्यापिका निमित्तकारणीभूतभेरीदंडसंयोगादावस
त्वात् तथा च शब्दनिमित्तकारणभेरीदंडाभिघातादाववृत्तिः शब्दासमवायिकारणभेर्याकाशसंयोग
वृत्तिसंयोगत्वव्याप्यजातेरसमवायिकारणतावच्छेदिकायाः तत्राभावादित्यभिप्रायेण शंकते यद्यपीति
(अभिहन्यमानानिद्रव्याणीति दंडाभिघाताभिप्रायेणेत्यर्थः। वेगवतिसाक्षात्संपरया वा वेगवंतित

ध्याचाभिघातत्वं व्याप्यजातौ वा तस्य कारणत्वांशे भवच्छेदकसमवायिकारणवृत्तिसंयोगत्वव्याप्यजातेः
शब्दनिमित्तकारणभेरीदण्डाभिघातानवभावाद्व्याप्तिरिति भावः। न चैवमप्यसमवायित्वमविवक्षितं इत्यग्रे
वक्ष्यमाणतया निमित्तकारणभेरीदण्डाभिघातवृत्त्यपि अभिघातत्वमादायैव तत्र लक्षणसमन्वयसंभवात् चेयमा
शंकाघटत इति वाच्यं। वक्ष्यमाणव्यवहाराद्विघटितस्यासमवायिकारणत्वस्याविवक्षितत्वेपि समवायघ
टितसामानाधिकरण्यप्रत्यासत्त्या फलोपधायकत्वरूपं जनकत्वमवश्यं विवक्षणीयं निमित्तकारणभेरीदं
न डाभिघातादिष्वपि तथा अन्यथा कालत्वेन जनकतामादाय अभिघातानात्मकनिमित्तपवनसंयोगवृत्तिकर्मजत्वा
दिजातिमादाय वातिव्याप्त्यापत्तेर्दुर्वारत्वात्। स्वरूपयोग्यताप्रवेशे संयोगत्वव्याप्यजातिपदवैयर्थ्याघातादिस
भिघाताभेर्याकाशसंयोगवदभिघातवद्दण्डकाष्ठाभिघातस्यापि शब्दविभागाजन्यशब्दप्रत्यभिघातत्वे
नसामान्यकार्यकारणभावमादाय तादृशप्रत्यासत्त्या शब्दफलोपधायकत्वात तद्वृत्त्यभिघातत्वमादायैव

गु.टि
१२७
127

निमित्तकारणभेरीदण्डाभिघातेऽपि लक्षणसमन्वय इति समाधेः । तत्रापीति । तुल्यन्यायतया कार्यैकार्थसमवायप्रत्यासत्ते
रभिघातत्वस्यैवाविशिष्टतयाऽभिघातत्वं दण्डाकाशाभिघातस्यापीत्यर्थः । असमवायिकारणत्वात् तादृशप्रत्या
सत्त्या शब्दफलोपधायकत्वात् अदोष इति । शब्दनिमित्तकारणभेरीदण्डाभिघातादावव्याप्तिविरह इत्यर्थः । ननु तत्रा
पि अव्याप्तिर्दुर्वारा भेर्याकाशसंयोगवृत्ति असमवायिकारणतावच्छेदकजातेरभिघातकदण्डाकाशाभिघातसाधा
रणतया तद्व्याप्याभिघातत्वस्यापि असमवायिकारणतावच्छेदकजातिव्याप्यस्य निमित्तकारणभेरीदण्डाभिघातादाव
भावात् अन्यथाऽभिघातत्वेन सहासमवायिकारणतावच्छेदकजातेः सांकर्यापत्तेरिति वाच्यं । भेर्याकाशसंयोग
वृत्ति असमवायिकारणतावच्छेदकजातेरभिघातकदण्डाकाशाभिघातसाधारण्ये मानाभावात् । दण्डाकाशा
भिघातस्य शब्दविभागाजन्यशब्दतावच्छिन्नं प्रति सामान्यतोऽसमवायिकारणतावच्छेदकमभिघातत्वमादायैवा
समवायिकारणत्वसंभवात् । नचैवं विनिगमनाविरहात् तस्याऽप्यसाधारण्यमावश्यकमिति वाच्यं । निर्मूलभेर्या

वैंगेसर्थः=१

राम
१२७

काशसंयोगस्य प्रकारांतरेणासमवायिकारणत्वासंभवस्यैव विनिगमकत्वादिति भावः। यद्यपि निश्चलभेर्याघाका
शसंयोगस्यासमवायिकारणत्वानुरोधेन भेर्याकाशसंयोगत्वादिना विशिष्यासमवायित्वावश्यकत्वेऽभिघात
त्वेन सामान्यतोऽसमवायिकारणत्वमानाभावाद्भेर्याकाशसंयोगवृत्त्यसमवायिकारणतावच्छेदकजातेरभिघा
तकदंडाद्याकाशाभिघातसाधारण्यमावश्यकमन्यथा तत्रासमवायिकारणत्वस्यैव दुर्घटत्वापत्तेः। तथा च निमित्ता
समवायिकारणसाधारणसंयोगत्वव्याप्यैकजातिविरहान्निमित्तकारणेऽव्याप्तिरपिहिता तथाप्यस्मिन्कल्पे तथा दुर्वारा
त्वे तत्रादिनैतदसंस्थस्यानुपदं स्वयमेव वक्ष्यमाणत्वाददोषः। न च संयोगजन्यनिश्चलभेर्याकाशसंयोगे वेगाप्रयोज्या
ऽभिघातानात्मकेऽसमवायिकारणतावच्छेदकजातिं तद्व्याप्यां वा संयोगजन्यतावच्छेदकजातिमादायातिव्याप्ति
रिति वाच्यं स्पर्शजन्यत्वे सतीति विशेषणेनानुपदं स्वयमेव वारणीयत्वादिति सर्वं चतुरस्रं केचित्तु ननु अभिघातत्वं
तद्व्याप्यजातिं वाऽऽदाय सर्वत्र लक्षणं संगमनीयं न चाभिघातत्वं तद्व्याप्यं वै जात्यं वा शब्दासमवायिकारणवृत्ति निर्वे

गु.शि. गमेर्य्याकाशसंयोगस्य शब्दासमवायिकारणस्य वेगाप्रयोज्यतयाभिघातत्वाभावात् कार्य्यैकार्थसमवायप्रत्यास

१२८ त्याकारणत्वरूपस्य चासमवायिकारणत्वस्यावश्यंपविवक्षणीयत्वात्तथा चासंभवइत्यभिप्रायेण धंकृतो। पद्यपाति।

नन्वसर्वत्रेति। द्रव्याणि भेर्य्यादीनि तथा च शब्दासमवायिकारणस्य भेर्य्याकाशसंयोगस्य भेर्य्या वेगाभावेनाभिघातत्वाभा

128 वादभिघातत्वस्य तत्राप्यजातेर्वा न शब्दासमवायिकारणवृत्तित्वमित्यसंभवइति भावः। निर्वेगभेर्य्याकाशसंयोगस्य श

ब्दासमवायिकारणस्याभिघातत्वाभावेप्यभिघातात्मकभेर्य्याकाशसंयोगस्यापि क्वचिदसमवायिकारणत्वादभिघा

तत्वादेतादृशित्वमादायैव लक्षणसमन्वयसंभवइति समाधत्ते। तथापीति। अभिघातकेति दंडइव दंडकोय

प्येतिवत्स्वार्थे कप्रत्ययः। तथा चाभिघातात्मकेत्यर्थः। द्रव्यपदं च भेर्य्यादिपरं असमवायिकारणत्वात् क्वचिदस

मवायिकारणत्वात्। अप्रदोषइति। असंभवाभावइत्यर्थः। नचतथापि विनिगिन्नकारणभेरीदंडाभिघाते अव्याप्तिरेव श

ब्दासमवायिकारणाभिघातात्मकभेर्य्याकाशसंयोगवृत्त्याभिघातत्वादिव्यक्तेः साकल्येनाभियाभेर्य्याकाशसंयोगवृत्त्य[redacted] रा म

१२८

३१

समवायिकारणतावच्छेदकजातिव्याप्यत्वेन तत्राभावादिति वाच्यं। अस्मिन्कल्पे एतदवच्छेदकस्यानुपदं तथा
चेत्यादिना स्वयमेव वक्ष्यमाणत्वादित्याहुः। तदसत्। न च सर्वत्राभिहन्यमानानामन्यत्र सर्वत्रापदासंगतेः पूर्वप
क्षिणा क्वचिद्वैर्यावेगाभ्युपगमे पूर्वपक्षस्यैवासंभवादिति मंतव्यं। ननु मूर्तमात्रवृत्तिसंयोगस्यैव नोदनत्ववन्मू
र्तमात्रवृत्तिसंयोगस्यैवाभिघातत्वाछब्दासमवायिकारणस्याकाशनिष्ठसंयोगस्य कथमभिघातत्वं व्यवहारादि
घटितवक्ष्यमाणसमवायिकारणत्वस्यात्राविवक्षितत्वेपि समवायघटितसामानाधिकरण्यप्रत्यासत्त्याकारण
त्वस्यावश्यं विवक्षणीयत्वादित्यत आह। मूर्तवदिति। अस्मिन्निति। आकाशवृत्तिसंयोगेऽभिघातत्वासिद्धिप्रसं
गः। न च समवायघटितसामानाधिकरण्यप्रत्यासत्त्या नोदनत्वावच्छिन्नमिवाभिघातत्वावच्छिन्नं प्रत्यविस्पष्टत्वेन हे
तुत्वात्कथमाकाशेऽभिघातोत्पत्तिरिति वाच्यं। नोदनस्थले केवलसमवायस्य कार्यतावच्छेदकसंबंधत्वेप्यभिघा
तस्थले मूर्तत्वविशिष्टसमवायस्यैव कार्यतावच्छेदकसंबंधत्वोपगमात्। वेगाभिघातयोस्तु क्रियासंयोगयोरिव हेतुहे

गु. शि. तुहेतुमद्भावः। तेन न निश्चलमूर्त्तौ चलद्वेगाधीनाभिघातोपपत्तेरविरोधः कार्यतावच्छेदकं च तस्य कर्मजन्याभिघातत्वं
वेग.=२ १२९ तेन विनाऽप्यभिघातमभिघातजाभिघातोत्पत्तावपि न व्यभिचार इति भावः। यत्तु तदीयकर्मजनिताभिघातत्वावच्छि
न्नं प्रति तद्धेतुवेगत्वेन हेतुत्वं कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिरिति तत्र वेगजनककर्मवेगाजनककर्मभ्यां
१२५ जनितेऽभिघाते व्यभिचारापत्तेरिति ध्येयं। तद्वृत्तीतिशब्दात्समवायिकारणवृत्तीत्यर्थः। अन्यतरकर्मत्वमिति
अन्यतरकर्मजन्यतावच्छेदकं वैजात्यमित्यर्थः। प्रतिप्रसंगः नोदनेऽतिप्रसंगः संयोगान्तरस्य स्पर्शजन्यतयाव
स्यमानस्पर्शजन्यत्वविशेषणेनैव वारणात्। न चान्यतरकर्मत्वेनाहेतुतया तादृशवैजात्यमेवासिद्धमिति वाच्यं
। अन्यतरकर्मजन्यतावच्छेदकत्वं हि नान्यतरकर्मत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकत्वं किंतु एकतर
कर्ममात्रजन्यतावच्छेदकत्वं कर्मतदभावोभयजन्यतावच्छेदकत्वमिति यावत् एकतरकर्ममात्रजसंयोगोभय
कर्मजसंयोगयोः परस्परव्यावृत्तवैलक्षण्यस्यानुभवसिद्धतया तदुभयकर्मजव्यावृत्तवैलक्षण्यावच्छिन्नं प्रति ताद़ा

राम
१२९

स्य स्वाश्रयसमवेतत्वोभयघटितसामानाधिकरण्यप्रत्यासत्त्या फलनिष्ठोभयकर्मतदभावयोर्हेतुत्वात् अत एवोभ
यकर्मस्थले न तादृशसंयोगोत्पत्तिः एवमुभयकर्मजन्यतावच्छेदकत्वमपि नोभयकर्मत्वावच्छिन्नकारणताप्रतियोगि
ककार्यतावच्छेदकत्वमपि तु समवायघटितसामानाधिकरण्यप्रत्यासत्त्या कर्मत्वावच्छिन्नकारणताप्रतियोगिककार्य
तावच्छेदकत्वे तन्नोभयत्र कर्मण्यविनाशंसमवतात्तु उभयकर्मजन्यतावच्छेदकमिति गीयत इति प्राचीनमतानुसारेणैतद
भिधानात् । न च अन्यतरकर्मजो उभयकर्मजो उभयसाधारणकर्मजन्यतावच्छेदकवैजात्यं संयोगजन्यतावच्छेदक
वैजात्यं चापद्येतेति व्याप्तिविरोधात् द्रव्यारंभकतावच्छेदकवैजात्यमादाय च नातिव्याप्तिः गगननिष्ठसंयोगस्यैव शब्दा
समवायिकारणतया तस्य शब्दासमवायिकारणवृत्तित्वविरहात् । अतिप्रसंगाभावे हेतुमाह । शब्दकारणवृत्तेरि ति
अन्यतरकर्मजत्वस्येति संयोगजत्वस्य चेत्यपि बोध्यं । अन्यतरकर्मादिजन्यतावच्छेदिका जातयो नाना किं यत्स्यः श
ब्दजनकतावच्छेदकजातिव्याप्याः किं पत्वघ्रातद्भिन्नाः अन्यथा शब्दजनकतावच्छेदकवैजात्यमादाय तस्य सांकर्यप

गु. टि ते: तत्र शब्दजनकतावच्छेदकवैजात्यव्याप्यजातिमत्त्वस्य शब्दकारणवृत्तिरिति शब्दाजनके नोदने सा नास्तीत्यर्थः। यद्यपि श
१३० ब्दासमवायिकारणवृत्त्यन्यतरकर्मजत्वादिकं शब्दाजनकेन वर्तत इत्यस्यैव प्रकृतोपयुक्ततया शब्दकारणवृत्तिरिति सा
मान्यतोऽभिधानमनुपयुक्तं तथापि विप्रसंगाच्छब्दनिमित्तकारणवृत्त्यन्यतरकर्मजत्वादिकमपि शब्दाजनकेन वर्तते
130 इति प्रतिपादयितुं सामान्यतोऽभिधानं यत्तु शब्दकारणवृत्तित्वस्य शब्दासमवायिकारणवृत्तिरित्यर्थ इति तन्न उभय
कर्मजन्याभिघातस्य शब्दजनकत्वादिति पूर्वग्रन्थासंगतेः शब्दासमवायिकारणस्य गगननिष्ठसंयोगस्य उभयकर्म
जत्वासंभवादिति तत्रैव स्फुटीभविष्यतीति नन्वन्यतरकर्मादिजन्यतावच्छेदिका जातिरेकैव शब्दजनकतावच्छेदकवै
जात्यमेव चान्यतरकर्मोभयकर्मजसंयोगजभेदेन नानात्वेऽपि किं न स्यात् तावतापि सांकर्य्यपरिहारसंभवेन विनिगमकाभा
वादित्यत आह। कारणतावच्छेदकस्येति अननुगतत्वे इति अन्यतरकर्मोभयकर्मजभेदेन नानात्वे इत्यर्थः। तत्तत्संयोगा
दिता अननुगतकार्यतावच्छेदकावच्छिन्नं प्रति कारणतासंयोगादि इत्यर्थः। न च शब्दगतमपि परस्परव्यावृत्तवैजात्यमेव कार्यता

राम
१३०

३२

वच्छेदकं कल्पनीयमिति वाच्यं। शब्दनिष्ठकृतत्वस्वत्वादिव्याप्यानंतवैजात्यकल्पने तदवच्छिन्नंप्रत्यनंतकार्यकारण
भावकल्पने च गौरवापत्तेरिति भावः। अयं च शब्दाकारणतावृत्तित्वादित्यत्र हेतुः। ननु तवाप्यन्यतरकर्मादिजन्यतावच्छे
दकजातेर्नानात्वे कार्यतावच्छेदकाननुगमदशायामत आह। कार्यतावच्छेदकेति। ननु शब्दजनकतावच्छेदकवैजात्या
भिन्नान्यतरकर्मत्वव्याप्यान्येव संतीत्यत आह। उभयकर्मजस्यापीति शब्दजनकत्वात् शब्दनिमित्तकारणत्वात् तेन
उभयकर्मजाभिघातस्य शब्दासमवायिकारणत्वासंभवे विनासंगतिः। न च तथापि शब्दासमवायिकारणतावच्छेदकवैजात्यम
न्यतरकर्मजत्वव्याप्यमेवास्त्विति वाच्यं। संयोगजभेर्यभिघाताकाशसंयोगस्यापि शब्दासमवायिकारणत्वादिति भावः। अस
मवायित्वमिति व्यवहारादिघटितवक्ष्यमाणासमवायिकारणत्वमविवक्षितमित्यर्थः। वैयर्थ्यादिति। समवायघटितसामा
नाधिकरण्यप्रत्यासत्त्या कारणत्वविवक्षयैव कालत्वेन साधारणजनकतां शरीरादिनिष्ठकर्मणोऽवच्छिन्नानोदनात्मकनिमि
त्तपवनसंयोगनिष्ठसमानावच्छेदकत्वप्रत्यासत्तिघटितजनकतां चादाय अतिव्याप्तेर्वारणसंभवेन तादृशाकारणता

मु.शि
१३१
131

त्वप्रवेशप्रयोजनविरहादित्यर्थः। इदमुपलक्षणं गौरवाच्चेत्यपि द्रष्टव्यं। ननु संयोगजत्वं शब्दासमवायिकारणताव
च्छेदकं निःशब्दलभेर्याकाशसंयोगवृत्तिवैजात्यं वा आवश्यकं निःशब्दलभेर्याकाशसंयोगेतिव्याप्तिस्तस्य वेगाप्रयोज्य
त्वात् अभिघातत्वाभावादित्यत आह। निःशब्देति। स्पर्शजन्यत्वं च तत्त्वमिति स्पर्शजन्यत्वं जातिमतो विशेषणं च
तत्त्वमित्यर्थः। निःशब्दलभेर्याकाशसंयोगस्तु न स्पर्शजन्यः नोदनाभिघातयोरेव स्पर्शजन्यत्वात् न च तथापि निःशब्द
लभेर्याकाशसंयोगनिष्ठासमवायिकारणतावच्छेदकवैजात्यमादाय नोदनात्मकभेर्याकाशसंयोगेऽतिव्याप्ति
रिति वाच्यं। स्पर्शस्य नोदनं प्रति यावदाश्रयनिष्ठतया हेतुत्वेनाकाशेनोदनासंभवादिति भावः। वेगजन्यत्वाभिधा
नेऽप्यभिघातजाभिघातेऽव्याप्तिर्दृष्टान्तदलवैयर्थ्यं च नोदनस्य वेगाजन्यत्वादतस्तत्परित्यागः। एतच्च व्यवहारानुरो
धात् ततच्छब्दविशेषं प्रति भेर्याकाशसंयोगमृदंगाकाशादिसंयोगादीनामपि विशेषतोऽसमवायिकारणत्वमिति सि
द्धांतमनुरुध्योक्तं। वस्तुतस्तु तज्जच्छब्दविशेषं प्रति भेरीदंडाभिघातमृदंगहस्ताभिघातादेर्निमित्तकारणस्य विशिष्य हे

राम
१३१

त्। सर्वदैवावश्यं च किंचिद्देशावच्छेदेन गगनेऽभिघातसत्त्वाच्छब्दसामान्यं प्रत्येवाभिघातत्वेनासमवायिकारण २
तु त्वावश्यकत्वादेवातिप्रसंगभंगसंभवे तेषां विशेषतोऽसमवायिकारणत्वे मानाभावः किंतु लाघवात्सामान्यतः शब्द
विभागजन्यशब्दं प्रतिऽभिघातत्वेनैवासमवायिकारणत्वसंभवेपि शब्दविभागजशब्दं प्रत्यभिघातस्यास
मवायिकारणत्वव्यवहाराभावाच्छब्दविभागाजन्येति शब्दविशेषणं तथा च निश्चलभेर्याकाशसंयोगस्यासम
वायिकारणवृत्तिजातिरेव नास्ति कुत्रापीति व्याप्तिः येन तद्धारणार्थस्य श्री जन्यत्वं विशेषणमुपादेयं न च विनिगमका
भावात् संयोगत्वेनाप्यसमवायिकारणता निश्चलभेर्याकाशसंयोगस्यासमवायिकारणत्वं दुर्वारमिति वा
च्यं संयोगत्वेन कारणत्वस्य शब्दासमवायिकारणव्यवहाराभाजने मनोगगनसंयोगे नोदने च वर्तमानतयाऽसमवा
यिकारणत्वासंभवात् संयोगत्वस्य व्यापकधर्मत्वेनान्यथासिद्धत्वाच्च न च भेर्याकाशसंयोगादावप्यसमवायिका
रणत्वव्यवहारात्तस्य विशेषतोऽसमवायिकारणत्वमावश्यकमिति वाच्यं ऽभिघातात्मकभेर्याकाशसंयोगे
ऽभिघातत्वेन सामान्यकारणतामादायैवासमवायिकारणत्वव्यवहारसंभवात् निश्चलभेर्याकाशसंयोगे चासम

गु.शि. वायिकारणत्वव्यवहारस्यैवासिद्धेः। न च भेर्याकाशसंयोगादिविशेषितोः समवायिकारणत्वाभावे समवायसंबंधेन श
१३२ ब्दोत्पत्तिर्गगन एव नान्यत्रेत्यत्र किं नियामकं। अभिघातसामान्यस्य समवायसंबंधेन पृथिव्यादावपि सत्वादिति वा
13 च्यं शब्दविशिष्टसमवायस्यासमवायिकारणतावच्छेदकसंबंधत्वादेवान्यत्र समवायसंबंधेन तदनुत्पादसंभवात् अ
न्यथा भेर्याकाशसंयोगादिविशेषितोः समवायिकारणत्वेऽपि संयोगस्य द्विष्ठतया भेर्यादौ समवायेन शब्दोत्पत्ते
र्दुर्वारत्वात्। अथवा शब्दत्वावच्छिन्नं प्रत्याकाशत्वेन समवायिकारणत्वेन समवायिकारणसत्वान्नान्यत्र समवायेन त
दुत्पत्तिः विशिष्टस्य संबंधत्वेऽपि विशेषणविशेष्यभावविनिगमकाभावात् कार्यकारणभावद्वयस्यावश्यकत्वात्। अथवा
समवायसंबंधेन शब्दत्वावच्छिन्नोत्पत्तिं प्रति समवायसंबंधेन शब्दत्वेनापि निमित्तकारणता अतो नान्यत्र समवायेन
तदुत्पत्तिः सर्वदैवावश्यं कुत्रचिद्देशे आकाशे शब्दसत्वान्न व्यभिचारः। न चैवमभिघातत्वेन सामान्यतो समवायिका
रणत्वेऽपि मानाभाव इति वाच्यं। आघातं प्रति शब्दस्यासमवायिकारणत्वव्यवहाराभावेन तस्यासमवायिकारण

राम

१३२

त्वारणत्वासंभवाद्भावकार्यस्य तासमवायिकारणत्वानुरोधेन तदभ्युपगमादित्येव तत्त्वं। ननु शब्दासमवायिकारण
स्पर्शजन्यसंयोगत्वमित्येवास्तु किं जातिघटनेत्यत आह। अतिरेति। अंत्रालिकत्वं संयोगविशेषणं संयोगानां
अभिघातानां न चैतेषामभिघातत्वे शब्दानुपधानमेव कुत इति वाच्यं। विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः
फलोपधायकत्वेन तत्र भेरीदंडाभिघाताघातत्वरूपविशेषकारणाभावादिति भावः। इदं योपलक्षणं शब्दोपधायकेऽपि नि
मित्तकारणभेरीदंडाभिघातादावव्याप्तिर्वीध्यादावैककार्यसमवायप्रत्यासत्त्या शब्दकारणत्वरूपस्य शब्दासमवा
यिकारणत्वस्योक्तस्य तया व ध्वंसविवक्षणीयत्वेन तस्य तत्राभावात् ग्रंथकृता तु वक्ष्यमाणकल्पे तत्राव्याप्त्यसंभवे
न सर्वकल्पसाधारणतया फलानुपधायकवव्यावृत्तिरभिहिता। ननु भेर्याकाशसंयोगनिष्ठासमवायिकारण
तावच्छेदकवैजात्यमवश्यमभिघातत्वदंडाघाताकाशाभिघातसाधारणमपि वाच्यं। अन्यथा निष्फलभेर्याकाशसं
योगादावपि शब्दासमवायिकारणत्वव्यवहारानुरोधेन तच्छब्दविशेषे भेर्याकाशसंयोगादेर्विशेषतोऽसमवा

गु.प्र यिकारणत्वव्यवहारानुरोधेन तद्वद् विशेषे भेर्याकाशसंयोगादेर्विशेषतोऽसमवायिकारणत्वावश्यकत्वेऽ
१३३ भिघातत्वेन सामान्यतोऽसमवायिकारणत्वे मानाभावेन तत्रासमवायिकारणत्वस्यैवादुर्घटत्वापत्तेः। तथा च तद्
133 त्वमभिघातत्वादिव्यक्तेरविषयत्वादसमवायिकारणतावच्छेदकं भेर्याकाशसंयोगनिष्ठवैजात्यव्याप्यतया भेरीदण्डाभि
घातरूपनिमित्तकारणे व्याप्तिर्दुर्वारेत्यस्वरसादाह। यद्वेति। शब्दजनकेतिरिक्तं यज्जनकता सामान्यस्य लक्षण
घटकतया भेरीदण्डाभिघातत्वाद्युपलक्षितनिमित्तकारणतावच्छेदकवैजात्यमादायैव तत्र लक्षणसमन्वयः। स
चत्वासमवायिकारणे समवायिकारणतावच्छेदकवैजात्यमादाय लक्षणसमन्वयः। वेगस्याभिघातहेतुत्वे
मानाभावान्निस्खलभेर्याकाशसंयोगे पि लक्ष्यत्वातोऽसमवायिकारणतावच्छेदकवैजात्यमादाय न तत्रातिव्या
प्तिः। न च कृत्वरत्वाद्यवच्छिन्नोत्पत्तिनियामकनिमित्तपवनसंयोगनिष्ठनिमित्तकारणतावच्छेदकवैलक्षण्यमा
दायनोदनाघातात्मकनिमित्तपवनसंयोगेऽतिव्याप्तिरितिवाच्यं। वायुनिष्ठपरस्परव्यावृत्तवैलक्षण्यस्यैव कृत्वरत्वा राम

१३३

घवद्भिन्नोत्पत्तिनियामकतया निमित्तपवनसंयोगे तादृशजातिविरहात्संयोगनिष्ठवैलक्षण्यमुपगमे तद्व्याप्य
विरुद्धभेदेन नोदनत्वाभिघातत्वकर्मजत्वसंयोगजत्वानां बहूनां कल्पनापत्तेः कारणतासमानावच्छेदकत्वप्रत्या
सत्त्याविलक्षणेन वायुसंयोगत्वेन विलक्षणवायुत्वेन वा तदन्यदेतदिति भावः। अत्र शब्दजनकवृत्तीत्युक्तौ संतानगु
णत्वसंयोगत्वनोदन[illegible]त्वादिमादाय नातिव्याप्तिः। नोदनत्वादेरपि निमित्तपवनसंयोगवृत्तित्वेन च शब्दजनकवर्तमानत्वा
दतो वद्धिदकानुधावनं शब्दविभागादावतिव्याप्तिवारणाय यद्वृत्त्यंतमिति बोध्यं। उक्तास्वरसं सूचयमेव प्रकटयति
तथाचेति। एतादृशतात्पर्ये चेत्यर्थः। निमित्तेति। भेरीदंडाभिघातादिलक्षणनिमित्तकारणे इत्यर्थः। असमवायीति
अभिघातकदंडाकाशाभिघातभेर्याकाशाभिघातादिलक्षणसमवायिकारणे इत्यर्थः। एकजातिविरहेपीति।
अभिघातत्वादिरूपसंयोगत्वव्याप्यैकजातिविरहेपीत्यर्थः। नक्षतिरिति। भेरीदंडाभिघातादेर्निमित्तकारणेना
व्याप्तिरित्यर्थः। मतमात्रेति। लाघवात्केवलसमवायघटितसामानाधिकरण्यप्रत्यासत्त्यैव नोदनं प्रतीवाभिघा

गु.शि तंप्रत्यपिस्पर्शस्यहेतुत्वमतोमूर्तमात्रवृत्तिसंयोगएवाभिघातइतिमतेत्वित्यर्थः।तन्मते कार्यैकार्थ्यसमवायप्र
१३४ त्यासत्त्यापकलोपधायकत्वरूपासमवायिकारणत्वघटितप्रथमलक्षणस्याभिघातमात्रएवासंभवात्तादृशासम
वायिकारणस्यगगननिष्ठसंयोगस्याभिघातत्वाभावात्पद्धत्वादिनाऽभिहितस्यद्वितीयलक्षणस्यासमवायि
134 कारणतावच्छेदकवैजात्यमादायसबलाबलभेर्याकाशसंयोगादावतिव्याप्तत्वादितिभावः।सामर्थ्यादिति।श
ब्दासमवायिपदस्यतात्पर्यादित्यर्थः।तन्मात्रइतिभेर्याघाकाशसंयोगस्यापिशब्दासमवायित्वेनभेर्यादिवृ
त्तितयातद्बोधकतादवस्थ्यमतोमात्रपदग्रहणं।तन्मात्रवृत्तित्वंचतदितरावृत्तित्वंशब्दासमवाय्यवृत्तिजातिवृत्त्वंतार्थः।त
थाचशब्दासमवाय्यवृत्तियतद्वृत्तीत्युक्तौघटपटसंयोगवृत्त्यन्यतरकर्मजत्वादिमादायघटपटसंयोगादावतिव्या
प्तिरतआह।शब्दस्यकारणमिति।सत्तागुणत्वविभागत्वादिमादायातिव्याप्तिवारणायव्याप्यांतं।तन्नचमूर्तमात्रवृ
त्तिसंयोगस्यैवाभिघातत्वनयेपिस्पर्शजन्यत्वविशेषणप्रक्षेपेणद्वितीयलक्षणस्यैवसम्यक्त्वात्किमेतावतातु
राम
१३४

ष्येति वाच्यं। अस्य शिजन्यत्वविशेषणप्रक्षेपे गौरवात् प्रकाशोक्तासमवायिपदस्य निरर्थकत्वप्रसंगाच्चेति भावः।
।लाघवमनुसृत्याह। द्रव्येति। मेयीकाशसंयोगवृत्त्यसमवायिकारणतावच्छेदकवैजात्यवारणाय वृत्त्यंतं
अन्यतरकर्मजत्वादेर्नानात्वेन तद्वारणाय नोदनत्वनिविडत्वादिवारणाय चाऽवच्छेदकांतं समवायेन तद्वत्त्व
लाभाय च जातिपदमिति भावः। यथाश्रुते दंडादेस्तत्कारणस्य घटघसमवायिकारणत्वापत्तिरित्येतां व्याचष्टे
।कार्येति। एकस्येति कार्यत्वनिरूपकत्वमाश्रयतया कार्यस्य कारणस्य प्रतियोगितया एवं कारणत्वनिरूपकत्वं
कारणस्याश्रयतया कार्यस्य प्रतियोगितयेत्यर्थः। तदेकार्थेति तत्समवायिनिष्ठस्वसमवायघटितप्रत्यास
त्त्येत्यर्थः। तथा च तन्निष्ठकार्यतानिरूपको यो धर्मो तत्समवायिनिष्ठस्वसमवायप्रत्यासत्त्या या तत्कारणता तदाश्र
यत्वं तदसमवायिकारणत्वं भवति यथा घटनिष्ठा या कार्यता तन्निरूपको धर्मः श्वा आश्रयता घट एव तत्समवायिक
पालनिष्ठस्वसमवायप्रत्यासत्त्या घटकारणं कपालद्वयसंयोग इति। कपालद्वयसंयोगे घटासमवायिकारणत्वं ए

गु.टि वं घटरूपनिष्ठा या कार्यता तन्निरूपको धर्मी प्रतियोगितया घट एव तत्समवायिकपालनिष्ठस्वसमवायप्रत्या
१३५ सत्त्या कपालरूपं घटरूपकारणं कपालरूपस्य स्वसमवायिसमवेतत्वसंबन्धेन घटनिष्ठतया घटरूपहेतुत्वा
135 दिति कपालरूपं घटरूपासमवायिकारणं यत्तु तदीयकारणतानिरूपको यो धर्मी तत्समवायिनिष्ठस्वसम
वायघटितप्रत्यासत्त्या यातत्कारणतातदाश्रयत्वं तदसमवायिकारणत्वं। भवति च घटीया या कारणता तन्नि
रूपको धर्मी प्रतियोगितया घट एव तत्समवायिकपालनिष्ठस्य स्वसमवायप्रत्यासत्त्या कारणं कपालद्वयसं
योग इति कपालद्वयसंयोगो घटासमवायिकारणं। एवं घटरूपीया या कारणता तन्निरूपको धर्मी आश्रयतपर
घट एव तत्समवायिकपालनिष्ठस्वसमवायं कारणमिति कार्यत्वकारणत्वघटितलक्षणद्वये तात्पर्यमिति भा
वः। प्रत्येकपदव्यावृत्तिस्त्वास्मत्कृतप्रकाशरहस्येऽनुसंधेया। श्रवणत्वादिवृत्ति कार्यसमवायप्रत्यासत्त्या जनके
ज्ञानधर्मादावतिव्याप्तिर्नोद्भावनीया। एतदस्वरसादेव प्रकाशकृता लक्षणान्तरप्रणयनस्यानर्थकत्वात्तन्नानुप्रकाशे

घटितप्रत्यासत्त्या कपालरूपं घटरूपासमवा रु

राम
१३५

३८

प्रत्यासत्त्येत्यं तस्य तत्कार्ये तत्कारणे कार्यैसमवायान्यतरप्रत्यासत्येत्यर्थः। स च नित्यमात्रसमवेतज्ञानादिलक्षणकार्ये
स्थले ऽप्रसिद्धः तत्कारणस्यात्मादेरेकार्थसमवायाप्रसिद्धेः तथा च तदसमवायिकारणे आत्ममनःसंयोगादावव्या
प्तिरित्यत आह। अन्यतरं तस्येति कार्यकारणान्यतरेति तत्कार्यकारणान्यतरे त्यर्थः। एतद्घटक कारणपदार्थमाह।
कारणमिति। उष्णादिव्युदासइति तेजोगतोष्णस्पर्शादिव्युदासइत्यर्थः। तस्यापि पाकजरूपादिकारणं तेजःसंयोग
स्तदेकार्थसमवायप्रत्यासत्त्या पाकजरूपादिकारणत्वादिति भावः। आदिपदाद्द्रव्यसमवेतलौकिकचाक्षुषादिज
नकमहत्त्वोद्भूतरूपादिपरिग्रहः तस्यापि द्रव्यसमवेतचाक्षुषादिकारणं विषयतया द्रव्यसमवेतं तदेकार्थसमवा
यप्रत्यासत्त्या द्रव्यसमवेतलौकिकचाक्षुषादिकारणत्वादिति भावः। एकैकेति। तदेकार्थसमवायमात्रस्योपादाने ऽव
यविरूपाद्यसमवायिकारणे ऽवयवरूपादावव्याप्तिः तत्कारणैकार्थसमवायमात्रोपादाने द्रव्याद्यसमवायिका
रणे ऽव्याप्तिरित्यर्थः। ज्ञानादीति। ज्ञानादेरिच्छाद्यसमवायिकारणत्ववारणायेत्यर्थः। अस्य कारणत्वविशेषणत्वे कार

गु॰ टि णत्वमात्रस्यैव तथात्वात् ज्ञानादावतिव्याप्तिः तादवस्थ्यमतो व्याचष्टे। कारणे विशेषणमिति तथा चात्मविशेषगुणान्य

१३६ त्वे सति तादृशप्रत्यासत्त्या तत्कारणताश्रयत्वं तदसमवायिकारणत्वमिति लक्षणं फलितमिति भावः। यद्वोक्तौ विशेषगु

णत्वस्य प्रवेशे गौरवादाह। तदर्थश्चेति। आत्मविशेषगुणान्यत्वपदार्थश्चेत्यर्थः। अनात्मसमवेतेति आत्मभिन्नसम

136 वेते असमवेतो यो धर्मः आत्ममात्रसमवेतसमवेतो धर्मः तत्समवायिभिन्नत्वमित्यर्थः। तादृशधर्मश्च ज्ञानत्वादिरि

ति ज्ञानादिव्युदासः। न चात्मसमवेतान्यत्वमेवास्तु तावतैव ज्ञानादिवारणसंभवाच्चेदिति वाच्यं। आत्ममनःसंयोगाद

व्याप्तिप्रसंगात्। न च तथापि आत्मभिन्नसमवेतत्वमेव तदस्त्विति वाच्यं। आत्मैकत्वैकपृथक्त्वयोरव्याप्तिप्रसंगात्। संयो

गादयश्चात्वादिपदादभिघातजनकस्य स्फोटादेः दध्यादजनकस्य विशेषणादेश्चापरिग्रहः। तेपि संयोगादयोपि। कार्यान्त

राणां संयोगादीनां तथाप्यसमवायिकारणसामान्यस्यैवेदं लक्षणमिति तस्याविलक्ष्यत्वान्नातिव्याप्तिः। न च कार्य

कारणान्यतरपदस्य तत्तत्कार्यतत्कारणान्यतरपरत्वात् कथमस्यासमवायिकारणसामान्यलक्षणत्वमिति वाच्यं।

राम
१३६

कार्यकारणान्यतरपदस्य स्वनिरूपककार्यत्वनिरूपककार्यकारणान्यतरपरत्वात् स्वपदमग्रिमकारणतापरमिति
भावः। ननु तथापि विभागाद्यसमवायिकारणत्वं तादृशाप्रत्यासत्त्या विभागादिकारणत्वं तत्र संयोगादेवेति व्याप्तमे
वेत्यत आह। कार्ये विशेषेति कारणविशेषेति विभागासमवायिकारणलक्षणे संयोगान्यत्वं विशेषणं देयम
भिधायासमवायिकारणत्वलक्षणे स्पर्शान्यत्वं विशेषणं देयमित्यर्थः। निमित्तेति। शब्दनिमित्तेत्यर्थः। तथा च त
स्यापि तादृशप्रत्यासत्त्या पवनाकाशादिविभागं प्रति हेतुत्वादसमवायिकारणसामान्यलक्षणस्य तत्रातिव्याप्तिर्दु
र्वारेति भावः। पवनाकाशसंयोगोपि कार्याकार्यसंयोगं प्रति स्वरूपयोग्य एव वायोरंत्यावयवित्वाभावादित्यतामनोग
गने त्युक्तं। असमवायिकारणसामान्यलक्षणत्वाभिप्रायेणैव परिष्करोति। यत्कार्यस्येत्यादि तादृशप्रत्यासत्त्या स्वस्व
कारणान्यतरे कार्यसमवायप्रत्यासत्त्या। तदसमवायिकारणत्वेति तत्कार्यासमवायिकारणत्वे त्यर्थः। तत्कार्यप्रति
योगिकेति तत्कार्यप्रतियोगिकं यत्तद्भिन्नत्वेन विशेष्यदलघटकीभूतकारणत्वं विशेषणीयमित्यर्थः। नच यत्का

गु.शि. र्यस्य यत्र कारणत्वेन तदसमवायिकारणत्वव्यवहार इत्येवास्तु किं तादृशप्रत्यासत्त्येत्यनेनेति वाच्यं । तदनुपादाने कार्यकार
१३७ णान्यतरैकार्थप्रत्यासत्त्येति प्रकाशोक्तकारणत्वविशेषणस्य वैयर्थ्यापत्तेः तदुपादाने च तादृशसंयोगादिनिष्ठविभा
137 गादिप्रतियोगिककारणतातिरिक्ताया दण्डनिष्ठघटकारणताया असमवायिकारणत्वव्यवच्छेद एव तद्विशेषणप्रयोज
नेन च तथापि यस्मिन्नेव कार्ये स्वकारणान्यतरैकार्थसमवायप्रत्यासत्त्या कारणेन तदसमवायिकारणत्वव्यवहार इत्ये
वास्तु किं यत्कार्यस्येत्यनेनेति वाच्यं तदनुपादाने यत्त्वतत्त्वयोरननुगततया विभागादिप्रतियोगिकरूपादिवृत्तिका
लत्वावच्छिन्नसाधारणकारणताभेदस्यापि प्रवेशाद्व्यर्थविशेषणतापत्तेः गौरवापत्तेश्च तत्कार्यप्रतियोगिकभिन्नत्व
मात्रे कृते विभागवृत्तिविभागासमवायिकारणत्वस्यापि संग्रहो न स्यादत उक्तं वृत्तीति तद्वृत्तिभिन्नत्वमात्रे कृते संयोगवृत्ति
विभागकारणत्वस्यैव संयोगवृत्तिसंयोगकारणत्वस्यापि संग्रहो न स्यादत उक्तं तत्कार्यप्रतियोगिकेत्युक्तं न च तत्कार्यीय
तत्कारणभिन्नत्वे सतीति कारणविशेषणमेवास्तु किं वृत्तित्वमन्तर्भाव्य कारणताविशेषणेनेति वाच्यं । विभागी

राम
१३७

यकारणस्य संयोगस्य तद्भिन्नत्वाभावेन संयोगप्रत्यक्षसमवायिकारणत्वानुपपत्तेरिति भावः। नन्वेवमेतेनैव विशेष
णेनात्मविशेषगुणस्यापि वारणे नात्मविशेषगुणान्यत्वे सतीति विशेषणं व्यर्थमत आह। आत्मेति। तदन्यत्वमे
वेति लाघवात् सामान्यतस्तदन्यत्वमेवोक्तमित्यर्थः। तथा चानन्तभेदप्रवेशे गौरवात् इच्छादिप्रतियोगिकज्ञानादिवृ
त्तिकारणताभेदे विशेषणकोटौ न प्रविष्ट इति तद्विशेषणं सार्थकमिति भावः। केचित्तु। सत्यन्तस्यैवायमर्थस्तेनोपधा
ऽयमर्थो लभ्यते तत्प्रकारप्रदर्शनमात्मविशेषगुणेच्छित्वादिना कृतमित्याहुः। मिश्रास्तु। यथोक्तप्रत्यासत्त्या फला
नुपधायकं यत्तावद्यवृत्तिरूपकोटौ नीलत्वादिना स्वरूपयोग्यतालक्षणसमवायिकारणता सत्तातत्राव्याप्तिवार
णाय जातिगर्भसमवायिकारणत्वलक्षणमाहुस्तन्मतमुपन्यस्यति। केचिदिति। तादृशेति। स्वनिरूपककार्यताका
रणान्यतरैकार्थसमवायरूपप्रत्यासत्तिगर्भा या कारणता तदभावव्याप्या या जातिः परत्वापरत्वद्वित्वादि
रूपा तदसमानाधिकरणो यो धर्मो रूपत्वादिः क्रियात्वादिश्च तत्समवायित्वमित्यर्थः। रूपपदं कारणतापरं। न च तादृशका

गु.दि
१३८
138

रणतासमानाधिकरणसत्ताव्याप्यव्याप्यजातिमत्त्वमि[illegible]त्येवास्तु किंगुरुतयासंभेणेति वाद्यांादित्वद्विपर्यन्तत्कादाव
ति व्याप्यापत्तेः। तादृशकारणताभावसमानाधिकरणेति कृते रूपादावव्याप्तिः तद्वृत्तिरूपत्वादीनामपि तादृशकारणताभा
ववदंत्यावयविनिष्ठरूपादौ वृत्तेरतो व्याप्यत्वपर्यंतं रूपत्वादेरपि तादृशकारणताभावव्याप्यत्वात् तद्रूपत्वादिसमानाधिक
रणत्वादसंभववारणाय जातिपदं जन्यमहत्त्वादौ तु परममहत्त्वावृत्तिकापकर्षमादाय संख्यामहत्त्वादिजन्यतावच्छेद
कजातिमादाय वा लक्षणसंगतिरिति भावः। नन्वेवं मनोगगनसंयोगादावपि तादृशसंयोगत्वसत्त्वादतिव्याप्तिरित्य
त आह। मनोगगनेति। सामान्यतः कार्यविशेषानंतर्भावेन तथात्वेऽपि लक्ष्यत्वादेवेति भावः। विशेषे तु विशेषलक्षणे
तु पर्यवसन्नेवेति तत्तत्कारणविशेषान्यत्वं विशेषणं देयमित्यपि बोध्यं। तद्व्यक्तित्वमित्यादि मनोगगनसंयोगादावसमवायिकारण
त्वव्यवहाराभावादन्यथापरिमाणसामान्येऽपि तद्व्यवहारस्य सुवचतया परममहत्त्वाणुत्वयोरव्याप्यापत्तेः। तत्र तादृश
त्व कारणताभावव्याप्यपरममहत्त्वादिसत्त्वादिति भावः। अणुत्वत्वादीनामिति। आदिपदादणुमात्रनिष्ठोत्कर्षापकर्षपर

राम
१३८

ग्रहः। अव्याप्तिप्रसंगादिति अणुपरिमाणेः व्याप्तिप्रसंगादित्यर्थः। किंचित्तु। अणुत्वपरममहत्वयोर् व्याप्तिप्रसंगादित्य
र्थः। न च परममहत्वे महत्वत्वमादाय केवलस्य लक्षणं संगतिरिति वाच्यं। परिमाणत्ववन्नित्यस्वरूपयोग्यवृत्तित्वेन महत्वत्व
स्यापि न कारणतावच्छेदकत्वमपितु महत्तमहत्वत्वमेव तथेत्यभिप्रायादित्याहुः। ननु द्रवत्वेऽतिव्याप्तिः तस्य संग्रहं प्रत्ये
व निमित्तकारणत्वेनैकाश्रितनिमित्तत्वाभावादित्यत आह। नौकेति। हेतुत्वं निमित्तकारणत्वं ननु कथं न संयोगविशे
षस्यैव तत्र गमनप्रतिबंधकत्वमन्यथा भस्त्रादावपि यत्किंचिज्जलसंबंधसत्त्वे नौकादिगमनापत्तेरित्यस्वरसादाह। द्र
वत्वान्येति वेति। उक्तैकाश्रितेति संयोगस्य विभागं प्रति निमित्तत्वेपि सनैकाश्रितत्वं स तु न भावकार्यः प्रकाशस्य का
र्यपदस्य भावकार्यपरत्वादिति भावः। ननु तथाप्यनुष्णाशीतस्पर्शेऽतिव्याप्तिरनुष्णाशीतस्पर्शत्वेनैव पाकजादिकं प्रति जनकतया त
स्यापि तादृशनिमित्तकारणतावच्छेदकाभाववत्वादित्यस्वरसादाह। यद्वेति। पाकजनिमित्तकारणवृत्तिस्पर्शत्वमादाया
नुष्णस्पर्शे व्याप्तिवारणाय स्पर्शत्वान्येति अनुष्णस्पर्शे शीतत्वादिमादाय लक्षणसमन्वयः। अनुष्णाशीतस्पर्शे च तादृशो

गुणि १३९ 139 स्पत्वसत्वान्नातिव्याप्तिः। इत्थं च संयोगविभागान्यत्वमपि न वक्तव्यं मनोगगनसंयोगविभागे पुरुषादृष्टविशेषनिमित्तकार-
णवृत्तिसंयोगत्वविभागत्वसत्वादेकातिव्याप्तिविरहादिति भावः। ननु शीतस्पर्शेऽव्याप्तिः तस्योदनादिपाकजरूपादिनि-
मित्तत्वादत आह। पाकजविशेष इति। जलादेरित्यादिपदाद् घृतादिपरिग्रहः। लघुलक्षणमाह। बलादीति। धावत्पाक-
जनिमित्तकारणेषु संयोगविभागेषु स्पर्शे इति व्याप्तिवारणायानुत्यंतं स्पर्शे स्नेहयोरभिघातसंग्रहनिमित्तत्वात् तत्रा-
व्याप्तिवारणाय एकाश्रितेति। अनुष्णस्पर्शे शीतत्वादिमादाय लक्षणसमन्वयः। पात्वादिवारणाय असमवायिका-
रणवृत्तीति कर्मवारणाय गुणत्वमिति। ननु गुरुत्वस्य एकाश्रितक्रियानिमित्तत्वेऽपि वेगस्य एकाश्रितं प्रति निमित्तका-
रणत्वाभावादतिव्याप्तिरत आह। गुरुत्वस्येवेति स्पर्शस्तु नाभिघातजक्रियायां निमित्तमिति नानुष्णस्पर्शेऽव्याप्तिः
एवेवादिति द्रवत्वान्येति विशेषणादित्यर्थः। द्रव्यारम्भकतावच्छेदकसंयोगवृत्तिवैजात्यस्य नोदनताभिघातत्वविरुद्ध-
त्वेतस्याविताद्दशैकाश्रितशब्दनिमित्तकारणवृत्तित्वात् तदादाय संयोगेऽतिव्याप्तिवारणाय संयोगान्यत्वमपि वक्तव्यं।

राम १४१

ननुलक्षणद्वयेऽप्येवं द्विपृथक्त्वादावतिव्याप्तिस्तत्र नादशापृथक्त्वत्वस्त्वादत आह । सर्वत्रेति । वृत्त्यमिति जातिविशेषणं
वृत्त्यमित्यस्यार्थः । परत्वापरत्वयोरविभुवृत्तित्वस्याध्वंसौ प्रति निमित्तकारणत्वे जातिव्याप्तितादवस्थ्यादाह । ज्ञानेतरेति । सु
खदुःखेतरत्वमिति सुखदुःखभावनासुखदुःखाद्वेषभावनाजनकत्वमादाय लक्षणेऽपपादनायाह धर्मेतरेति नोक्तं । गुण
त्वादेरप्युत्पत्तेनैव वारणादाह गुणेत्यादिषु अपूर्वकमिति । सुखदुःखयोरिति । तथाच तयोरव्याप्तिरिति भावः । प्रकाशकृता
यथा चेति मूले व्यवहितपूर्वोक्तसाधर्म्योपपादकत्वेन व्याख्यातं तच्चैन संदर्भशुद्धमित्यतः प्रकृतसाधर्म्योपपादकत
येव स्वयं व्याचष्टे । मूल इति । तदभावे एवकारार्थस्यासमवायिकारणत्वाभावस्याभावे । व्याप्यत्वासिद्धिमिति । असम
वायिकारणत्वरूपपरवि साध्यस्य व्याप्यत्वासिद्धिमित्यर्थः । पूर्वोक्तासमवायिकारणलक्षणस्यैवात्र घटकत्वा
दिति भावः । स्वरूपेति संयोगमात्रस्यैव मूर्तवृत्तित्वानियमादिति भावः । कार्येति । तथाच कर्मणामनाभावः इति भावः । प्रागु
क्तयुक्तिमेव विवृणोति । सामान्येति । अत्रापीत्यादि केचिदित्यन्तमेकं मतं । ननु तथाप्यनुष्णाशीतस्पर्शेति व्याप्तिः तदु

गु.शि. त्वकर्षेणाभिघातजक्रियोत्कर्षेण तस्यापि क्रियानिमित्तत्वात् तत्राह। अनुष्णस्पर्शस्येति कार्यमिति असमवायिकारणत्व
१४० मेवेति पूर्वोक्तसाधर्म्ये कार्यैकाश्रितत्वविशेषणप्रक्षेपेण त्वर्थः। निमित्तत्वमिति निमित्तकारणत्वमित्यर्थः। अ
140 न्यथा एकाश्रितविशेषणे दत्तेपि अभिघातजक्रियामादाय निमित्तकारणत्वं तत्र दुर्वारं स्यादिति भावः। नन्वत्रापि स्नेहा
दावतिव्याप्तिवारणार्थमेकाश्रितत्वविशेषणमावश्यकं तेन मूले संग्रहणं नावितिविरुद्धमतस्तत्राह मूल इति केचिदिति
द्रवत्वस्य पूर्वोक्तेषु तत्रानैकागमनाहेतुत्वमेवास्वरसः मतान्तरमाह। स्पर्शत्वपदमिति। तेन शीतस्पर्शत्वादिमादा
यनातिप्रसंग इति भावः। निराकरोतीति। इत्थं च कार्यैकाश्रितत्वविशेषणं नोपादेयं कार्यपदं च गुणपरं तेन ध्वंसादि
निमित्तकारणरसविशेषवृत्तिरसत्वमादाय रसेनातिव्याप्तिरिति भावः। एवमिते स्वरसान्तरं प्रकटयति। वक्ष्यतीति चे
ति। चो हेतौ नन्वेवं तत्र पूर्वोक्तनिमित्तकारणत्वव्यवच्छेदः संगत इत्यत आह। व्यवच्छिन्नमिति। परत्वापरत्वच्छिन्नद्वि
पत्वादीनामकारणत्वमिति भावः इति पाठमभिप्रायेण जातिघटनां विनैव यथाश्रुतभाष्यं व्याचष्टे। परत्वेति। स्व

राम
१४०

व्याधिकरणेति। परत्वादेरपि ज्ञानध्वंसादिजनकत्वादव्याप्तिवारणाय ज्ञानत्वधर्मेतरभावेति। स्वव्यधिकरणेतीति। न
च स्वसमानाधिकरणजनकत्वमेव सम्यक्, किं निवेशद्वयगर्भतयेति वाच्यं रूपादावतिव्याप्त्यापत्तेरिति भावः। न
न्विदमप्यावयविरूपादावतिव्याप्तं तस्यापि ज्ञानत्वधर्मेतरभावाजनकत्वादित्यत आह। इदं चेति। साधर्म्यमिति शे-
षः। व्यक्तिविशेषेति। स्वरूपयोग्यायोग्यसाधारणफलानुपधायकव्यक्तिमात्रस्य लक्ष्यत्वाभिप्रायेणेत्यर्थः। तथा चांत्यावय-
विरूपादिकमप्यत्र लक्ष्यमिति भावः। तज्जातीयापेक्षत्वे इति अकारणमात्रवृत्तिजातिमत एव लक्ष्यत्वस्याभिप्रेतत्वे इत्यर्थः
। स्वरूपायोग्यव्यक्तेरेव लक्ष्यत्वस्याभिप्रेतत्वे इति यावत्। जनकत्वेनेत्यं तदर्थं मध्यपाठे हेतुः। [illegible]रूढोतेति। द्वित्वादेः स्व-
रूपायोग्यमध्यपठितत्वेन परिमाणजनकत्वासंभवादिति भावः। अत एवेति। स्वरूपयोग्यायोग्यसाधारणफलानुप-
धायकव्यक्तिमात्रस्य लक्ष्यत्वादेवेत्यर्थः। द्रव्येति। द्रव्यभाष्य इति शेषः। व्यक्तय एव स्वरूपयोग्यायोग्यसाधारणफ-
लानुपधायकव्यक्तय एव परिगणिता इति अकारणत्वरूपसाधर्म्यवत्त्वेन भाष्यकृतोऽभिप्रेता नां पारिमांडल्यादीनां

गुणग्रंथोक्तेस्वयं॥ ॥द्रव्यग्रंथोक्तकारण

[illegible] २८

१ इत्यग्रंथोक्तकारणलक्षणस्य =

गु. ब्रि. मध्येद्रव्यकिरणवत्त्वांपरिगणितानां इत्यर्थः। अन्यथेति। अकारणत्वरूपसाधर्म्यवत्तेन स्वरूपायोग्यवृत्तेरेवद्रव्यभा
१४१ घ्यकृतो ऽसिद्धेतत्त्व इत्यर्थः। तत्रेति। द्रव्यकिरणवत्त्वाभावाघटितपरिगणन इत्यर्थः एतत्त्व रूपाजनकं रूपमित्यादौ
इत्मीय सर्वत्रैक्ये वध्येतो। अप्रत्यक्षत्वमत इति अन्यथापरममहत्त्वस्य विषयविधया स्वप्रत्यक्षजनकत्वे नातिव्याप्त्यापत्ते
१४१ रिति भावः। तत्वरममहत्वेतो ध्यं परममहत्त्वपदवैयर्थ्यं तथाच गगनादिपरममहत्त्वमेवालक्ष्यमिति भावः। नन्वा
त्ममहत्त्वस्य स्वप्रत्यक्षजनकत्वेपि ज्ञानत्वधर्मेतरभावजनकत्वस्यैवप्रकृतेलक्षणेतथा तदभावादेवनातिव्याप्तिः
स्यात् किमेतावता कृष्टपेत्यत आह। सुखादीति। सुखादावव्याप्तिवारणायेत्यर्थः। आदिपदेति। परिमांडल्यादी
त्यादिपदग्राह्ये [illegible]पुअलक्ष्येपि इत्यर्थः। उक्तं स्वव्यधिकरणत्वं एतन्मते वात्मपरिमाणस्यप्रत्यक्षत्वे विपरममहत्व
मिति यथाश्रुतमेव सम्यगिति भावः। रूपाजनकं रूपं रूपमात्रमित्यर्थः। विषय इति शेषः तथाच तत्रो त्याव यवि
रूपपदं रूपाजनकरूपमात्रपरमिति भावः। सजातीयादीत्यादिपदादुक्तसकार्यस्य बलवत्प्याद्यैः परिग्रहः। रसगं राम

१४१

धावित्यनंतरं विषयावित्तिपद्रलीथं एवमग्रेपि सर्वत्र। अभिघाताजनक इति पाठः। अभिघाताद्यजनक इत्यादिपद
साहितपाठस्तु न साधुः। अभिघातद्वारैव अभिघातजक्रियां प्रतिहेतुत्वेनाभिघाताजनक इत्यनेनाभिघातजन्यक्रि
याजनकत्वाभावस्यापि लाभाददिपदपरिग्राह्यालाभावादिति ध्येयं। अवयवविपरिमाणमिति परमाणुत्वपरम
हत्वयोः स्वातंत्र्येणैवोपादानादवयवविपदं विभागाद्यजनक इति आदिपदात्समानाधिकरणज्ञानादेर्ग्रहणं तद्धा
त्ममनःसंयोगस्य विभागजनकत्वनियमेपि शरीरात्मसंयोगस्याश्रयनाशनाश्यस्य विभागजनकत्वासंभवात्तत्
संग्रहवारणाय क्वचित्स्थादिपदमन्यएवपाठः। ननु अवयवविनिकर्मसादीत्यावदवयवकर्मोत्पादनियत इति विशेषि
कवृद्धनये कर्मणो विभागाजनकत्वमसंभवीत्यत आह। मतभेदेनेति। एतत्कर्मणो विभागाजनकत्वं शब्दाजनक
इति तथा च तत्र शब्दाजनकत्वमेवास्तत्वं न तु महाप्रलयाव्यवहितपूर्ववर्तित्वमिति भावः। अदृष्टेति। मिथ्यावासना
त्मकभावनाया अदृष्टजनकत्वं बोध्यं। ननु भावनायाभावनाजनकत्वाभावेन विशेषणस्य व्यावर्त्यप्रसिद्धिरत आ

=परममहत्त्वादीन् विहायानेकसंख्यानेकत्वमात्रोपादानमित्यर्थः =५

गु॰शि ह। भावनाया इति चकारादिति स्वं त्यः शब्द[illegible]श्च रमः संस्कारो ज्ञानं चेति परिगणनस्य चकारादित्यर्थः। इच्छाद्वेषौ
१८२ चेति कृते स्वरूपं चेष्टाजनकत्वमिति ज्ञानोक्ता चकारेण गुरुत्वपतनाभिघाताद्यजनकस्य गुरुत्वस्य क्रियाद्रवत्वाद्य
जनकत्वद्रवत्वस्य स्नेहसंग्रहाजनकस्य स्नेहस्य च परिग्रहः। आचार्यस्य तात्पर्यमिति द्रव्यकिरणावल्यामाचार्य
182 स्य तात्पर्यमित्यर्थः। इह गुणकिरणावल्यां परिमाणादीनामिति आदिपदाद्रूपजनकरूपादेः परिग्रहः तेषां लस्य
द्वर्यं त्वे प्रथमं पठितान् तान् विहाय स्वरमपठितस्य त्रित्वत्रिपप्यकत्वाद्युपादानं न कुर्यादिति भावः। स्वव्यधिकरणेति अन्य
थापरत्वादीनां सुखादिजनकत्वेनाव्याप्त्यापत्तेरिति भावः। सुखादेरपि स्वध्वंसज्ञातधर्मान्याजनकत्वादिति व्या
प्तिवारणाय स्वव्यधिकरणत्वं ज्ञातधर्मविशेषणं इत्थं च तत्र तादृशसाक्षात्कारजनकत्वादेव नातिव्याप्तिरि
ति भावः। लाघवादाह। तादृशजनकेति। न तु स्वव्यधिकरणज्ञातधर्मेतरपरिमाणजनकयोर्द्वित्वबहुत्वयोर
व्याप्तिरत आह। जनकं चेति। तादृशजनकवृत्तिभिन्नेत्यत्र जनकं चेत्यर्थः। नन्वेवं तथाविधसंख्यात्वमादाय एव

रा॰म
१८२

कत्वेऽतिव्याप्तिरत आह। गुणत्वव्याप्येतीति। ननु तथापि संख्यात्वस्यापि रूपादिनिष्ठाभावप्रतियोगित्वात्तस्यै
वाव्याप्तिस्तदवस्थैव अत आह। गुणपदं चेति। स्वध्वंसेति स्वपदमविवक्षितं प्रकृतानुसारेणोक्तं जनकांतं संख्या
भिन्नविशेषणं। अणुत्वादीति। आदिपदात् परममहत्त्वादीनां परिग्रहः। अत्रध्वंसत्वव्यधिकरणत्वान्तर्भावेन
गौरवात्स्वत्वघटितत्वेनाननुगमाच्चाह। आत्मेतरेति समवेतपदादेव ध्वंसो वारितः नोदं किंतु धर्माधर्मभा
वनानामित्यत्रनोपन्निबंधाः ईश्वरज्ञानादेरपिलक्ष्यत्वेनतत्संग्राहकं लक्षणमाह। प्रदेशवृत्तीति। तादृशभावनावृत्ति
त्वं संस्कारत्वमादाय वेगस्थितिस्थापकयोरतिव्याप्तिवारणाय वेगावृत्तीति प्रकाशमवतारयति। स्यात्वं तावद्भावेती
ति। उत्पत्तिकालावच्छेदेन वर्तमानमर्त्यत्वं तदभावमादाय रूपादावतिव्याप्तेराह। एकदेतीति। तथा च स्वाधिकरण
णावच्छेदेनस्यतस्वात्यंताभावाधिकरणं तत्समवेतत्वमित्यर्थः। संप्रदायनयेनीलपीतादिविजातीयनानारूपव
दारब्धेऽवयविनि व्याप्यवृत्तिचित्रमेवातिरिक्तं रूपं न पुनरव्याप्यवृत्तिनानारूपमिति न तत्रातिव्याप्तिरिति भावः।

पित्तविशेषणताविशेषकालनिरूपित १

गु॰शि तत्र वर्तत इति दिङ्निरूपितं विशेषणताविशेषाभ्यां दिक्कालयोर्वर्तत इत्यर्थः। तथा च दिक्कालवृत्तिपरिमाणा
१४३ दावतिव्याप्तिरिति भावः। अन्योन्याभावस्योदाहरणमुक्तोः स्वत्वं ताभावस्य तदाह। कालेनेति। विशेषणताविशे
143 ष इति दैशिकविशेषणताविशेष इति दैशिकविशेषणताविशेषे इत्यर्थः। दिक्कालवृत्तिपरिमाणादावतिव्या
प्तिवारकं मतान्तरमाह। भिन्नभिन्नेति। स्वाभावानवच्छेदकदेशावच्छेदेन स्वाभावाभावाधिकरणे समवेतत्वमित्य
र्थः। अव्याप्यवृत्तित्वमिति। प्रकृते विवक्षितमिति शेषः। नन्वेवं परमाण्वोः संयोगादीनां कथमव्याप्यवृत्तित्वमत आ
ह। परमाण्विति। परिमाणादीनां त्विति जन्यानां परिमाणानां सदपि स्वाभावाधिकरणे समवेतत्वं न देशभेदाव
च्छिन्नं दिक्कालभिन्ननित्यपरिमाणानां तु स्वाभावाधिकरणे समवेतत्वमेव नास्ति दिक्कालपरिमाणयोः सदपि
स्वाभावाधिकरणे समवेतत्वं न किंचिद्देशावच्छिन्नं तस्य समवायेन वृत्त्यवच्छेदकविरहादिति भावः। वर्द्धंतोत्पस्वर
स्तोऽज्ञावनं तद्बीजं किंचिद्देशावच्छेदेन समवेतत्वमित्यस्यैव सम्यक्तया शेषवैयर्थ्यप्रसंगः। अव्याप्यवृत्तेरवच्छेदका

राम
२४३

काभावादिति। वैधर्म्यपदस्याव्याप्यवृत्तित्वपरत्वे स्वनिष्ठत्वस्य प्रमाणत्वासंभवेन प्रमाणे यन्निष्ठत्वसंगतमित्यतो
व्याचष्टे वैधर्म्यमिति। उपलंभेति। एकत्राधिकरणे स्वोपलंभस्याभावोपलंभरूपमित्यर्थः। एवं च प्रमाणे यन्नाहित्य
स्यसंयोगादीनामव्याप्यवृत्तित्वे प्रमाणत्वे नाहेत्यर्थ इति भावः। स प्रमाणे यन्निति। एवं च वैधर्म्यपदमव्याप्यवृत्ति
त्वपरमेव तथा च संयोगादिनामव्याप्यवृत्तित्वरूपं भावाभावान्तरापेक्षया वैलक्षण्यं सप्रमाणकत्वेनाहेति समुदि
तार्थ इति भावः। प्रतिप्रसंगादिति। द्व्यणुकादेरपि विषयितया कालिकसंबंधेन वा ज्ञानादिरूपगुणवृत्तितया द्व्यणु
कादावपि तद्विशिष्टसाध्यसत्त्वादित्यर्थः तथा च तत्रैव विशिष्टसाध्याव्यापकत्वेति भावः। द्व्यणुकादिकारणेयेति द्व्य
णुकादौ विशिष्टसाध्याव्यापकत्वं नाद्यवस्थ्यकारणेयेत्यर्थः। अव्याप्यवृत्तित्वं समवायावच्छिन्नस्वात्यंताभावसमाना
धिकरणत्वे सति समवेतत्वम् वृत्तौ समवायेनाव्याप्यवृत्तित्वव्यवहाराभावादतो द्व्यणुकादावपि समवेतत्वावच्छि
न्नाव्याप्यवृत्तिवृत्तित्वाभावरूपविशिष्टसाध्यसत्त्वादिति भावः। आदिपदग्राह्यमात्मत्वमनन्तत्वादेर्नित्यद्रव्यसमवेतमात्र

गु.
१४४
144

स्यपरिग्रहः। ननु मूर्त्तगुणानां व्याप्यावृत्तिवृत्तिजातिमत्त्वं न विरुद्धं सत्ता गुणत्व संस्कारत्वमादाय रूपादौ वेगे च
व्यभिचारादित्यतो जातिविशेषपरतया व्याचष्टे मूर्त्तेति। सत्तागुणत्वसंस्कारत्वे तु व्यभिचारवारणाय मूर्त्तमात्रवृत्तीति लाघ
वादाह। स्वविषये इति वृत्तिनियामकेति कार्यस्य वृत्तिनियामके इत्यर्थः। तेन वस्त्वादौ चंदनसंयोगादिरिति भावः। यथा श्रु
ते इति समवायिकारणत्वविवक्षातो अणुदेशे तेति स्वल्पदेशावच्छेदेनैवात्ममनोयोगस्य सत्त्वादिति भावः। समवायेन वृत्ति
तालाभायेति समवायसंबंधेन कालनिष्ठतालाभायेत्यर्थः। अन्यथा भगवज्ज्ञानादेरपि कालिकसंबंधेन कालवृ
त्तितया तद्वृत्तिगुणत्वव्याप्यजातिमत्त्वाभावेनाव्याप्तिः स्यादिति भावः। नित्यवृत्तित्वं तु येन केनचिद्वृत्तिनियामकसं
बंधेन विशेषविवक्षाणे प्रयोजनविरहादिति ध्येयं। अप्रसिद्धिवारणायेति कालनित्यगुणवृत्तिजात्यन्यस्य विभु इत्तिर
गुणस्य जातिमतो वा अप्रसिद्धिवारणायेत्यर्थः। सर्वत्र तादृशसत्तागुणत्वसत्त्वादिति भावः। केचित्तु समवेतत्वा
पेक्षया कालनिष्ठनित्यगुणवृत्तिजातित्वस्य गुरुतया तदवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धिरित्यर्थ इत्याहुः

राम
१४४

निखिलेति। अलक्ष्येति जातिमतो विशेषणं तथा च निखिलैः लक्ष्यैः जातिमति सत्तागुणत्वमादायातिव्याप्तिवारणायेत्य
र्थः। एतच्च अन्यां तस्य विभुगुणविशेषणत्वपक्षे जातिमतो विशेषणत्वपक्षे तु कालनिष्ठनित्यगुणजातीयातिरिक्त
निखिलालक्ष्यजातिमद्वारणाय चेति बोध्यं। कालनिष्ठनित्यगुणजातीये संख्यादौ अन्यां तदलाभावादेव गुणत्वव्याप्य
पादानुपादानेऽप्यतिव्याप्तिविरहात्। यथाश्रुतस्य भगवज्ज्ञानादावतिव्याप्तेराह। स्वात्यंताभावेति। अत्र स्वात्यंताभावासमा
नाधिकरणवृत्तीति वृत्तेत्यादेश्च सत्तामादाय सर्वजातिव्याप्तिः गुणत्वव्याप्यत्वेन जातेर्विशेषणेऽपि तथाविधभगवज्ज्ञाना
दिवृत्तिज्ञानत्वादिकमादाय ज्ञानादावतिव्याप्तिरिति तथा नोक्तं द्रव्यवारणाय च गुणपदमिति ध्येयं। प्रतियोगिकोटौ
गुणत्वांशस्यानतिप्रयोजकत्वात् तदपहाय निष्कृष्याह। निरुक्तेति। प्रदेशवृत्तित्वस्य स्वात्यंताभावसमानाधिकरण
मात्रार्थकत्वे भगवज्ज्ञानादावतिव्याप्तिरतो निरुक्तपदं प्रदेशावृत्तित्वे हि वेगावृत्तिजातिमद्रूपार्थकं। यावद्द्रव्यभावित्वं जन्ये
लक्ष्येऽमात्रैः व्याप्तमतो द्रव्यपदं स्वाश्रयपरतया व्याचष्टे। द्रव्यमिति अवयवीति। तेषां स्वाश्रयोत्पत्तिकालावृत्तित्वेन यथा

गु.शि वत्स्वाश्रयकालवृत्तित्वाभावादिति भावः। नन्वेवं यथाश्रुतस्यैव नित्यरूपादव्याप्तिविरहात्प्रकाशे स्वाश्रयेत्यादिविवक्ष
१४५ णमनर्थकमित्यत आह। तद्वृत्तीति। तदवीत्यर्थः। परत्वादौ त्वादिपदात्तत्पाविभावरत्वस्य यावदाश्रयनाशानष्टसंयोगा
145 देश्च परिग्रहः। स्वाश्रये तीत्यस्य प्रकाशइत्यादि स्वपदस्य लक्षणीयत्वे नाभिमतपरत्वे गुणत्वव्याप्यपदवैयर्थ्यमात्मम
नसोः स्वाश्रयाप्रसिध्याऽप्रात्मत्वमनस्त्वमादाय तत्रातिव्याप्तिविरहादतोऽभेदप्रतियोगिपरतया स्वपदं व्याख्याय गु
णत्वव्याप्यपदप्रयोजनमाह। स्वाश्रयेति। स्वाश्रयसमानकालीनध्वंसप्रतियोग्यवृत्तित्वे सति स्वाश्रयसमानकाली
नध्वंसप्रतियोगिभिन्नेष्वनुवर्ततइत्यर्थः। गुणत्वव्याप्येतीति गुणवृत्त्यर्थकमिति शेषः। यथोक्तस्य मात्रपदार्थत्वे विशे
ष्यदलवैयर्थ्यमाह। वस्तुतस्त्विति। तदन्यावृत्तित्वं स्वाश्रयसमानकालीनध्वंसाप्रतियोग्यन्यावृत्तित्वं तादृशाध्वंस
प्रतियोग्यवृत्तित्वमिति यावत्। स्वाश्रयेति। अत्रापि स्वपदं ध्वंसप्रतियोगिपदं न तुलक्ष्यत्वेनाभिमतपरं यावदाश्र
यनाश्यघटादिव्यक्तौ तद्वृत्तिरूपाद्यात्मकधर्माभावातिव्याप्तिवारणाय गुणपदसार्थक्यत्वसंभवेप्यननुगमापत्ते।

राम
१४५

तादृशघटादिविशेषवारणाय आत्ममनोवारणाय च गुणपदमिति भावः। ननु जलपरमाणुरूपे पवनपरमाणु
स्पर्शे चातिव्याप्तिः शुक्लत्वानुष्णाशीतत्वयोः पार्थिवपरमाणुरूपस्पर्शवृत्तितया तादृशधर्मत्वाभावेन तयोस्ता
दृशधर्मत्वसमवायित्वाभावादित्यत आह। अत्रेति। सलिलपवनेति रूपस्पर्शयोः यथाक्रमम् अन्वयः सलिलरू
पपवनस्पर्शजातिवित्यर्थः। विशेषगुणलक्षणमिति स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपाध्यत्यंताभा
वसमानाधिकरणवृत्तिजातिगर्भविशेषगुणलक्षणमित्यर्थः। ननु तथापि पार्थिवावयविरूपादौ तादृशध
र्मादाय लक्षणसमन्वयः नीलत्वादीनां परमाणुरूपवृत्तितया निरुक्तप्रतियोग्यवृत्तित्वाभावादित्यत आह।
अवयवीति। तज्जातीयेति नीलपीतादिजातीयेत्यर्थः। ननु जन्यवृत्ति नीलत्वादेरेव जन्यतावच्छेदकत्वसंभवात्
किं जातिभेदेनेत्यत आह। जन्यद्रव्यादीति। द्रव्यपदं समवायेन जन्यवृत्तित्वलाभाय आदिपदात् समवेतवृत्तित्व
परिग्रहः। तथात्वे कार्यतावच्छेदकत्वे तेषु जलपरमाण्वादिरूपादिषु तेजोरूपस्पर्शयोस्तु भास्वरत्वोष्णत्वमादायैव

मु. शि. लक्षणसमन्वयः जलस्पर्शेतु शीततत्वमादायैव लक्षणसंभवः। जलरसे तु मधुरत्वावांतरविलक्षणजातिस
१८६ त्वादेव नाव्याप्तिशंकापीति भावः। जलीयरूपादौ पृथिवीशुक्लादिव्यावृत्तवैजात्यस्य सिद्धांतसिद्धत्वेपि इदं तदयु
146 क्त्यभावात् तस्यातं ज्येण लक्षणांतरमाह। पाकजेति। पाकजेतरेति पाकजेतरोयः स्वाश्रयवृत्तिध्वंसप्रतियोगीत
द्वृत्तीति योजना। इत्थं च रूपत्वादिमादायैव जलपरमाण्वादिरूपादौ लक्षणसमन्वयः। तस्यापि पाकजेतरस्मि
न्ताद्दशध्वंसप्रतियोगित्ववृत्तेरिति भावः। अत्र रूपत्वादिकं ग्रहाय इतरांतं प्रतियोगिविशेषणं तथा च रूपत्वा
क दिमादाय पाकजरूपादावृतिव्याप्तिरिति सत्यंतं अग्रात्मादिवारणाय गुणपदमिति ध्येयं। ननु तेजोवयवद्वय
प्रचयारब्धसंयोगजन्ये तेजोवयविपरिमाणेऽव्याप्तिः तस्य तादृशप्रचयरूपपाकजन्यत्वेन पाकजान्यत्वाभा
वादत आह। तत्वकादेरिति। समानाधिकरणेति केवलसमवायघटितसामानाधिकरण्यप्रत्यासत्त्या पाकजा
न्यत्वं वेवक्षितमिति भावः। प्रचयजन्यतेजोवयविपरिमाणमपि तथाभवत्येव तेन स्वाश्रयसमवेतत्वसंबंधेनैव प्रचय राम

१८६

स्यहेतुत्वादिति भावः। जात्यघटितलक्षणस्यैवाश्रयनाशादेवपरमेतेति नत्वन्यथेति मूलस्वरससिद्धतया तादृशमेवलक्षण

माह। वस्तुतस्त्विति। आश्रयनाशनष्टपरत्वाघटितव्याप्तिवारणाय प्रथमं सत्वं तत्र परमाणुवृत्तिध्वंसप्रतियोगिवृत्तिनीलत्वादि त्र २

मत्तया रूपादावव्याप्तिवारणाय। जन्येत्याश्रयविशेषणं सत्तागुणत्वमादाय संभववारणाय गुणत्वव्याप्यव्याप्येति ईश्वरबुध्यादा

वतिव्याप्तिवारणाय द्वितीयसत्वं तेन पाकजरूपादिवारणाय विशेष्यदलं। ननु गुणव्याप्यजातिमन्यत्वमित्येवास्तु किं द्वितीयव्या

प्यपदेनेत्यत आह। एकत्वेति। अन्यथा तादृशध्वंसप्रतियोगिद्वित्वद्विपृथक्त्ववृत्तिसंख्यात्वपृथक्त्वत्वादेरुक्तावव्या

प्तिः स्यादिति भावः। नन्वेवं परत्वापरत्वयोर्गुणत्वव्याप्यजात्यतावादाश्रयनाशनष्टपरत्वापरत्वयोरतिव्याप्तिर्दुर्वारेत्यत

आह। परत्वेति। तादृशी गुणत्वव्याप्यकालिकपरत्वत्वादिव्याप्या तत्रोत्कर्षापकर्षयोर्विवादादाह। गुणविभाजकेति गुणत्व

व्याप्यपदं विहाय गुणविभाजकोपाधिव्याप्यत्वं वक्तव्यमित्यर्थः। इत्थं च कालिकपरत्वत्वादिसत्वादेव न तयोरतिव्याप्तिरिति

भावः। अवयविनिष्ठसांसिद्धिकद्रवत्वेऽव्याप्तिभ्रमं निवारयति। अवयविनइति। देयं त्विति। आश्रयनाशनष्टद्रव्यकर्मवा

गु.शि
१८७
187

रणायेति भावः। ननु मते कार्यविशेषणमसंगतं पर्वोक्तं भिन्नस्यैव घोषशब्दार्थत्वादीश्वरबुद्ध्यादेरप्यत्र शेषपदाभिधा
नयोग्यत्वादित्यत आह। बुद्ध्यादीनामिति। आगन्तुकत्वात् तथा वद्व्यभाविलक्षण्येप्यनुक्तत्वादित्यर्थः। एतच्चेश्वरबुद्ध्या
दीनां शेषशब्दाभिधानयोग्यत्वे हेतुः। शेषशब्दाभिधानयोग्यानां शेषशब्दाभिधानयोग्यानामपि इत्यमपि कार्यपदोपादा
नेपि अपूर्वं निरुक्तं नीति प्रकाशइत्यादि ईश्वरबुद्ध्याद्यतिव्याप्तेराह। जन्यगुणत्वमिति जन्यत्वेनोपादेयमिति मते अपि लक्ष्य
पि कार्यपदं नोपादेयमिति भावः। यथाश्रुतमेवेति। तथा च प्रकाशकारस्य जातिघटनादिप्रयासो निष्फल एवेति हृदयं। तेने
ति। सांसिद्धिकद्रवत्वे तु सांसिद्धिकद्रवत्वमादायैव लक्षणसमन्वय इति भावः। व्याप्तेति। नैमित्तिकद्रवत्ववत्विशेषगु क
ण इति तद्गुणस इति भावः। कश्चिदित्यत्रोदकरत्वमेवास्वरसः। मते स्पर्शपाठाभावमभिप्रेत्याह। स्पर्शस्येति। वस्तुतस्त
स्यापि लक्ष्यत्वे तुल्यत्वादिति भावः। तेनेति। अन्यथा संस्कारत्वस्य स्पर्शसमानाधिकरणमात्रवृत्तित्वाभावात्। स्थिति
स्थापकत्वस्य चसांक्रान्ताघाप्यत्वाभावाद् व्याप्तिः स्यात्। संस्कारत्वान्यत्वस्य विभाजकोपाधिविशेषणस्य फलमुक्तं। गुण

राम
१८७

त्वव्याप्यजातित्वं विहाय गुणविभाजकोपाधित्वविवक्षायाः फलमाह। नवेति। कालिकपरत्वत्वादिजातिमादायेति शेषः।
परत्वत्वापरत्वत्वयोरुभयसाधारण्ये यो जातित्वाभावेन तस्याविगुणत्वव्याप्यजात्यव्याप्यत्वरूपसाक्षाद्व्याप्यत्वसंभ
वाद्विभाजकोपाधित्वविवक्षणे च तस्य परत्वत्वादिरूपविभाजकोपाधिव्याप्यत्वान्न साक्षाद्व्याप्यत्वमिति भावः। नन्वेवं
तत्वस्पर्शसांसिद्धिकद्रवत्वयोरव्याप्तिरत आह। तत्त्वेति। शीतत्वसांसिद्धिकद्रवत्वयोः संग्रहायान्यान्तं जातिविशेष
णं वृत्तित्वद्रव्यत्वादेर्वा वृत्तिवारणाय गुणपदवैयर्थ्यमाशंक्याह। गुणेतीति। कर्मत्वादौ त्वादिपदाङ्गत्वादिपरिग्रहः। ते
जोविशेषगुणत्वमिति। अन्यथा तेजोमात्रवृत्तिसंख्यादिव्यक्तौ तेजोवेगादौ चातिव्याप्त्यापत्तेरिति भावः। एकस्या
पि गुरुत्वस्य रसस्य वा जलावन्युभयवृत्तित्वाभावाद्व्याप्यचे। जलवृत्तिवृत्तीति संग्रहत्वादौ सादिपचाततद्वान्तरोत्कर्षापकर्ष
योः पाकविशेषजनकता वह्निदकजलावृत्तिसंयोगमात्रवृत्तिजातेश्च परिग्रहः। यथाश्रुते संग्रहत्वादिवारणसंभवा
दाह। गुणत्वसाक्षाद्व्याप्येति। रस्पृष्टीतादिमाधुर्यवैलक्षण्यस्यापि गुणत्वव्याप्यत्वादाह गुणत्वेति। गुणत्वसाक्षाद्व्याप्य

गु.शि त्वाभिधाने माधुर्यतररसादौ पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजात्यभावादव्याप्यापत्तिरतस्तयोक्तमित्यं च रसत्व
१४८ साक्षाद्व्याप्यतिक्तत्वादिमादायैव तत्र लक्षणसंगतिरिति भावः। एवं विवक्षणे इक्षुक्षीरादिमाधुर्यवैलक्षण्यवारणं स्फुट
148 यति। तवेति। तत्त्वैलक्षण्यं सुरभित्वादिकमादायेति। इदमुपलक्षणं गुणत्वव्याप्यजातिसाक्षाद्व्याप्यत्वं गुणत्वव्याप्यव्या
प्यजात्यव्याप्यत्वं द्रव्यादिवृत्तिजातेर्विशेषगुणमात्रवृत्तित्वदलेनैव वारणात् तत्र च प्रथमव्याप्यत्वं न्यूनवृत्तित्वं स्वन्यापा
गुणत्वस्यापि गुणत्वव्याप्यतया माधुर्यतररसादौ तिक्तत्वादिमादाय लक्षणसमन्वयासंभवात्। द्वितीयव्याप्यत्वं च
भेदगर्भं स्वन्यापारूपत्वगंधत्वादेरपि रूपत्वगंधत्वादिव्याप्यतयाऽसंभवापत्तेः एवं तृतीयव्याप्यत्वमपि भेदगर्भम
न्यथा तिक्तत्वादेरपि तिक्तत्वादिव्याप्यतया तिक्तत्वादिमादाय लक्षणसमन्वयासंभवात् तथा च गंधत्वमादायापि गंधेल
क्षणसमन्वयसंभवः तस्यापि निरुक्तगुणत्वव्याप्यजातिसाक्षाद्व्याप्यत्वादिति स्मर्तव्यं। नन्वेवं विशेषगुणपदवैयर्थ्यं
पृथिवीद्वयसंयोगमात्रवृत्तिकठिनत्वादेः कर्मादिजन्यतावच्छेदकजातिव्याप्यतया गुणत्वव्याप्यजातिसाक्षाद्व्याप्यत्वाभा

५= ननु तिक्तत्वरूपद्वितीयतृतीयव्याप्यत्वनिवेशे [illegible]दोष उक्तः राम
१४८

वेनतमानायातिव्याप्तिविरहादित्यत आह। कार्येति। कार्यविशेषोपधानादिः कठिनावयवद्रव्यविभागजन्यशब्दवि
शेषादिस्तत्र पक्षे व्याप्तिरिति संयोगयोर्विभागयोरित्यनेनान्वितं। संयोगजसंयोगस्य नद्रव्यजनकत्वमित्यस्वरसा
च्छब्दविशेषजनकविभागाभिधाने भिन्नभिन्नमिति एवं तज्जातिव्याप्यमन्यत्तु तज्जातिविरुद्धमित्यर्थः। अन्यथे
ति कर्मजत्वादेरैक्य इत्यर्थः। सत्त्वेति कर्मजत्वं विना सा जातिर्विभागजनककठिनावयवद्रव्यविभागे तां विना च
कर्मजत्वं संयोगशब्दाजनककर्मजविभाग इति परस्परव्यभिचारादेकस्मिन् कर्मजशब्दारंभककठिनावयवद्रव्य
विभागे सामानाधिकरण्यात्सङ्करापत्तेरित्यर्थः। ननु कर्मादिजन्यतावच्छेदकत्वेन कार्यकारणभावविघटक
त्वादिति भावः। तथाविधेति घटादिलक्षणकार्यविशेषजनके इत्यर्थः। स्पर्शत्वसाक्षाद्व्याप्येति पृथिवीस्पर्शमात्रवृ
त्तीति शेषः। पृथिवीपवनस्पर्शसाधारण्येनानुष्णाशीतत्वादेः स्पर्शत्वव्याप्यजात्यनभ्युपगमेन पृथिवीस्पर्शमात्रवृ
त्ति जातेरपि स्पर्शत्वसाक्षाद्व्याप्यत्वादिति भावः। तादृशजातीति कर्मजत्वादिव्यापककार्यविशेषजनकतावच्छेदक

४जातेर्नानात्वे कथं कार्यकारणभाव इत्यत आह कार्येति कारणतावच्छेदकनानात्वस्यैव व्यभिचारसंपादक४

गु.टि. त्वर्थः। तदृशाभः स्पर्शान्यत्वलाभः। तदुपादेयमिति पृथिवीस्पर्शमात्रवृत्तिजातेः स्पर्शत्वव्याप्योभयसाधारण-
१४९ जातिव्याप्यतया गुणत्वव्याप्यस्पर्शत्वसाक्षाद्व्याप्यत्वाभावेनैव निरासादिति भावः। पृथिवीतरेति। सत्तागुणत्वसंख्या-
149 त्वादिवारणाय वृत्त्यंतं चरमजातिविशेषणं। सुरभीत्यादिमाधुर्यनिष्ठवैलक्षण्यवारणाय गुणत्वव्याप्य जात्यव्या-
प्येति माधुर्येतररसशुक्लेतररूपयोस्तिक्तत्वनीलत्वादिमादाय लक्षणसंगमनाय रूपत्वरसत्वान्येति गुणत्वव्याप्य
जातिविशेषणं घटत्वादिमादाय घटादावतिव्याप्तिवारणाय गुणपदं व्याप्यइति विशेषगुणत्वाघटितत्वेन लाघवादि-
ति भावः। अप्रत्यक्षवृत्तितोनतेनस्वबुध्यादीनामित्यादेर्व्यवच्छेदाय व्याचष्टे। अग्र इति। पृथिव्यादित्रयेति। सत्तागुणत्वसंयो-
गादिवारणाय वृत्त्यंतं जातिविशेषणं रूपवद्भिन्नवृत्त्यवृत्तीत्यर्थकं उष्णत्वादिकमादायातिव्याप्तिवारणाय पृथिवीवृत्ती-
ति पृथिवीमात्रवृत्तीत्यर्थकं तेन पृथिव्यनलसंयोगनिष्ठनीलादिजनकतावच्छेदकजातिव्युदासः। एवमग्रिमलक्षणे-
पि इदमुपलक्षणं जलवृत्तिवृत्तित्वांतर्भावेनापि लक्षणं तद्बोध्यं। गंधत्वगुरुत्वत्वरसत्ववारणाय द्वितीयं वृत्त्यंतं गुणपद-

राम
१४९

व्या

स्पर्शवद्वृत्तिं स्वयमेवाह। गुणेतीति। पृथिव्यादित्रितयभिन्नवृत्त्यवृत्तित्वविशिष्टस्य वायुवृत्तित्वस्य लघुत्वादाह। पृथिवीत्यादिना
त्रार्थकमिति तथा च तेजःसंयोगासमवायिकारणमात्रवृत्तीत्यर्थे लघ्पत इति भावः। अतिप्रसक्तत्वादिति जलादिरूपादाव
तिप्रसक्तत्वादित्यर्थः। पार्थिवपरमाणुरूपादौ च पाकजन्यतावच्छेदकजातिमादायैव लक्षणसमन्वयः। न च तथापि पा
र्थिवावयविरूपादावव्याप्तिरिति वाच्यं मूले नैमित्तिकद्रवत्वपार्थिवपरमाणुरूपादीनां पाकजत्वमिति पाठान्तस्यालक्षत्वा
दिति भावः। सुखविशेषत्वेति। प्रीतात्मनामनःसंयोगजन्यतावच्छेदकसुखनिष्ठवैजात्येत्यर्थः। उष्णत्वादीत्यादिपदा
द्द्रवत्वादिपरिग्रहः। गुणभिन्नावृत्तित्वे सति गुणवृत्तित्वस्याव्यापनार्थत्वे सत्यंतवैयर्थ्यादाह। गुणत्वाव्यभिचारीति
गुणभिन्नावृत्तीत्यर्थकमित्यर्थः। ननु नैमित्तिकद्रवत्वसामान्यस्यैव लक्ष्यत्वादवयविद्रवत्वेऽव्याप्तिः नास्ति तस्य तेजः
संयोगासमवायिकारणकमात्रवृत्तित्वाभावेन तत्र तादृशजातेरभावादित्यत आह। अवयवीति। नन्वेवं मूले सामान्य
तो नैमित्तिकद्रवत्वोपादानमसंगतमित्यत आह। मूल इति। ननु प्रकारेणापि विनश्यदवस्थपृथिवीरूपादावव्याप्तिरित्यसंग

स्य

गु.कि तं विनश्यदवस्थत्वे पृथिवी विशेषणत्वे पृथिव्यवयविन एव तादृशत्वेन तद्रूपस्याल्पत्वादेवाव्याप्त्यसंभवात् तस्य रूपविशेष

१५० णत्वे पृथिवीपदस्य च पृथिवीपरमाणुपरत्वे यथाश्रुतपाकजत्वस्यापि तत्र सत्त्वादव्याप्तिविरहादित्यत आह। पाकजत्वस्ये

150 ति। द्वितीयादिक्षण इति अव्याप्तिरसत्त्वात् आद्यक्षणसंबंधरूपस्य जन्मनो द्वितीयादिक्षणे विरहादिति भावः। नन्वेवं द्वितीया

दिक्षणमपहाय विनाशाव्यवहितपूर्वक्षणपर्यन्तानुधावनमसंगतमत आह। विनश्येति। विनाशाव्यवहितपूर्वक्षणे जन्म

नोऽवश्यं व्यतिरेकात् स्पष्टत्वादिति भावः। यद्यपि द्वितीयादिक्षणे लक्षणस्यासत्त्वेपि न क्षतिः यदा कदाचित् सत्तायामेव लक्षण

त्वनिर्वाहादन्यथा गंधवत्त्वादेरपि पृथिव्यादिलक्षणत्वानुपपत्तेः। तथापि द्वितीयादिलक्षणे तदसत्त्वे इदानीमयं पाकज

इति तत्कालीनतद्भावेन व्यवहारो न स्यादित्यभिप्रायः। अवयविरूपाया इति पृथिव्यास्तस्य विशेषणं। ननु यदि परिमाणज

नकतावच्छेदकावच्छिन्नमेव लक्ष्यं तदा सामान्यतः संख्यापरिमाणयोर्लक्ष्ये संग्रहोऽसंगतः एकत्वाणुत्वादेरतथात्वात् अ

पगुणत्वव्याप्यजात्या परिमाणजनकजातीयमेव लक्ष्यं तदा संयोगसामान्यस्यैव लक्ष्यतया विशिष्य प्रचयोपादानम

राम
१५०

संगतमतत्त्वमाह। संख्येति। जन्यानां तु ह्रस्वत्वत्वयोर्वारणाय महत्त्वसमानाधिकरणेति परिमाणविशेषणं परममहत्त्वपरमदी
र्घत्वयोर्वारणाय जन्येति पदं दीर्घत्वसंग्रहाय जन्यमहत्त्वेति नोक्तं एवं च परिमाणजनकतावच्छेदकावच्छिन्नमेव लक्ष्यमिति भा
वः। उभयपदयोर्विशेषणपरत्वमपेक्ष्यैकस्यैव सामान्यपरत्वोचितत्वमभिप्रेत्याह। प्रचयपदं चेति एवं च परिमाणजनकजा
तीयमेव लक्ष्यमिति भावः। ननु दृष्टेन क्रमेणालक्षणद्वयमाह। परिमाणेति। एतच्च परिमाणस्वरूपयोग्यस्य लक्ष्यत्वम
ते द्रव्यादृष्टादिवारणाय समवायीति एवमग्रेऽपि न च महत्त्वादिनैव परिमाणजनकतया परममहत्त्वादावतिव्याप्तिरिति
वाच्यं। मूर्तमहत्त्वत्वेनैव जनकत्वादन्यथा नित्यस्येत्यादिव्याप्तिबलाद् गगनादिमहत्त्वस्यापि फलोपधायकत्वापत्तेः
यदि च महत्त्वत्वादिनैव जनकत्वं लाघवात् तदा तुल्यत्वे जन्यपदं नोपादेयं परममहत्त्वादिकमपि लक्ष्यमेवेति भावः। परिमा
णजनकजातीयमात्रस्य लक्ष्यत्वमते आह। परिमाणेति। ननु प्रचयपदस्य संयोगसामान्यपरत्वे प्रकाशसंयोगत्वान्येति
व्यर्थमतआह। यथाश्रुतेति। परिमाणेनेति। प्रकाशइत्यादि। ननु तथापि कर्मजत्वादिमादाय प्रचयेतरसंयोगेऽतिव्या

गु.टी
१५१
151

पृथुत्वादिरत्यत आह । परिमाणजनकतानवच्छेदकेति संख्यात्वादेरपि परिमाणजनकतानवच्छेदकत्वेन तदसंग्रहवार
णाय संयोगवृत्तीति प्रतियोगिकोटौ विशेषणं न चैवं गुणत्वव्याप्यत्वविशेषणं वैयर्थ्यं सत्तादेर्योन्यधर्मान्यत्वाभावे
नैव वारणादिति वाच्यं प्रकाशे गुणत्वव्याप्यपाठस्याप्रामाणिकत्वात्संयोगत्वपदस्यातादृशधर्मपरत्वलाभाय वा तदुपा
दानादिति भावः । प्रतियोगिकोटौ संयोगसामान्याप्रवेशेन लाघवादाह । परिमाणजनकतायोग्येति परिमाणजनकतावच्छेद
कभिन्नेत्यर्थः । संख्यादिसंग्रहाय संयोगेति कर्मजत्वादेरिति प्रचयत्वं परिमाणजनकतावच्छेदकत्वेन कर्मजसंयोगजोभ
यसाधारणमेवं कर्मजत्वादिकं तु प्रचयत्वव्याप्यविरुद्धभेदेन नानाकार्यतावच्छेदकनानात्वस्यादोषत्वादिति मतेनेत्यर्थः
। यथाश्रुतमेवेति संयोगत्वान्येति यथाश्रुतमेव साध्विवत्यर्थः । प्रचयत्वस्यन्य संयोगवृत्तिकर्मजत्वं तु न प्रचयवृत्तिरिति भावः
। किं तु गुणत्वव्याप्यत्वं पृथक् विशेषणमुपादेयमिति हृदयं । अजनकवृत्त्यभावव्याप्तेर्जातिगर्भलक्षणमाह । भावेति । अ
दृष्टेश्वरज्ञानादिकारणाघासमवायीति । अदृष्टेश्वरज्ञानादिवारणाय साधारणेति । वेगस्याभिघातनिमित्तकारण राम

१५१

तथा तु वृत्ति संस्कारत्वमादाय स्थितिस्थापकभावनयोरतिव्याप्तिराह। संस्कारत्वान्येति। द्रव्यात्मकानेकाश्रितासमवायि
कारणस्यापि संयोगत्वेन लक्ष्यत्वाद्गुणपदवैयर्थ्यमाशंक्याह। समवायेनेति। तदलाभे रूपादेरपि कालिकविशेषण
तादिनानेकाश्रितत्वादतिव्याप्त्यापत्तेरितिभावः। द्वित्वद्विपृथक्त्वादावतिव्याप्तेराह। गुणत्वव्याप्यव्याप्यधर्मकमिति द्वि
र्भजत्वादिमादाय संयोगविभागयोर्लक्षणसमन्वयइतिभावः। ननु दिक्कालोभयसंयोगासमवायिकारणत्वं न का
लिपरत्वापरत्वयोरित्यसंभवः। न च प्रत्येकगर्भं साधर्म्यद्वयमिति वाच्यं दिक्संयोगघटितस्य कालिकपरत्वापरत्वयोः का
लसंयोगघटितस्य च दैशिकपरत्वापरत्वयोरव्याप्तिरित्यतो द्वयोरनुगमकमाह। विशेषगुणेति। विशेषगुणभिन्न
कृ२ नः संयोगासमवायिकारणं ज्ञानाद्यावृत्तिव्याप्तिवारणाय महत्पदं। कार्यांतरेति। एकाश्रितकार्यांतरेत्यर्थः। तदुपादान
मिति। अत्र समवायिपदोपादानमित्यर्थः। तेन प्राच्यादिदिगुपाधिसंयोग एव कारणं ननु महदादिकूसंयोगइत्यस्वारसः के
चिदित्यनेन सूचितः। तस्य शब्दजन्यशब्दमात्रस्य। अंत्यमात्रस्येति। तथा च पूर्वशब्दनाश्यत्वे तस्यैव अंत्यशब्दस्यैव।

गु.टि द्वितीयादीनां नाशादिति तेषां स्वाक्षणिकत्वापत्तिरिति दोषः। अत्रेति शब्दानां नाश्यनाशकभावविचार इत्यर्थः। आद्य
१५२ स्य शब्दस्य स्वजन्येन शब्देन नाश इत्यर्थः। आद्यत्वं च न शब्दाजन्यशब्दत्वं गौरवात् प्रत्येकावध्यतशक्तिकाभ्यामि
152 त्यग्रिमग्रंथासंगतेश्च किंतु शब्दवध्वद्त्वे शब्दस्य शब्दवत्ताव्यफलोपधायकतासंबंधेन तथात्वप्रतियोगितासंबंधेन शब्दवद्ध्व
नाशत्वे नैव कार्यत्वं शब्दस्य फलोपधायकतासंबंधेन कारणत्वं अंत्यशब्दनाशे व्यभिचारेण कार्यतावच्छेदके शब्दवदिति श
ब्दविशेषणमंत्यशब्दस्य फलोपधायकतासंबंधेन शब्दवान्न स्वरूपयोग्यत्वस्य कारणतावच्छेदकसंबंधत्वे तृतीयादिशब्द
स्य स्वप्रतिद्वितीयादिशब्दं प्रति स्वरूपयोग्यतया स्वाक्षणिकत्वापत्तिरतः फलोपधायकत्वं कारणतावच्छेदकसंबंधः फलोपधायक
त्वे च पूर्ववृत्तिशब्दत्वमेवेति भावः। अंत्यस्येति। अंत्यशब्दस्य कारणीभूतशब्दनाशादेव नाश इत्यर्थः। अंत्यत्वं च शब्दाजनकत्वं
गौरवात् प्रत्येकावध्यतत्वाद्यग्रिमग्रंथविरोधाच्च किंतु जन्यतासंबंधेन शब्दवध्वद्त्वं तथा च जन्यतासंबंधेन शब्दवद्ध
द्वत्वं तथा च जन्यतासंबंधेन शब्दवद्ध्वद्नाशत्वेन कार्यत्वं फलोपधानात्मकस्वप्रतियोगिजन्यत्वसंबंधेन शब्दना

राम
१५२

५५

शत्वेनैव कारणत्वं आद्यशब्दनाशे व्यभिचारवारणाय कार्यतावच्छेदके शब्दवदिति शब्दविशेषणं आद्यशब्दस्य न
जन्यतासंबंधेन शब्दवान् स्वरूपयोग्यतात्मकस्वप्रतियोगि जन्यत्वस्य कारणतावच्छेदकसंबंधत्वे प्रथमशब्दस्यापि
तृतीयादिशब्दं प्रति स्वरूपयोग्यतया तन्नाशात्तृतीयादिशब्दस्योत्पत्तिकत्वापत्तिरतः कारणतावच्छेदकसंबंधे फलो
पधानात्मकेति जन्यताविशेषणं फलोपधानात्मकस्वप्रतियोगिजन्यत्वं च स्वप्रतियोगिसहवर्तिशब्दत्वं तेन तृतीया
दिशब्दं प्रति द्वितीयादिशब्दवत्पूर्ववर्तितावशेषेण प्रथमादिशब्दस्य फलोपधायकत्वेपि तन्नाशात्तृतीयादिशब्दानां न
त्पत्तिकत्वमिति भावः। मध्यमानां त्विति। शब्दजन्यत्वे सति शब्दजनकानामित्यर्थः। प्रत्येकावच्छेतेति शब्दोपधायकश
ब्दनाशत्वशब्दजन्यशब्दनाशत्वरूपप्रत्येकधर्मावच्छिन्नं प्रति गृहीतकारणताकाभ्यामित्यर्थः। उभाभ्यामिति कार्य
कारणताभ्यामित्यर्थः। मध्यमशब्दानामुभयोरेव नाशकतावच्छेदकाक्रान्तत्वादिति भावः। संप्रदायइत्यनेन वक्ष्यमाण
मतापेक्षया अस्यास्वरसः सूचितः। तद्बीजं त्वनुपदमेव स्फुटी भविष्यति। मतांतरमाह। कारणताशदेवेति। अत्र का

जि.शि रणपदं कारणसामान्यपरं न तु शब्दत्वमप्युपादेयं गौरवात् अत्र घशब्दनाशे व्यभिचारात्सर्वेषामिति शब्दानामिति शे
१५३ षः तथा च सामान्यतः शब्दनाशत्वमेव कार्यतावच्छेदकं कारणनाशत्वमेव कारणतावच्छेदकं न च कारणस्यानुगतस्या
भावादननुगमः शब्दोत्पत्तिसमयेऽवश्यं कस्यचिद्वस्तुनः कारणनाशसत्वाच्छब्दमात्रस्यैव क्षणिकत्वापत्तिरिति वाच्यं न
153 हि कारणनाशत्वं कारणतावच्छेदकमपि तु नाशत्वमेव कारणतावच्छेदकं फलोपधानात्मकस्वप्रतियोगिजन्यत्वं च ना
शकतावच्छेदकसंबंधः यत्र प्रतियोगितासंबंधेन शब्दनाशस्तत्र तादृशसंबंधेन नाश इति सामानाधिकरण्यं प्रत्यास
तिः सर्वेषामेव मेयादिसंयोगादीनां स्वरूपयोग्यतया तन्नाशस्य च पूर्वकाले विद्यमानतया सर्वशब्दस्यैव क्षणिकत्वापत्ति
रतः फलोपधानात्मकत्वं संबंधघटकजन्यताविशेषणं फलोपधानात्मकस्वप्रतियोगिजन्यत्वं च स्वप्रतियोगिसहव
र्तित्वे सति स्वप्रतियोगिजन्यत्वं तेन तृतीयादिशब्दं प्रति द्वितीयादिशब्दवत्तत्पूर्ववर्तित्वाविशेषेण प्रथमादिशब्दस्यापि
फलोपधायकत्वेऽपि तन्नाशात् तृतीयादिशब्दानां(न) क्षणिकत्वं प्रथमस्यैव कारणीभूतपवनसंयोगनाशकालोत्पन्नशब्दस्य भेरीदं

राम
१५३

५६

डसंयोगादिविलंबेन प्रागनुत्पन्नस्य यावद्भेरीदंडसंयोगादिकालमवस्थानापत्तिः कारणीभूतपवनसंयोगस्य सहवर्तित्वाभ
भावेन तन्नाशस्य तन्नाशकत्वासंभवात् तन्नाशकत्वे क्षणिकत्वापत्तेश्च न च तद्वदस्य चिरकालस्थायितायामिष्टापत्तिः श्राव
शब्दस्याप्रत्यक्षतया कालांतरे तत्प्रत्यक्षापादनस्याशक्यत्वादिति वाच्यं कारणीभूतपवनसंयोगनाशकालोत्पन्नस्य क
र्णशष्कुलीविवरावच्छिन्नाद्यशब्दस्य कर्णशष्कुलीविवराभिघातविलंबेन प्रागनुत्पन्नस्य चिरकालावस्थायितायामिष्टा
पत्तेरसंभवात् तादृशाद्यशब्दस्याप्रत्यक्षतया चिरस्थाने कालांतरेपि तत्प्रत्यक्षापत्तेरिति चेन्न कारणीभूतपवनसंयो
गनाशकाले शब्दोत्पादासिद्धेः पवनसंयोगस्यातींद्रियतया फलबलकल्प्यत्वेन भेरीदंडसंयोगादिपूर्वं वर्तते तुर्यपंचमादिक्षणे
कारणीभूतपवनसंयोगोत्पत्तौ मानाभावात् । अप्रत्त एव भेरीदंडादिसंयोगनाशकालेपि नाद्यशब्दोत्पादः पवनसंयोगस्या
तींद्रियतया तद्विलंबेन भेरीदंडसंयोगादिसत्त्वे शब्दविलंबस्य वक्तुमशक्यत्वात् तन्नाशकाले शब्दोत्पादेपि क्षतिविरहा
त्त्वा वायोः सदागतितया वायुसंयोगनाशादेव पंचमक्षणे तन्नाशसंभवात् शब्दस्य क्षणे चतुष्टयावस्थायितायामेकदेशिना

गु.शि
१५४
154

भ्युपगमादिति भावः। किंचित्तु कारणनाशादेवेत्यस्य कारणीभूतपवनसंयोगनाशादेवेत्यर्थः। कारणपदं तु फलोपधाना
त्मकस्वप्रतियोगिजन्यत्वस्य प्रत्यासत्तितालाभायेति नाद्यादिशब्दजनकपवनसंयोगनाशकालोत्पन्नस्य चतुर्थादिशब्द
स्य न क्षणिकत्वं फलोपधानात्मकस्वप्रतियोगिजन्यत्वं चाव्यवहितपूर्ववर्त्तिस्वप्रतियोगिकत्वे सति स्वप्रतियोगिजन्यत्वं
पूर्ववर्त्तिस्वप्रतियोगीसहवर्त्तित्वे सति स्वप्रतियोगिजन्यत्वं वा अव्यवहितपूर्वत्वाप्रवेशे न लघुत्वात् तस्योपधायकपवनसंयो
गनाशकालेव नशब्दोत्पादः तेन नोक्तदोषः न चैवं पवनसंयोगप्रवेशप्रयोजनविरहो गौरवं चेति वाच्यं पवनसंयोगाप्रवे
शे भेर्यादिसंयोगनिरूपितशब्दजन्यतया अप्रविसंवंधघटकतया गौरवापत्तेरित्याहुः। तदसत् अप्रवेशे आद्यस्य पव
नसंयोगनाशादेव नाशाद् तज्ञापकस्येत्यस्यासंगतत्वापत्तेः तन्नये सर्वेषामेव शब्दानां पवनसंयोगनाशादेव नाशात्। न चैवं
नाशत्वमपेक्ष्य शब्दत्वस्य लघुतया यथोक्तसंबंधमपेक्ष्य स्वपूर्ववर्त्तित्वस्य लघुतया च शब्दनाशतावच्छिन्नप्रतिपूर्ववर्त्ति
तासंबंधेन शब्दत्वेनैव जनकतास्तु अंत्यशब्दस्यापि दंशातरवर्त्तिनास्योत्तरोत्पन्नेन शब्देन नाशसंभवादित्यतआह। अंत्य

राम
१५८

स्येति। शब्दाजनकशब्दस्येत्यर्थः। चरमस्येति। यच्छब्दोत्तरकालं न क्वापि देशे शब्दोत्पत्तिस्तच्छब्दस्येत्यर्थः। स च महाप्रल-
यपूर्ववर्तिशब्द एवेति भावः। ननु कारणनाशत्वेन नाशकत्वे द्वितीयशब्दस्य कारणीभूताद्यशब्दादिनाशादेव नाशसं-
भवेप्याद्यशब्दस्य कीदृशकारणनाशान्नाश इत्यत आह। आद्यस्येति। आदिपदाद्भेरीदण्डसंयोगादिपरिग्रहः। ननु वा-
युसंयोगो न शब्दकारणमपि तु लाघवात् संयोगसंबंधेन वायुरेव कारणमिति वाच्यं तथापि सति वायुनाशादेव तन्ना-
विरल·छि॰ शस्य सुवचत्वात् वायोर्विरलत्वे रद्धयुतयाच्चिरकालानवस्थानात्। ननु तथापि आद्यशब्दं प्रति वायुसंयोगस्य संयोगसं-
बंधेन वायोर्वा हेतुत्वे मानाभावः। अवच्छेदकनियमान्यथानुपपत्त्या शब्दधाराविच्छेदानुपपत्त्या च शब्दजशब्दं प्रत्येव तस्य
हेतुत्वात् आद्यशब्दस्य च भेर्यादेरेव तादात्म्यसंबंधेनोत्पादनियामकत्वात् न च सामान्यतः शब्दत्वावच्छिन्नं प्रत्येव वायुसं-
योगादेर्हेतुत्वादाद्यशब्देपि तस्य हेतुत्वमावश्यकमिति वाच्यं। ककारपकारादिनानाशब्दसत्वेपि कस्यचित् कर्णे ककारो-
त्पत्तिः कस्यचित् कर्णे च पकारोत्पत्तिरिति नियमान्यथानुपपत्त्या ककारपकारादिके तत्तद्ध्वनिविशेषं च प्रति परस्परवि-

गु॰ शि॰ जातीयवायूनां तत्संयोगानां वा हेतुत्वावच्छेदकत्वेन तादृशसामान्यकार्यकारणभावे मानाभावात्। न च मास्तु तादृशाति
१५५ रिक्तसामान्यकार्यकारणभावस्तथापि सामान्यतः कत्वखत्वाद्यवच्छिन्नं प्रति तत्तद्ध्वनिविशेषत्वावच्छिन्नं प्रति च पर
155 स्परविजातीयवायुसंयोगानां हेतुत्वादाद्यककारादावपि तेषां हेतुत्वमावश्यकमिति वाच्यं। तत्र ककारादिजन्यतावच्छे
दकजात्यवच्छिन्नं ध्वनिविशेषजन्यतावच्छेदकजात्यवच्छिन्नं प्रत्येव परस्परविजातीयवायुसंयोगस्य हेतुतया तादृशसामा
न्यकार्यकारणभावे विमानाभावादिति चेन्न। ककारादिजन्यतावच्छेदकतत्तद्ध्वनिविशेषजन्यतावच्छेदकवैजात्यद्वि निगमकाभावे
न कत्वखत्वादेस्तत्तद्ध्वनिविशेषत्वादेश्च सामान्यधर्मस्य परस्परविजातीयवायुसंयोगजन्यतावच्छेदकत्वस्य दुर्वारत्वात् संदिग्ध
व्यभिचारकत्वस्योभयत्र तुल्यत्वात् सामान्यधर्मस्य कार्यतावच्छेदकत्वे वा धकस[illegible]त्वएव विशेषधर्मस्य कार्यतावच्छेदकत्वं
कल्प्यते प्रकृते च बाधकाभावात् कत्वखत्वादिसामान्यधर्मस्यैव कार्यतावच्छेदकत्वकल्पनाच्चेति भावः। न तु तथापि लाघवात् तस्
हवति प्रतियोगिकनाशत्वेनैव नाशकता स्यात् किं कारणत्वप्रवेशेन कारणत्ववत्सहवर्तित्वमपि प्रत्यासत्तिरेवातो नाननुगमादीत्य

राम
१५५

५८

तदाह। इत्थं चेति। कारणनाशत्वेन नाशकत्वे चेत्यर्थः। शब्दोत्पत्तीति पवनसंयोगानंतरं युगपच्छब्दोत्पत्तिपवनक्रियानाश
वित्यर्थः। शब्दस्येति। आद्यशब्दस्येत्यर्थः। अन्यथा द्वितीयादिशब्दस्यैवं क्रमेण क्षणचतुष्टयावस्थायितासंभवः। कारणी
भूतपवनसंयोगसत्त्वेप्याद्यशब्दनाशादेव तृतीयक्षणे तन्नाशात् न चाद्यशब्दस्यापि नैवं क्रमेण क्षणचतुष्टयावस्थायि
तासंभवः। निमित्तपवनसंयोगसत्त्वेपि ज्ञानादिरूपसाधारणकारणनाशादेव तृतीयक्षणे तन्नाशादिति वाच्यं देशिक
सामानाधिकरण्यघटितकारणत्वरूपस्यासाधारणकारणत्वस्य नाशकतावच्छेदकघटकत्वात् इति ध्येयं कत्वादीति
कत्वादिज्ञानविरहकालोत्पन्नद्वितीयादिककारादेरनुभवसिद्धविशेष्यांशे लौकिकप्रत्यक्षात्मकत्वादिविशिष्टज्ञानं स्वप
पादमित्यर्थः। आद्यशब्दस्य क्षणचतुष्टयावस्थायित्वे द्वितीयककारस्यापि क्षणचतुष्टयावस्थायितायाअप्रसिद्धत्वात्
द्वितीयककारस्य स्वजनकपवनसंयोगाद्यशब्दान्यतरनाशनाश्यत्वात् तयोश्च तच्चतुर्थक्षण एव नाशात्। न च यत्राद्यश
ब्दजनकपवनसंयोगेनैवाद्यशब्दोत्पत्तिद्वितीयक्षणे द्वितीयशब्दोत्पादस्तत्राद्यशब्दस्य क्षणचतुष्टयावस्थायित्वेपि द्वि

ग्र.कि तीयशब्दस्य नक्षणचतुष्टयावस्थायित्वं किंतु क्षणत्रयावस्थायित्वमेव चतुर्थक्षणे तृतीयक्षणोत्पन्नाद्यशब्दजनकपव
१५६ नसंयोगनाशादेव तन्नाशादिति वाच्यं। क्षणत्रयावस्थायित्वेपि कृत्वादिविशिष्टप्रतस्वस्य स्वरूपापादकत्वात्पवनसंयोगस्य
156 स्वावच्छेदकावच्छेदेनैव शब्दजनकत्वनियमादाद्यशब्दजनकपवनसंयोगस्य द्वितीयशब्दजनकत्वासंभवात्समाना व
च्छेदकत्वप्रत्यासत्या शब्दस्य शब्दप्रतिबंधकत्वात् तथापि यत्राद्यशब्दोत्पत्तिप्रागुत्पन्नस्य द्वितीयशब्दजनकपवन
संयोगस्य विनश्यदवस्थता काले आद्यशब्देन द्वितीयशब्दो जन्यते तत्राद्यशब्दस्य क्षणचतुष्टयावस्थायित्वेपि द्वितीय
शब्दस्य लक्षणचतुष्टयस्थायित्वं किंतु क्षणद्वयावस्थायित्वमेव स्वोत्तरोत्पन्ननिमित्तपवनसंयोगनाशेन तृतीयक्षणे त
न्नाशात् एवं यत्र भेरीदंडसंयोगादिप्रागुत्पन्नस्याद्यशब्दजनकपवनसंयोगस्य विनश्यदवस्थता काले भेरीदंडसंयोगा
दिनाऽऽद्यशब्दोत्पत्तिस्तत्र यत्र वा भेरीदंडसंयोगादिनाऽऽद्यशब्दोत्पत्तिस्तत्र यत्र वा भेरीदंडसंयोगाद्विसमकालोत्प
न्नस्य विनश्यदवस्थानिमित्तवायोः संयोगेन वायुनाशाधिकरणे द्वितीयक्षणे आद्यशब्दोत्पत्तिस्तत्रो वायुनाशाधीनवा

राम
१५६

युसंयोगनाशस्तात्तत्तदधीनश्चाद्यशब्दनाशस्तत्र चाद्यशब्दस्यापि न क्षणचतुष्टयावस्थायित्वमिति वाच्यं सर्वत्रातत
थाभावेपि क्वचिदाद्यशब्दस्य क्षणचतुष्टयावस्थायित्वस्य तदधीनद्वितीयादिशब्दक्षणचतुष्टयावस्थायित्वस्य च सं
भवात्तद्वायुसंयोगस्य फलैकोन्नेयतया यथोक्तस्थले मानाभावेन सर्वत्रैवाद्यशब्दस्य क्षणचतुष्टयावस्थायितायास्त
दधीनद्वितीयादिशब्दस्य क्षणचतुष्टयावस्थायितायाश्च सुवचत्वात्। सहवतिप्रतियोगिकनाशत्वेन नाशकत्वे च प्रति
क्षणं किंचिद्विनश्यतीति नियमाच्छब्दमात्रस्यैव क्षणद्वयस्थायित्वं तथा च द्वितीयादिशब्दोत्पत्त्यनंतरं कत्वादिनिर्विकल्प
कं ततः कत्वादिविशिष्टप्रत्यक्षोत्पत्तिसमय एव ककारादेर्नाशाद्विशिष्टप्रत्यक्षं न क्वापि स्यात्प पदं संबद्धं वर्तमानं च गृह्य
ते चक्षुरादिनेति कार्यसहभावेन ककारादेः प्रत्यक्षहेतुत्वात् ततो विशिष्टप्रत्यक्षोपपत्त्यर्थं गौरवमप्यास्थीयते। न च शब्द
स्य द्विक्षणस्थायित्वेपि द्वितीयादिकोत्पत्तिः ततः कत्वनिर्विकल्पकं तृतीयादिकोत्पत्तिश्चेत्येकः कालः ततो द्वितीयादि
ककारनाशस्तृतीयककारादौ कत्वविशिष्टप्रत्यक्षमिति क्रमेण तृतीयादिककारादौ कत्वादिविशिष्टप्रत्यक्षं स्वपर्पद

गु.शि मेवयत्र स्थलांतरोत्पत्तिकतृतीयककारादिविशेष्यककत्वादिप्रत्यक्षजनितसंस्कारेण द्वितीयककारोत्पत्तिसमये कत्वविशिष्टस्म
१५७ रणं तत्र द्वितीयककारादेरपि कत्वादिविशिष्टप्रत्यक्षं सूपपादमिति वाच्यं तथापि कत्वादिज्ञानविरहकालोत्पन्नद्वितीयादिककारा
दौ कत्वादिविशिष्टप्रत्यक्षस्य दुरुपपादत्वात् । न च तथापि द्वितीयककारादुक्तक्रमेण कत्वादिविशिष्टप्रत्यक्षे तेनैव सामान्यल
157 क्षणप्रत्यासत्त्या कत्वादिज्ञानविरहकालोत्पन्नद्वितीयादिककारस्यापि कत्वादिविशिष्टप्रत्यक्षं सूपपादमिति वाच्यं विशेष्यांशे
लौकिकप्रत्यक्षात्मकस्य कत्वादिविशिष्टप्रत्यक्षस्य दुरुपपादत्वादिति भावः । एकदेशिनस्त्वरसोद्भावनं तद्बीजं तु संव
र्त्तं वर्तमानं चेति सिद्धांतस्य निर्युक्तिकतया विषयतदिंद्रियसंनिकर्षयोः कार्यसहभावेन हेतुत्वे मानाभावाद्दूरस्थद्वि
क्षणस्यावित्वेपि कत्वादिज्ञानविरहकालोत्पन्नस्य द्वितीयादिककारादे कत्वादिविशिष्टलौकिकप्रत्यक्षं सूपपादं तथा च
किंतूत्तरस्य कारणत्वस्य प्रवेशेन परं तु शब्दनाशसामान्यं प्रति ध्वंसत्वेनैव जनकत्वं स्वप्रागभावाधिकरणक्षणवृत्ति
त्वरूपस्वपूर्ववर्तित्वमात्रस्य प्रतियोग्यधिकरणक्षणवृत्तित्वरूपस्वप्रतियोगिसहवर्तित्वमात्रं वा कारणतावच्छेदकप्रत्यास

तिष्ठप्रतियोगित्वमेव शब्दमात्रमेव च द्विक्षणस्थायि प्रतिक्षणं किंचिदुत्पद्यते किंचिद्विनश्यतीति नियमात् सर्वदैवा
वश्यं द्वितीयक्षणे कस्यचिद्वस्तुनो ध्वंसोत्पत्तेः। एतेन ज्ञानसुखादिनाशोऽपि व्याख्यातः तत्रापि सामान्यतो ध्वंसत्वेनैव
नाशकत्वात् स्वप्रागभावाधिकरणक्षणोत्पन्नत्वरूपस्वपूर्वोत्पन्नत्वं स्वप्रतियोग्यधिकरणक्षणोत्पन्नत्वरूपस्वप्रति
योगिसहोत्पन्नत्वं वा नाशकतावच्छेदकप्रत्यासत्तिः कार्यतावच्छेदकं च प्रतियोगित्वमेव नित्यज्ञानादिनाशवारणाय यदुत्प
न्ने तस्य नाशकतावच्छेदकप्रत्यासत्तिमध्ये प्रवेशः नाश्यतावच्छेदकोऽपि सामान्यतः शब्दत्वज्ञानत्वसुखत्वादिप्रत्य
क्षधर्म एव पक्षे शब्दज्ञानसुखादिसकलद्विक्षणकगुणसाधारणं योग्यविभुगुणत्वमेकमेव नाश्यतावच्छेदकं
लाघवात् धर्माधर्मभावनावारणाय योग्यपदं योग्यविभुगुणत्वं च विभुसमवेतमात्रवृत्तित्वे ऐन्द्रियकधर्मसमवा
यित्वं तेन निर्विकल्पकादिसंग्रहः मात्रपदात् सत्तागुणत्वसंख्यात्वादेः संस्कारत्वस्य च व्युदासः विभुसमवेतमात्र
समवेतत्वं च महत्तत्समवेतासमवेततत्त्वं तथा च महत्तत्समवेतासमवेतऐन्द्रियकधर्मसमवायिगुणत्वं समुदितार्थः

गु·८१० आत्मपरिमाणवृत्तिपरममहत्त्वत्वस्यैन्द्रियकजातित्वमतेपि भगवज्ज्ञानादिवन्नित्यत्वादेव न तदाश्रयस्य नाशः स्वप
१५८ र्वोत्पन्नत्वस्य नाशकतावच्छेदकसंबंधत्वात् अतएव यागादेरेव फलपर्यंतस्थायित्वमस्तु किमपूर्वेणेति केचि
158 त् शंकापि प्रत्युक्ता सामान्यतः इच्छादिनाशत्वावच्छिन्ने विभुसमवेतयोग्यगुणनाशत्वावच्छिन्ने वा ध्वंसत्वेनैव जनकतया
इच्छामात्रस्यैवादृष्टस्यापि त्वात् नचैवमपेक्षाबुद्धेरपि द्वित्वस्येव[?] स्थायित्वं न स्यादिति वाच्यं इष्टत्वात्तदेद्वित्वेर
ति विशिष्टसाक्षात्कारस्य द्वित्वग्रंथ एव कृतैवोपपादयिष्यमाणत्वात् अस्तु वा द्वित्वोपधायकापेक्षाबुद्धिस्थ
ले तत्तद्बुद्धिव्यक्तित्वावच्छिन्नं प्रति तृतीयक्षणोत्पन्नतत्तद्व्यक्तित्वेनापि विशेषतो नाशकतात एव सामान्यसा
मग्रीसत्त्वेपि विशेषसामग्रीविरहादेवापेक्षाबुद्धेस्तृतीयक्षणे नाशः एवं च यत्र दशवर्षावच्छिन्नस्वर्गकामफल
श्रुतिरस्ति तत्रापि दशवर्षादिव्यापकधारावाहिकनानास्वर्गएव फलश्रुत्यर्थः किं वा तत्तत्स्वर्गव्यक्तिं प्रति द
शवर्षादिसमापकचरमक्षणोत्पन्नव्यक्तीनामपि विशेषतो नाशकत्वं वस्तुतस्तु ध्वंसत्वमपेक्ष्य गुणत्वस्य जा

राम
१५८

तित्वेन लघुतया शब्दत्वज्ञानत्वसुखत्वाद्यवच्छिन्नं प्रतिविभुसमवेतयोग्यगुणत्वावच्छिन्नं प्रति वा स्वपर्वोत्पन्नत्वसं
बंधेन गुणत्वेनैव नाशकत्वं न च सर्वज्ञशब्दज्ञानाद्युत्पादानंतरं गुणोत्पत्तौ मानाभाव इति वाच्यं शब्दत्वज्ञानत्व
सुखत्वाद्यवच्छिन्नं प्रतिविभुसमवेतयोग्यगुणत्वावच्छिन्नं प्रति वा शब्दजशब्दस्वप्रत्यक्षादिरूपस्य यत्किंचिद्गुणस्य
सर्वज्ञावश्यमुत्पादात् अन्यथा शब्दज्ञानाद्युत्पत्तावेव मानाभावात् शब्दज्ञानादिक्षणिकगुणनाशश्च न महाप्रल
यः किंतु सकलक्षणिकगुणनाशोत्तरोत्पन्नो गुणस्तन्नाश एव महाप्रलय इति न तत्र व्यभिचारः। न चैवं सत्वमादाय
विनिगमनाविरह इति वाच्यं तस्य व्यापकधर्मत्वे नान्यथासिद्धत्वात् न च तथापि द्रव्यत्वमादाय विनिगमनावि
रह इति वाच्यं प्रतिक्षणं द्रव्योत्पत्तौ मानाभावात् अत एव कर्मत्वादिमादायापि न विनिगमकाभावः प्रति
क्षणं कर्माद्युत्पत्तौ मानाभावात् क्षणव्यवहारस्य जन्यांतरमादायापि संभवादिति समासः। मूर्तपदस्य
स्पर्शवत्परतायाः प्रयोजनमाह परत्वापरत्वमात्रे इति नाव्याप्तिरिति संबध्यते यथाश्रुते परत्वापरत्वमात्रयो

गु॰ दी॰ एवमन्यतरवृत्तितानियमाद्व्याप्तिः स्यादिति भावः। गुणत्वव्याप्यजातिपदस्य गुणविभाजकोपाधिपरतायाः प्रयो-
१५८ जनमाह। कालिकपरत्वापरत्वयोर्वेति कालिकपरत्वापरत्वयोः स्पर्शवद्वृत्तितानियमेन तद्वृत्तिकालिकपरत्व-
159 त्वापरत्वत्वजात्योः स्पर्शवद्वृत्तिमात्रवृत्तित्वाद् अन्यत्वांतदलाभावे न यथाश्रुतेऽव्याप्तिः स्यात् यथाविवक्षि-
ते तद्वृत्तिपरत्वापरत्वत्वरूपविभाजकोपाध्योः स्पर्शवद्वृत्तिमात्रवृत्तित्वाभावात्तादृशविभाजकोपाधिमन्यत्वम-
स्त्येवेति नाव्याप्तिरिति भावः। दैशिकपरत्वत्वापरत्वत्वयोर्मनोवृत्तिवृत्तित्वेन स्पर्शवद्वृत्तिमात्रवृत्तित्वाभावाद्यथा-
श्रुतेपि तदाश्रयदैशिकपरत्वापरत्वयोर्नाव्याप्तिरिति कालिकेत्युक्तं। आद्यविवक्षायाः प्रयोजनांतरमप्याह। न-
वेति। अन्यतरपदस्य यथाश्रुतार्थकत्वे गुणविभाजकोपाधेः संयोगत्वस्यान्यतरवृत्तितारावृत्तित्वरूपमन्यतरवृत्तिमात्र-
वृत्तितायाः सत्त्वं तदलाभावे नैव चरमसंयोगवारणसंभवात् संयोगान्यपदं व्यर्थं स्यात् स्पर्शवत्परत्वे तु संयोगत्व-
स्य मनोगगनसंयोगेपि वृत्त्या सत्त्वं तेन वारणसंभवात् तत्पदसार्थकतेति भावः। यथाश्रुतमेव यथाश्रुतार्थ- राम
१५८

मेवं न तु विभाजकपरमिति भावः ॥ विशेषगुणत्वप्रवेशगौरवमेवात्रास्वरसः स्वाश्रयनाशादेति एकपदं मात्रार्थकं
उभयेनाशनाश्यव्यावर्तकं तज्जातीयत्वोक्तावितिनिमित्तनाशनाश्यवृत्तिगुणत्वव्याप्यजातिमत्त्वोक्तावित्यर्थः ॥
सत्तागुणत्ववारणाय गुणत्वव्याप्यपदं ॥ एकत्वैकपृथक्त्वेति तत्रनिमित्तनाशनाश्यद्वित्वद्विपृथक्त्वादिरिति तादृशजा
तेः संख्यात्वपृथक्त्वत्वयोरेव सत्वादिति भावः ॥ ननु निमित्तनाशनाश्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं वक्तव्यमित्यतो ज्ञा
नांतरेति चरमज्ञानभिन्नज्ञानेत्यर्थः ॥ तत्रापि तादृशजातेः साक्षात्कारत्वस्यैव सत्वादिति भावः ॥ विशेषातीत्यत्र च
रमज्ञानातिरिक्तज्ञानवारणाय प्रथमं सत्त्वं तत्त्वं स्वभिन्नगुणनाश्यत्वं तदर्थः ॥ स्वभिन्नेत्युपादानान्न स्वस्यापि प्रतियोगि
विषयास्वनाशकत्वादसंभवः भगवज्ज्ञानादवति व्याप्तिवारणाय द्वितीयं सत्त्वं ते निरुक्तनाश्यतिनिमित्तनाश
नाश्येत्यर्थः ॥ संख्यात्वपृथक्त्वत्वमादायैकत्वैकपृथक्त्वयोरति व्याप्तिवारणाय द्वितीयं व्याप्यपदं जातिघटना
नुस्वाश्रयनाशैकनष्टपरत्वादाव्याप्तिवारणायेति भावः ॥ विवक्षितत्वादिति विशेषदलेन विवक्षितत्वादित्यर्थः ॥ ननु पर

गु॰दी॰टी॰ त्वादेतादृशजात्यभावाद्व्याप्तिरत आह। परत्वादाविति। तत्र तारतम्ये विवादाह। गुणत्वविभाजकेति तथा च कालिकपरत्व
१६० त्वादिकमादायैव तत्र लक्षणसमन्वय इति भावः। ननु तथापि चरमशरीरैकत्वस्य निमित्तादृष्टनाशनाश्यत्वात्तदादाय एक
160 त्वातिव्याप्तिरत आह। चरमेति। एकत्वादीनां चेत्यादिपदात्परिमाणैकपृथक्त्वयोः परिग्रहः जन्यांतमवयवसंयोगनाशवि
शेषणं आश्रयविनाशादेवेति आश्रयनाशादेवेत्यर्थः। कार्यकारणभावांतरकल्पने गौरवादिति भावः। ननु यथोक्तल
क्षणस्य चरमभावनायामपि सत्वेनातिव्याप्तिरित्यत आह। भावनाया इति ज्ञानपदमिति लक्षणस्य ज्ञानपदमित्यर्थः। तथा
च सापि लक्ष्येति भावः। चरमपदादेव स्मृतिनाश्यसंस्कारस्य लक्ष्यत्वव्युदासः। नन्वेवं कस्यचिददृष्टस्यापि तथात्वेन त
त्रातिव्याप्तिरतस्तत्साधारणं लक्षणान्तरमाह। जन्यात्मेति। केचित्तु नन्वेवं जीवनयोनियत्नस्य निर्विषयकत्वमते
तस्यालक्ष्यत्वान्निमित्तनाशनाश्यचरमजीवनयोनियत्नेतिव्याप्तिरत आह। जन्येतीत्याहुः। ननु चरमभावनाया एव
लक्ष्यत्वादिदानीं कालरोगादिनाश्यभावनायामतिव्याप्तिरत आह। चरमत्वं चेति। तथा च सापि लक्ष्येति भावः। विरोधि

राम

गुणक्रियादिना आश्रयनाशापरिग्रहः। तेन घटादिनाशनाश्यघटात्मसंयोगादेर्वारणं। द्वित्वादिपदस्यान्यथा वैयर्थ्यात्
तत्रादिपदं परत्वीयं। गुणं तन्नाश्यत्वे स्वभिन्नगुणनाश्यत्वं तच्च स्वाश्रयनाश्येनित्यगुणो वा व्याप्यमतः प्रकाशे गुणं
तन्नाश्यत्वं पारिभाषिकमुक्तं लक्ष्यसंकोचादेव तदव्याप्तिवारणं संभवादित्यभिप्रायेणाह। फल इति कारणेतित
स्याच्च तयोरलक्ष्यत्वादेव नाव्याप्तिरिति भावः। अत्र कारणपदं निमित्तसमवाय्युभयसाधारणकारणसामान्यपरं गुण
पदं च घटादौ वारणाय कार्यपदस्य सामानाधिकरण्येन गुणविशेषणत्वे नित्यवृत्तिजन्यगुणस्यापि लक्ष्यत्वा
दव्याप्तिः स्यादत आह। कार्यवृत्तीति। ननु तथाप्याश्रय[illegible]नाश्यनष्टघटादिवृत्तिगुणेऽव्याप्तिरतः परयति। आश्रयेति। त
स्याच्च तादृशगुणोऽपि न लक्ष्य इति भावः। नन्वेवं यत्किंचिदाश्रयनाशानाश्यस्याश्रयान्तरसमानकालीनध्वंसप्रतियोगिनः
संयोगद्वित्वादेरलक्ष्यत्वात्तत्रातिव्याप्तिः। आश्रयनाशेन सह समसमयोत्पत्तिकनाशप्रतियोगिनोऽपि संगृहीतत्वात्तत्रा
व्याप्तिश्चेत्यतः पूरितां तमनुदापयस्येवार्थमाह। स्वसमानकालीनेति। स्वसमानकालीनो यो ध्वंसस्तत्प्रतियोगिनि वर्तते

गु॰टि॰ गुणास्तेषामित्यर्थः। स्वेतरस्य त्वेनाभिमतं द्रव्यत्वकर्म्मणोरिति व्याप्तिवारणाय लक्षणे गुणपदं प्रदर्शयति। आश्रयेति। तमुदितग्रं
९६१ थार्थमाह। पार्थिवेति। नित्यत्वादकार्यत्वाच्चेति तथा च गुरुत्वस्थितिस्थापकपर्यन्तं परमाणोः पार्थिवत्वविशेषणे पार्थि
161 वपरमाणुगुरुत्वस्थितिस्थापकयोरलक्ष्यत्वान्न च नित्यत्वाकार्यत्वरूपलक्षणेतिव्याप्तिः स्यादिति भावः। पार्थिवत्वाभावा
दिति तथा च तत्पर्यन्तं परमाणोः पार्थिवत्वविशेषणे त्वव्यावर्त्तकत्वापत्तिरिति भावः। गुरुत्वस्थितिस्थापकयोर
ति आश्रयत्वं षष्ठ्यर्थः। अन्वयश्चास्य परमाणोर्विशेषणेन तथा च गुरुत्वस्थितिस्थापकाश्रयेपरमाणावित्यर्थः। तदन्वयः
अपार्थिवत्वान्वयः। उत्तरेत्यत्राद्यावध्याकांक्षानिवृत्त्यर्थं प्रदर्शयति। स्नेहादिति। उत्तरपदस्याव्यवहितोत्तरोक्तगुरुत्वमात्रपरता
भ्रमनिरासाय व्याचष्टे। गुरुत्वेस्थितिस्थापके चेति। उत्तरत्रपर्यन्त्रे चेति उत्तरत्रेत्यनेन तत्पर्यन्ते चेति परस्लीयमिति भावः। न
नु गुरुत्वपर्यन्तमेव परमाणोः पार्थिवत्वविशेषणमावश्यकमन्यथा पार्थिवपरमाणुगुरुत्वस्य पाकजत्वेन नित्यत्वा
घभावाद्व्याप्त्यापत्तेरित्यत आह। पार्थिवपरमाणविति। एकदेशिनां लीलावती कृतां न त्वाचार्यस्येति भावः। द्रव्यादा

राम
९६१

वति व्याप्तिवारणाय गुणत्वस्य विशेष्यतावच्छेदकत्वेन प्रतियोगिकोटौ गुणत्वप्रवेशस्य निष्फलत्वादाह । एतदेति । एतच्छ
ब्देनेत्यर्थः । तत्प्रतियोगीति ध्वंसाद्यप्रतियोगीत्यर्थः । अभावद्वयप्रवेशे गौरवादाह । तथा चेति । तत्प्रतियोगीति ध्वंसादिप्र
तियोगीत्यर्थः । घटादिवारणाय गुणपदं । सांसिद्धिकद्रवत्वस्य सामान्यगुणत्वाभावादाह द्रवत्वमिति । मूर्तमात्रसामान्यगु
णत्वस्य मूर्तिमात्रवृत्तिसंख्यादाववतिव्याप्तेराह । विभुवृत्तीति । विभागादावव्याप्तिवारणाय संस्कारत्वान्येति । सत्तागुणत्वमादा
यासंभववारणाय गुणत्वव्याप्यपदं । गुणत्वन्यूनवृत्त्यर्थकं रूपादावतिव्याप्तिवारणाय विशेष्यदलमिति भावः । यथाश्रुतस्य भगव
ज्ज्ञाननिर्विकल्पकजीवनयोनियत्नादावतिव्याप्तेराह । विशेष्यत इति । तथा चेति भावनायां प्रत्यक्षजातेः संस्कारत्वस्य सत्त्वादव्या
प्तिः स्यादतो वेगावृत्तीति जातिविशेषणं । असंभववारणाय प्रत्यक्षत्वं जातिविशेषणं । गुरुत्ववेगस्थितिस्थापकेष्वतिव्याप्तिवा
रणायात्मपदं । ज्ञानादावतिव्याप्तिवारणाय गुणपदं । लाघवादाह । यद्वेति । परार्थत्वस्यापीति । इदमुपलक्षणं परममहत्त्वस्यापीति । द्वि
यत्वमेतत्तद्वारणायापि बोध्यं । अनुद्भूतत्वादिमादाय रूपादावतिव्याप्तिवारणाय श्रावणपदमिति भावः । जीवनयोनीति जीवन

गु. दि. योनियतत्वस्यातीन्द्रियजातित्वादिति भावः। गुणदीधितिरहस्ये साधर्म्यवैधर्म्यरहस्ये नैमित्तिकी उपलक्षणवती औ
१६२ पाधिकी पारिभाषिकी भेदेन संज्ञा चतुर्विधेति प्रकाशोक्तं फलतो दूषयितुमाह। संज्ञा त्रैविध्यमेवेति पारिभाषिकी औपाधि
162 की नैमित्तिकी भेदेन संज्ञा त्रैविध्यमेवेत्यर्थः। मूलस्वरसेति पारिभाषिकीत्व औपाधिकीत्व एव निषिध्यप्रवृत्ते नैमित्तिकीत्वोपग
मात् प्रकारान्तरसत्वे तदपि निषिध्यतेति भावः। एवकारात् प्रकाशोक्त चातुर्विध्यस्य मूलस्वरसासिद्धत्वव्यवच्छेदः। तत्रेति तासु
मध्ये इत्यर्थः। आधुनिकसंकेतशालिनीति संज्ञेत्यनुषज्यते अत एव स्त्रीलिंगता तथा च आधुनिकसंकेताधिकरणसंज्ञा
त्वं पारिभाषिकसंज्ञात्वमित्यर्थः। अत्र संकेताधिकरणत्वमात्रोक्तौ यान्निरूपसंकेताधिकरणत्वमादाय पारिभाषिकभिन्न
संज्ञामात्रेतिव्याप्तिरतः आधुनिकेत्युक्तं आधुनिकत्वं च प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं वा लौकिकसाक्षात्का
रविषयत्वमेव वक्तव्यं भगवत्संकेतस्य न लौकिकसाक्षात्कारविषयोऽतीन्द्रियत्वात् तदतिरिक्तसंकेतस्य संकेतयितुरेव लौकिकसा
क्षात्कारविषयः संज्ञात्वनिवेशात् आधुनिकसंकेतितयोर्धातुप्रत्यययोर्नातिप्रसंगः संज्ञात्वं हि प्रातिपदिकत्वे तत्र धातुप्रत्य

राम
१६२

यान्यत्वं स्वरूपपारिभाषिकस्य वृद्ध्यादेर्न धातुत्वादिरिति न तत्राव्याप्तिः संकेतत्वं च संकेतपदवाच्यता वाच्यतासंबंधेन संकेतप
दविशिष्टत्वमिति यावत् तेन पदपदार्थभेदेन विशेषणविशेष्यभावभेदेन वाधुनिकसंकेतानामननुगतत्वेपि न क्षतिः
न वा वस्तुवीक्यार्थता तत्पर्यमादाय शास्त्रे शानजाद्यंत स्वपाचकपाठकादेश्च वक्ष्यमाणसंज्ञासामान्यलक्षणेनाक्रांतत्वेन
संज्ञासामान्यव्यवहारभाजनस्य संज्ञाव्यवहारभाजनत्वोपगमेपि पारिभाषिकत्वेनापरिगृहीतस्य पारिभाषिकसंज्ञा
त्वप्रसंगः यादृशविशिष्टेच्छाव्याप्तिसंबंधेन तद्विषयपदवत्ताज्ञानं शाब्दबोधानुकूलं तद्विषयार्थस्मृत्युपधायकं तादृशवि
रिक्तत्वाभावादित्यत आह । तत्रेति । अपरेऽर्थमाह । अभावस्येति । क्वचित् अपरे इत्येव पाठः । अभावस्यानभ्युपगमादिति
गुरुनये तदैन्द्रियकत्वस्येति यद्यपि येन भट्टेनाभावस्यानुपलब्धिरूपातिरिक्तप्रमाणगम्यत्वाभ्युपगमात् इति भावः । चक्षु
र्मात्रवहिरिन्द्रियग्राह्यत्वं चक्षुर्भिन्नवहिरिन्द्रियाग्राह्यत्वे सति ग्राह्यत्वं तच्च गुर्विल्पतौ व्याप्तेः । त्वगग्राह्यमिति एतच्च
स्नेहद्रवत्वयोरतिव्याप्तिवारणाय गंधादावतिव्याप्तिवारणाय । चक्षुःपदं ग्रहस्योभयत्रैव लौकिको ग्राह्यः तेन नाप्र राम १२४

सिद्धिरिति व्याप्तिश्चापरेषां नीलपीतादीनामेकैकत्वान्नीलादेश्चक्षुर्ग्राह्यत्वसंभव इति नाव्याप्तिरिति भावः। नन्वत्रापि त्रस
रेणुस्नेहद्रवत्वयोरतिव्याप्तिः तयोस्त्वगग्राह्यत्वादत आह। त्रसरेण्विति। ननु स्नेहद्रवत्वयोर्द्व्यग्रहणयोग्यतांतर्भू
तयोग्यताकत्वेन तयोरप्रत्यक्षत्वप्रसंग इत्यत आह। स्नेहद्रवत्वान्येति विवक्षितं समुदायेन विवक्षितं। अत्रापरिमा
णादावतिव्याप्तिवारणाय। विशेषपदं वायुवृत्तिवृत्तिस्पर्शवृत्तिधर्मस्यान्यत्वं तदर्थः अधिकस्य व्यर्थत्वादिति ध्येयं। विवक्षा
वीजांतरमप्याह। अत एवेति स्नेहद्रवत्वान्येति विशेषणादेवेत्यर्थः। दैवात्तत्वक्संनिकर्षादिविरहात्तत्वगगृहीतेति चक्षु
र्गृहीतेति शेषः। यथाश्रुते मात्रपदवैयर्थ्यमतीन्द्रियरसादावव्याप्तिश्चाशंकां व्याचष्टे। चक्षुर्ग्राह्येति। रसनग्राह्यगु
णत्वमात्रोक्तावतीन्द्रियरसादावव्याप्तिः परेषां नीलपीतादेरेकैकत्वेपि मधुरत्वादीनामेकैकत्वाभावादतो धर्मघटनोत रा
ध्यापचयकारीरसनादिमात्रवहिरिंद्रियग्राह्यो विशेषो धर्मोयत्रेति बहुव्रीहिरिति भावः। ननु रसगंधत्वसंख्यादेरनभ्युपगमा
तादृशधर्मोऽप्रसिद्ध इत्यत आह। सर्वेति। ननु परेषां सत्तानभ्युपगमाद्ग्राह्योतमत्रव्याप्तिरित्यत आह। गुणत्वमपीति। ग्राह्यो

गु.टी० तमिति धर्मविशेषणमिति शेषः । रसगंधवद्भिन्नस्पर्शवतो रेवतादृशधर्मत्वादिति भावः । सुरभित्वमधुरत्वादिमादायातिव्या
१८५ प्तिवारणाय रसनग्राह्यपदमिति बोध्यं । स्पर्शपदप्रवृत्तिनिमित्तमाह । स्नेहेति । स्नेहत्वद्रवत्वेत्यादिकमादाय स्नेहद्रवत्वादाव
१८५ तिव्याप्तिवारणाय [redacted] वृत्त्यंतं धर्मविशेषणं परिमाणादिवारणाय विशेष्यपदं विशेष्यत्वं च पूर्ववत् । विशेषत्वप्रवेशे गौ
रवात् तद्घटितं लक्षणांतरमाह । चक्षुर्ग्राह्येति । त्वगिंद्रियाव्याप्तिनिरासाय धर्मघटको गुणत्वपरिमाणत्वादिवारण
याग्राह्यांतं धर्मविशेषणं सुरभित्वादिवारणाय ग्राह्यांतं धर्मविशेषणं स्पर्शाभावाय द्रव्येति व्याप्तिवारणाय गुणपद
मिति भावः । स्नेवेति । स्पर्शत्वमेव वृत्तेर्नोपियत इति भावः । एकैकत्वोपगमे त्विति । तथा सति धर्मघटनावैयर्थ्यादिति भावः ।
चक्षुर्ग्रहणायोग्येति परिमाणादिवारणाय योग्यतांतं गुणविशेषणं दैवात्वन्मात्रगृहीतस्नेहादिवारणाय योग्यतांतं धर्मा
वः चक्षुर्ग्रहणायोग्यत्वेन गुणत्वान्यच्चक्षुर्ग्राह्यधर्मशून्यत्वं तन्मते वायोरुष्णस्पर्शः त्वक्ग्राह्यत्वेन तत्रातिव्याप्तिवार
णाय स्पर्शनिष्ठसंख्यावारणाय वा गुणपदमिति भावः । श्रोत्रग्राह्येति । तन्नये ककारादीनामेकैकत्वात्तांतीन्द्रियककाा

राम
१८५

रादिसंभव इति नास्ति व्याप्तिरिति भावः। ननु द्रव्यकर्मणोः श्रोत्रग्राह्यत्वाभावात् शब्दत्वैकत्वादेरप्येतेनैवानुपगमात् गुणपद
मत्र मर्थ्यं। न च शब्दाभावेऽतिव्याप्तिवारणाय तदिति वाच्यं। तस्यानुपलब्धिरूपातिरिक्तप्रमाणगम्यतया श्रोत्रग्राह्यत्वाभावा
दित्यत आह। शब्दगतेति। न च सर्वत्र स्वप्रकाशानधीततदिन्द्रियजन्यज्ञानेऽतिव्याप्तिरिति वाच्यं। तत्तदिन्द्रियग्राह्यत्वपदेन
रिति वाच्यं। तत्तदिन्द्रियग्राह्यत्वपदेनैव स्ववृत्तितत्तदिन्द्रियलौकिकसन्निकर्षजन्यग्रहविषयत्वस्याभिधानादिति भावः। र
साधाकारेति मधुरो रसः तिक्तो रसः सुरभिर्गन्धो सुरभिर्गन्ध इत्याकारानुगतमतेरित्यर्थः। अनुभवसिद्धत्वादिति उक्तो
पाधिप्रतिसंधानमंतरेणाप्यनुभवसिद्धत्वादित्यर्थः। चाक्षुषादीति द्रव्यत्वविशिष्टलौकिकविषयतात्मककार्यताव
च्छेदकतयेत्यर्थः। आदिपदात् स्पार्शनपरिग्रहः। रूपत्वादेरिति नीलत्वपीतत्वादेरननुगतत्वादिति भावः। आदिपदात् स्पर्श
त्वपरिग्रहः। न चैवं लाघवात्तयोः समवेतत्वनित्यत्वयोरविसेषो विसमपरसमवशिष्यते जातित्वरिति वाच्यं संख्यानामपि [illegible]
ग्यत्वस्यापि तेषां लक्षणघटकत्वादिति भावः। इदमाधाततः प्रत्यक्षजनकतावच्छेदकतया रूपत्वस्पर्शत्वसिद्धौ एकत्वा

२ प्रत्यासत्त्या चाक्षुषत्वाद्यवच्छिन्नप्रतिजनकतावच्छेदक ३

गु.शि. दिमादाय विनिगमनाविरहापत्तेः । उक्तरेणोरनित्यत्वनयेऽतयोरेकत्व जन्यतावच्छेदकजातिव्याप्यत्वस्यापि सुवचत्वा
१८६ त्ताव स्तुतस्तु उक्तोपाधिप्रतिसंधानमंतरेण मधुरो रसस्तिक्तो रसः इत्यादिप्रतीतिवदुक्तोपाधिप्रतिसंधानमंतरेणैव नी
186 लं रूपं पीतं रूपं नीलो वर्णः पीतो वर्ण इत्यादिप्रतीतेरप्यनुभवसिद्धतया रसत्वादिवद्रूपत्वादेरप्यनुगतमतिवलादे
व सिध्यतीत्येव तत्त्वं । तथा चेति । ननु चक्षुर्मात्रग्राह्यविशेषगुणत्वादिसखंडोपाधिः । रूपं जातिसांकर्यस्य तन्मते जाति
त्वाबाधकत्वादाह । तेषामिति । धर्मिस्यातींद्रियत्वेपि रूपादिधर्मिणः साक्षात्कारो नानुपपन्न इत्यतो व्याचष्टे । रूपत्वादि
विशिष्टधीरिति रूपादिपदप्रवृत्तिनिमित्तविशिष्टधीरित्यर्थः । प्रत्यक्षान्यथासिद्ध्यं विवृणोति । त्वग्व्यावृत्तेति । त्वग्भिन्नतयाज्ञा
तेत्यर्थः । स्पर्शव्यावृत्तिः स्पर्शभिन्नत्वबुद्धिः स्पर्शव्यावृत्तेति स्पर्शभिन्नतयाज्ञातेत्यर्थः । त्वग्व्यावृत्तिः त्वग्भिन्नत्व
बुद्धिः । न च चक्षुर्ग्राह्यत्वेन हेतुना नीलादौ स्पर्शव्यावृत्तिसाधने कथं चक्षुषः त्वग्व्यावृत्तिबुद्धिरपेक्षितैवं नीलादिधी
करणत्वेन हेतुना चक्षुषस्त्वग्व्यावृत्तिसाधने कथं नीलादौ स्पर्शव्यावृत्तिबुद्धिरपेक्षितेति वाच्यं । चक्षुस्त्वचोर्भेदज्ञाना

भावेच घटत्वगमिन्नत्वेन गृहीतं तथा च घटस्पर्शोपि तज्ज्ञानस्य स्पर्शेपि सत्त्वात् तत्र च स्पर्शव्यावृत्तत्वाभावाद्यभिचार
ज्ञानायतेः एवं नीलादौ स्पर्शभिन्नत्वज्ञानाभावे नीलादिः स्पर्शभिन्नत्वेन गृहीतं तथा नीलादिधीकारणत्वज्ञानस्य त्वचोपि सत्त्वात्तत्र
चत्वग्व्यावृत्तत्वाभावाद्यभिचारज्ञानायतेरिति भावः। ननु प्रत्यक्षत्वप्रसंगादित्यस्य चक्षुरूपस्य प्रत्यक्षत्वप्रसंगादित्यर्थः। स
वायुत्वं तः चक्षुरूपस्य घटरूपाभिन्नतया घटरूपप्रत्यक्षस्येव चक्षुरूपप्रत्यक्षत्वेनेष्टापत्तेरतः प्रत्यक्षत्वप्रसंगादित्यस्य
प्रदर्शयति चक्षुष इति तत्तत्सन्निकर्षेणाचक्षुर्घटितसन्निकर्षेण तद्रूपस्य चेत्यर्थः। चक्षुःसंयुक्तमहत्त्वोद्भूतरूपवत्
समवायस्येव तद्व्यसमवेतचाक्षुषहेतुत्वादिति भावः। ननु दोषं विना कथं भ्रमः इत्यतो भ्रमप्रयोजकीभूतं दोषं दर्शयि
तुमवतारयति कामाह। अनुपलब्धेति। अनुपलब्धोपलभ्यमानतद्रूपादुत्पन्नसादृश्यादुपलब्धानुपलभ्यमानतद्रूपा
दिनष्टसादृश्यादित्यर्थः। तथा चैतज्ज्ञानमेव दोष इति भावः। तद्भेदाग्रहमात्रमिति। तयोरुत्पन्नविनष्टयोः रजतश्यामयोर्भे
दाग्रहमात्रमित्यर्थः। तन्मतेऽन्यथाख्यात्यभावादाह। भ्रम इति। मात्रपदेन विशिष्टज्ञानव्यवच्छेदः। ननु समवायविषयेत्यस्य

मत्सक्षत्वाभ्युपगमेपितत्४

गु.टि· प्रतियोगितासंबंधेन रूपाभावो समवायवत्वावगाहिनीत्यर्थः। तथाचघटसमवायोनष्टइत्यनुभवापत्तेरित्याग्रि
१८७ मदूषणासंगतिः श्यामः समवायीत्यनुभवापत्तेरित्यस्यैव वक्तुमुचितत्वात्समवायनित्यत्वस्यवक्ष्यमाणत्वादितिदूष
187 णासंगतिश्च समवायस्यनित्यत्वेपितद्वत्तावगाहने बाधकाभावादित्यतोव्याचष्टे। समवायस्येति सप्तम्यर्थेषष्ठी। तदु
भयावगाहिनी उत्पत्तिविनाशावगाहिनी श्यंतौ द्वियप्रतियोगिकयोः संसर्गाभावान्योन्याभावयोः। प्रयोगिकध्वंसप्राग
भावयोरप्रत्यक्षत्वस्य सर्वसिद्धत्वादितिभावः। अनुभवकलहस्य स्वल्पदोषत्वाद्दूषणमाह। समवायस्येति। ननुरूपा
कारत्वं रूपत्वप्रकारकत्वं वर्णाकारत्वं तु वर्णत्वप्रकारकत्वं तथा च रूपाकारानुगतधीर्नास्तीत्यसंगतं। रूपत्ववर्णत्वयो
रभिन्नतया वर्णत्वप्रकारकानुगतधीयच्च रूपत्वप्रकारकानुगतधीत्वादित्यतोव्याचष्टे। रूपशब्देति। तेजोविशेषग
तेति। अनुद्भूतस्पर्शवतेजोगतेत्यर्थः। एतच्चप्रभात्वस्य त्वगग्राह्यत्वस्फोरणाय व्याप्यत्वस्य पर्यंतस्य निष्प्रयोजनक
त्वात्। गुणवृत्त्यर्थेकमिति। जातिभेदमुदासः इति अपकर्षात्मकजातिभेदमुदासइत्यर्थः। त्रसरेणुस्नेहद्रवत्वमात्र

राम
१८७

योऽस्त्वनजातिभेद इति भावः। उत्तरग्रन्थेति नीलत्वादिजातिविषयत्वादेतस्येत्याद्युत्तरग्रन्थाविरोधादित्यर्थः। परिमा
णान्यगुणवृत्तित्वापेक्षया परिमाणान्यगुणत्वस्य लघुत्वान्नहानिरस्तु गौरवेति। एवकारेणेति। एतेन्विवर्तितन्तरइति म
लस्यैवैवकारेण लभ्यर्थः। ननु पृथिव्यादित्रिकविशेषगुणवृत्तीत्यस्य पृथिवीविशेषगुणवृत्ति जलविशेषगुणवृत्ति
तेजोविशेषगुणवृत्तीत्यर्थः। यथाश्रुते रूपस्य प्रतिव्यक्तिभिन्नतया पृथिव्यादित्रिकविशेष्यगुणत्वेन ह्यविरूपइत्य
संभवायेतः। तत्र च त्रिषु विशेषपदं व्यर्थं पृथिवीगुणे तेजोगुणे वा विशेषत्वविवक्षायैव द्रवत्वमादायनैमित्तिकद्रव
त्वेऽतिव्याप्तिवारणसंभवादित्यतो व्याचष्टे। विशेषेतीति। तथा च त्रिषु नोपादेयमिति भावः। जलगुणमात्रान्विततत्वे सां
सिद्धिकद्रवत्वव्यक्तिद्रवत्वत्वमादाय नैमित्तिकद्रवत्वेऽतिव्याप्ति ~~वारणसंभवादित्यतो व्या~~चष्टे। विशेषेतीति। ~~तथा च~~
~~त्रिषु नोपादेयमिति भावः। जलगुणमात्रान्वितत्वे सांसिद्धिकद्रवत्वव~~ तादवस्थ्यादन्यतमगुणमात्रान्विततत्वं नोक्तं।
सत्तागुणत्वस्पर्शत्वानां वायुवृत्त्यवृत्तित्वविशेषणादेव वारणाद्गुणत्वव्याप्यपदवैयर्थ्यमित्यतो व्याचष्टे। गुणपदमिति।

गु.शि. स्पर्शत्वस्यापि स्पर्शत्वव्याप्यतया स्पर्शेऽतिव्याप्त्या यत्वा रूपत्वादेः स्पर्शत्वाव्याप्यतयाऽसंभवापत्त्या चाह। व्याप्यत्वं
१८८ चेति। तत्समानाधिकरणेति स्पर्शत्वसमानाधिकरणेत्यर्थः। लाघवादाह। स्पर्शावृत्तीति। ननु गुणत्वव्याप्यदस्य
188 स्पर्शावृत्तिपरत्वेऽपि वैयर्थ्यं तदवस्थमेव स्पर्शावृत्तित्वविशेषणदलीयानां सत्तागुणत्वस्पर्शत्वानां वायुवृत्तवृ
त्तित्वविशेषणेनैव वारणादित्यत आह। तथा चेति। वैकल्पिकमुपादानमिति। सत्तागुणत्वस्पर्शत्ववारणाय वैकल्पिकमु
पादानमित्यर्थः। ननु तथापि पृथिवीगुणवृत्तित्वजलगुणवृत्तित्वदलयोर्वैयर्थ्यं रसगन्धयोरतिव्याप्तिवारणाय तेजो
गुणवृत्तित्वदलस्यावश्यकत्वात् तत्र विशेषणत्वविवक्षयैव नैमित्तिकद्रवत्वेऽतिव्याप्तिवारणसंभवात् न च वायुवृत्त्य
वृत्तित्वघटितलक्षणे उष्णत्वमादायोदयस्पर्शेऽतिव्याप्तिवारणाय तदुपादानमावश्यकं स्पर्शावृत्तित्वघटितलक्षणे
विविशेषत्वं तेजोगुणेन विवक्षितं तथा च तेजोगुणवृत्तित्वदलेन रसगन्धयोरतिव्याप्तिवारणेऽपि द्रवत्वत्वमादाय द्रवत्वे
ऽतिव्याप्तिवारणाय पृथिवीविशेषगुणवृत्तित्वदलमावश्यकं यथासंनिवेशे वैयर्थ्याभावादिति वाच्यं तथापि जलगु राम
१८८

णवृत्तित्वदलस्य वैयर्थ्यादित्यतो लक्षणान्तरपरतया व्याचष्टे । तथा चेति । पृथिवीत्वादिग्रन्थो स्पर्शद्रवत्ववारणा
याद्यं वृत्त्यंतं रसत्वगंधत्वयोः सत्ताव्याप्यजातीनां च वारणाय तेजोवृत्तिवृत्तिपदं जलवृत्तिवृत्तीत्युक्तौ रसत्वतद्व्याप्य
जातीनां न व्युदास इति तेजोनुभावनं सत्तागुणत्वस्पर्शत्ववारणाय वृत्त्यंतं द्वयोर्वैकल्पिकमुपादानं न चेति जो गुण
एव विशेषणत्वं विशेष्यतां किं पृथिवीविशेषगुणवृत्तित्वदलेनेति वाच्यं वायुवृत्त्यवृत्तित्वघटितलक्षणे उदयनत्वमा
दायो दयस्पर्शकृति व्याप्त्यापत्तिः सत्तावारकत्वेनैव वैयर्थ्याभावात् स्पर्शावृत्तित्वघटितलक्षणेऽपि यथासन्निवेशे वैयर्थ्या
भावादिति भावः । तेजोविशेषेति । अत्र स्नेहत्वरसत्वानां तद्व्याप्यजातीनां च वारणाय आद्यं वृत्त्यंतं द्रवत्वसत्तवारणाय च
विशेषपदं उष्णत्ववारणाय जलवृत्तिवृत्तीति जलवृत्तित्वस्थाने पृथ्वीवृत्तिवृत्तित्वोक्तौ भावेनापि लक्षणान्तरं बोध्यं सत्ता
गुणत्वस्पर्शत्ववारणाय वायुवृत्त्यवृत्तीति विकल्पेन स्पर्शावृत्तित्वोक्तौ जलवृत्तिवृत्तित्वदलवैयर्थ्यमत उक्तं परित्यागः
तेजोविशेषेति । अत्रापि गंधत्वरसत्वद्रवत्वत्वादिवारणाय वृत्त्यंतं सत्तागुणत्वस्पर्शत्वोष्णत्ववारणाय स्पर्शावृत्तीति वि

१८५

ग.शि. कत्वेन वायुवृत्त्यवृत्तित्वोल्लेखो न तु स्पर्शत्वावच्छेद इति तत्परित्यागः। ननु रूपाभावादिप्रत्यक्षे व्यभिचारस्य न चाक्षुषप्रत्यक्षका
१८८ रणत्वसामान्याभावसाधनत्वे तथात्वे पि द्रव्यलौकिकचाक्षुषहेतुत्वसंभवादित्यतो मयेदमिति चाक्षुषप्रत्यक्षमात्र
189 इति चाक्षुषप्रत्यक्षसामान्यइत्यर्थः। यत्किंचित्प्रत्यक्षेति द्रव्यलौकिकचाक्षुषेत्यर्थः। चाक्षुषप्रत्यक्षसामान्यकारणत्वस्य
लक्षणाघटकत्वादिति भावः। उद्भूतरूपवत्वं उद्भूतरूपं तज्ज्ञानकारणतावच्छेदकं किंतु कारणमेव लाघवादित्यतो व्याचष्टे मन
नुपइति। यथाश्रुते वक्ष्यमाणदोषस्य दुर्वारत्वाद्व्याचष्टे। कारणेति। विशेषपरतयेति। कारणशब्दस्य विषयरूपकारण
विशेषपरतया विशेषगुणश्चाक्षुषं च पृथिवीविशेषगुणरूपगुणविशेषपरतयेत्यर्थः। चाक्षुषेति। अत्रगंधरसस्पर्शवा
रणायविषयीतं विशेषगुणविशेषणं स्नेहस्यासिद्धिः द्रवत्वयोर्वारणाय पृथिवीपदं पृथिवीवृत्तिसंख्यादिवारणाय विशे
षपदं सत्तागुणत्ववारणाय गुणत्वव्याप्यपदं गुणत्वन्यूनवृत्तिपरं समवायसंबंधेन तादृशधर्मवत्त्वाभावश्च जातिपदम
न्यच्च स्वयमेव वक्ष्यते यथाश्रुतलक्षणे दोषं व्याकुरुते तेनेति। द्रव्यप्रत्यक्षेति मानसे तादृशलौकिकप्रत्यक्षसामान्ये त्यर्थः। प्र

राम
१८८

भावेन चाक्षुषं किंतु तद्रूपमेव चाक्षुषमिति न तत्र व्यभिचार इति भावः। लाघवात् स्पार्शनप्रत्यक्षएव स्पर्शो हेतुः नेतादृशप्र
त्यक्षमात्रे इत्यस्यैव नव्यमत तत्वान्मतद्वयतुल्यं यद्यपि नव्यमतेपि कालत्वेन जनकतामादाय स्पर्शेति व्याप्तेर्दुर्वारत्वेन मतवि
शेषानुधावनं न युक्तं तथापि यद्दृष्टाद्विवारणाय साधारणत्वविवक्षायां नव्यमते तज्जातिव्याप्तिर्न घटत इति तदनुधाव
नं धर्मी धर्मयोरिति धर्मी धर्मादावित्यर्थः। आदिपदाद्भगवत्तत्वादेः कालोपाधिविधया चाक्षुषनिर्विकल्पकज
नकस्य गंधरसादेः परिग्रहः एतेषां विषयपदप्रविष्टिवीपदेन यथास्यामेव वारणं संभवतीति मध्ये निवद्धं निर्विकल्प
केतीति निर्विकल्पकत्वं सप्रकारकभिन्नत्वं तेनोपनीतभानस्य प्रांशिकनिर्विकल्पकत्वानुगतदोषतादवस्थ्यं निर्विक
ल्पकानभ्युपगंतॄन प्रति संभवात्प्रत्यक्षत्वं तदेव व्याचष्टे वस्तुतस्त्विति। एकद्रव्यप्रत्यासत्त्येति विषयघटितसामाना
धिकरण्यप्रत्यासत्त्येत्यर्थः। तेन धर्मधर्मिणोः स्वेहद्रव्यत्वयोः स्पर्शजन्यातिव्याप्तिरिति भावः। तादृशप्रत्यासत्तिमेव विवृ
णोति। तथेति। सामानाधिकरण्यप्रत्यासत्तावित्यर्थः। विषयतेति लौकिकविषयतेत्यर्थः। अत्र समवायघटितसामाना

गु॰ शि॰ १९०
190

धिकरण्यप्रत्यासत्त्या कारणत्वमात्रविवक्षायां सामान्यलक्षणादावतिव्याप्तिरतो विषयतायाः प्रत्यासत्त्यंतर्भावः वि
षयताघटितसामानाधिकरण्यप्रत्यासत्त्या कारणत्वमात्रविवक्षायां स्नेहद्रवत्वयोरतिव्याप्तिरतः समवायांतर्भावः।
नन्वेवं निर्विकल्पकपदं व्यर्थमित्यत आह। सामान्यलक्षणयेति। सामान्यलक्षणया नीरूपस्यापि द्रव्यस्य चाक्षुषोद
यात् तत्र व्यभिचारवारणाय लौकिकविषयत्वमेव रूपस्य जन्यतावच्छेदकसंबंध इति स्फोरणायेत्यर्थः। ननु निर्विक
ल्पकत्वं लक्षणे निविष्टमिति भावः। नन्वेवं स्पर्शस्य मानसेतरद्रव्यलौकिकप्रत्यक्षसामान्यहेतुतामते स्पर्शेऽतिव्याप्ति
रित्यत आह। गुणत्वव्याप्येतीति पर्यवसितरीत्येति। गुणपदं स्पर्शपरं तद्व्याप्यत्वं च निखिलतदाश्रयनिष्ठान्योन्याभावप्रति
योगितावच्छेदकत्वं शीततादिकवारणाय निखिलेतीतिरीत्ये स्पष्टः। प्रकाशेन तु उद्भूतरूपवत्त्वस्येत्याशंकायामालो
कनिष्ठरूपमात्रपरत्वे द्रव्ये चानुगततानतिप्रसक्तत्वेन कारणतावच्छेदकत्वादिति समाधानं न संगच्छते आलोकनि
ष्ठरूपस्य विषयीभूतद्रव्यनिष्ठकारणतानवच्छेदकत्वासंभवादित्यतो विषयालोकोभयनिष्ठरूपपरतयैव तां

राम
१९०

९३

ख्या चेष्टा। विषयस्यास्येति। विषयलौकिकयोरिति यद्यपि प्रकाशे नानुद्भूतरूपवत्त्वस्येत्येव पाठः तथाप्युद्भूतरूपवत्त्वपदं
विषयालोकोभयनिष्ठोद्भूतरूपपरमिति प्रतिपादयितुं परस्येत्यपाठधारणं इत्थं च प्रकारभेदेनेत्यादिद्वितीयस
माधानं विषयरूपाभिप्रायेणेति नद्रव्ये चेत्यादिग्रन्थासङ्गतिः न च विषयनिष्ठोद्भूतरूपवत्त्वस्य कथं प्रत्यक्षकारण
तावच्छेदकत्वमिति वाच्यं। द्रव्यलौकिकचाक्षुषं प्रति उद्भूतरूपवत्त्वेन विषयविधया द्रव्यस्य कारणत्वमिति प्रकाशकृ
तोऽभिमानादिति भावः। पूर्वपक्षस्योभयपरतायां समाधानस्याप्युभयपरत्वमावश्यकमित्यतः पूर्वपक्षसमाधानम
प्युभयपरतया व्याचष्टे। समाधत्ते इति। विषयस्यालोकस्य स्वरूपस्य प्रत्यक्षकारणत्वमित्यादावनुषज्यते। वि
षयस्यास्येति एतदपि उद्भूतरूपोत्कर्षादिलक्षणाद्भूतरूपपदमुभयनिष्ठोद्भूतरूपपरमिति प्रतिपादयितुं परएणं वस्तुतस्तु
प्रकारे द्रव्येत्यत्र द्रव्यपदमालोकपरमिति यथाश्रुतमेव समाधेयः। केचित्तु पूर्वपक्षसमाधानयोरुभयत्रैव तुल्य
तयाऽऽलोकरूपमात्रपरत्वेऽन्यतरत्वमित्यतो विषयालोकोभयरूपपरतयैव पूर्वपक्षं समाधानं चेदीधितिकृद्व्याचष्टे।

गु.शि. विषयरूपस्येत्यादिनेत्याहुः। अनुद्भूतइति। अतीन्द्रियेघ्राणादाविपर्यर्थः। रूपादेरूपादिमत्वेयथाश्रुतेसिद्ध्यसिद्धिव्या
१९१ घातात्। ननुघ्राणादेःपृथिवीत्यादिनारूपस्पर्शावनुमेयाविलक्षणत्वाद्रव्यत्वस्यैवेतिपृथिवीत्वादेरित्यादिपदाद्रसनच
191 क्षुषोरूपरसस्पर्शानुमापकजलत्वतेजस्त्वपरिग्रहः। ननुनीलत्वाद्यवच्छिन्नंप्रतिपृथिवीत्वेनसमवायिकारणतयाघ्रा
णादिषुनीलाद्युत्पत्तौकिंबाधकमितिवाच्यं। समवायिकारणसत्वेविपाकविशेषावयवनीलादिलक्षणसमवायि
कारणविरहादेवतत्रतदनुत्पादसंभवात्। अन्यथातवापिघणदादिवतत्रापिउद्भूतनीलाद्युत्पत्तेर्दुर्वारत्वादितिभावः। बा
धकाभावमुक्त्वाबाधकमप्याह। अतएवेति। महतीति घ्राणादेरतीन्द्रियेरूपविरहादेवेत्यर्थः। प्रतीतिरिति। लौकिकप्रत्यक्ष
कप्रतीतिरित्यर्थः। अन्यथावायुपर्यादिमहत्वेसतिरूपवान्स्यात्रूपवत्तयाउपलभ्येतेत्यापादनस्य घ्राणादौव्यभिचा
रेणासंभवाद्योग्यानुपलब्ध्यभावेनतथाप्रत्यक्षंनस्यादितिभावः॥ ननुवायौतादृशापत्त्यसंभवेपिफलबलात्तदन्तानं
तादृशप्रत्यक्षेहेतुःनत्वापत्तिरभावविषयेहेतुः। अपितुअधिकरणतयाअभावलौकिकप्रत्यक्षविषयपरिचायिकैवप रा.म.

१९१

रिचायकप्रसंगस्तु न वस्तुसिद्धौ बाधकः तस्याप्यपरिचायकत्वे तावदन्यतमत्वादेरेवापरिचायकत्वसंभवादित्यस्व
रसाबाधकं तदमाह। लाघवेनेति। प्रत्यक्षत्वापत्तेरेकत्वं तमेकोग्रंथः। लाघवेन उद्भूतरूपवत्त्वोद्भूतस्पर्शवत्त्वापेक्षया रूपव
स्पर्शवत्त्वयोर्लाघवेन रूपस्पर्शयोः रूपस्पर्शसामान्ययोः प्रत्यक्षत्वप्रयोजकत्वादिति द्रव्यलौकिकप्रत्यक्षजनकत्वा
दित्यर्थः एतच्च प्रत्यक्षत्वापत्तौ हेतुः महत्त्वस्येति। एतच्च महत्त्वाभावात् फलाभावस्तत्रेतिश्कावारणायोक्तं तयोः रूपस्प
र्शयोः तेषां चक्षुरादितदवयवानां तयोः तत्समवेतरूपस्पर्शयोः प्रत्यक्षसमवेतरूपस्पर्शयोः प्रत्यक्षत्वनियमादि
तिभावः। ननु तेषु रूपस्पर्शमहत्त्वानां सत्त्वेऽपि गुरुत्वादिवद्विषयमाहात्म्यादेव न प्रत्यक्षत्वमित्यस्वरसाबाधकं तदमाह।
उपस्थितत्वादिति। अत एवेत्यनुवर्तते विशेषणज्ञानस्योपनयस्य सन्निकर्षस्य च संपादनाय उपस्थितत्वाभिधानं अभावे
न लौकिकसन्निकर्षसंपादनाय तत्र च सन्निकृष्टद्रुति योग्यानुपलब्धिसंपादनाय महतीति तथा च विधद्रुति उपस्थिते तत्र द्रु
सन्निकृष्टमहती त्यर्थः। निरवयवे च पार्थिवे उद्भूतस्पर्शस्य सामान्याभावबुद्धिरिति चक्षुषि उद्भूतस्पर्शो नास्तीति बुद्धिरित्य

गु.शि. र्थः। स्पर्शसामान्यस्यापीति अभाववुद्धिर्निरवाधैवेत्यनुपपद्यते अनुद्भूतोष्मस्पर्शसत्वे तायप्याप्तीन स्यात् तन्न चेष्टाप
१९२ त्तिः प्रमात्वस्यानुभवसिद्धत्वादन्यथा विषयवाधवत्त्वेऽवकाशिन् स्यादिति भावः। इदमुपलक्षणं चक्षुःसंनिकृष्टे शुक्लरूपसामा
192 न्याभाववुद्धिः रूपसामान्याभाववुद्धेरपि यथाप्राप्तीन स्यादित्यपि वोध्यं। केचित्तु। नन्वेवं चक्षुष्युष्मस्पर्शो नास्ति चक्षुषि स्पर्शो नास्ती
त्यादिवुद्धेरपि प्रमात्वापत्तिरित्यत आह। उद्भूतस्येति। तथा चेष्टापत्तिरिति भावः। एवं चात एवेत्यस्यानुद्भूतावयविन्यतिरिक्ता
हुः। ननु द्रव्यत्वेन द्रव्यारंभकत्वे नित्यस्येत्यादिव्याप्तिवलादाकाशादेरपि द्रव्योपधायकत्वापत्तिरतः स्पर्शवत्वे
नैव द्रव्यारंभकत्वात् तथा चक्षुराद्यवयवेष्ववश्यं स्पर्शो वाच्यः। तत्र उष्मस्पर्शोपगमे च सामग्रीवलादेव चक्षुरादावपि
तत्सिद्धिरित्यत आह। अनंतानामिति। आरंभकतावच्छेदकानामिति द्रव्यारंभकतावच्छेदकानामित्यर्थः। तदप्र
त्यक्षत्वप्रयोजकानामिति अनुद्भूतरूपनि●ष्ठलौकिकविषयत्वाभावप्रयोजकानामित्यर्थः। द्रव्यसमवेतचाक्षु
षं प्रति स्वाश्रयसमवेतत्वसंवंधेनानुद्भूतत्वाभावकूटवद्रूपस्य हेतुतयाऽनुद्भूतत्वस्यानुद्भूतरूपनिष्ठप्रत्यक्षता

राम
१९२

भावप्रयोजकत्वमिति भावः। तदा चेति। स्पर्शवत्त्वेन द्रव्यारंभकतावादिनस्तदापीत्यर्थः। नन्वेवमिति। अंत्यावयवि
नो द्रव्यारंभकतापत्तिरिति शेषः। शंकते तदन्यत्वेनेति। अंत्यावयविभिन्नत्वेनेत्यर्थः। सामानाधिकरण्य रूपं वैशि
ष्ट्यं तृतीयार्थः। तथा चात्र स्पर्शवत्त्वस्यारंभकतावच्छेदकत्वात् अंत्यावयविभिन्नत्वं न तावद्द्रव्यासमवायिभिन्नत्व
तावत एव सम्यक्त्वेन स्पर्शवत्त्वांशस्य वैयर्थ्यप्रसंगात् द्रवितु द्रव्यसमवायवृत्तिजातिमद्भिन्नत्वं यावत्तांत्यावय
विनस्तदन्यत्वं वा तदघटकत्वं तत्राद्ये आह। तर्हि तत्त्वमिति। द्रव्यानारंभकवृत्ति घटत्वादिमत्त्वमेवेत्यर्थः। तादृशजाति
मद्भेदस्य पृथग्वृक्षकारणत्वकल्पनायामेव लघीयस्त्वात् तेन च अंत्यावयविभेदस्पर्शयोरेकत्रद्वयमिति न्यायेन व्यास
ज्यवृत्तिजनकतावच्छेदकत्वेन तु परस्पर विशेषणविशेष्यभावः येन विशेषणविशेष्यभावे विनिगमकाभावान्न
नावि कार्यकारणभावद्वयं स्यादिति वाच्यं तथात्वे अंत्यावयविभेदत्वं तत्स्पर्शयोर्व्यासज्यवृत्तिजनकतावच्छेदकत्वक
ल्पनामपेक्ष्य अंत्यावयविभेदचतुष्टयवृत्तिजातिविशेषयोर्व्यासज्यवृत्तिजनकतावच्छेदकत्वकल्पनायामेव लघीय

ग्र.शि. स्त्वादिति भावः। द्वितीये त्वाह। अयि चेति। एकैकाम्यावस्येति तत्तद्व्यक्तिभेदविशिष्टस्पर्शवत्त्वानां दण्डत्वचक्रत्वादिवत्
१९३ प्रत्येकं जनकतावच्छेदकत्वे इत्यर्थः। मिलितयोरिति परस्परसंयुक्तयोर्दण्डघटयोः परस्परसंयुक्तकपालद्वयोरिव
193 द्व्यारंभकतापत्तिरित्यर्थः। निखिलानां त्वावयवव्यक्तिभिन्नस्पर्शवत्तामेव तत्र सत्त्वादिति भावः। एतज्ज्ञापातः नि
खिलतत्तद्दण्डत्वावयवव्यक्तिभिन्नस्पर्शवत्तातादात्म्यसंबन्धेनैव कार्यसमवायिनिष्ठतया प्रत्येकं दण्डचक्रादिव
द्धेतुत्वे तत्र मिलितदण्डघटस्थले नास्ति दण्डघटादिभिन्नस्पर्शवत्ताऽभावात् घटेदण्डादिभिन्नस्पर्शवत्तातादात्म्येन स
त्वेऽपि घटादिभिन्नस्पर्शवतोऽभावात् परंतु अन्ततः कार्यकारणभावापत्तिरेव दोषो बोध्यः। तावदन्यतमान्यत्वेनचे
ति तत्तद्दण्डत्वावयवव्यक्तिभेदकूटविशिष्टत्वेन स्पर्शस्य जनकतावच्छेदकत्वे इत्यर्थः। विशेषणविशेष्यभावानं
त्यादिति विशेषणविशेष्यभावेन कारणतावच्छेदकानंत्यादित्यर्थः। घटान्यत्वविशिष्टपटान्यत्वं वा स्पर्शविशेष
णं पटान्यत्वविशिष्टघटान्यत्वं चेत्यत्र विनिगमकाभावेन सर्वेषामेव विशिष्टानां स्पर्शविशेषणत्वस्य दुर्वारत्वात् न

राम
१९३

६६

चतावद्भेदकूटानां स्पर्शानां च एकत्र द्वयमितिस्याद्येन व्यासज्यवृत्तिकारणतावच्छेदकत्वकल्पने नैष दोष इति वा
च्यं तथापि विशेषस्य दुर्वारत्वात् तस्माद्विलक्षणसंयोगस्य द्रव्यासमवायिकारणतया तदभावात् त्वाद्यवयविनो
द्रव्योत्पाद इत्येव त्वयापि स्वीकरणीयं तच्च तुष्टयवृत्तिजातिविशेषस्य समवायिकारणत्वेऽपि तुल्यमिति भावः।
जात्यंतरकल्पनागौरवादाह। अस्तु वेति। तेषामिति द्रव्यारंभकतावच्छेदकत्वपर्यः। नन्वेवं मनसोत्पा वयविना च द्र
व्यारंभकतापत्तिरित्यत आह। दोषमिति। आरंभकसंयोगविशेषस्य फलबलकल्प्यतया तादृशसंयोगविरहा
दवनद्रव्योत्पाद इत्यर्थः। न चैवं नित्यस्येत्यादिव्याप्तिभंग इति वाच्यं। तादृशव्याप्तौ मानाभावात् पार्थिवाद्यिपर
मापत्तिरित्त्रमनसोनभ्युपगमाच्च न च द्रव्यत्वसमानाधिकरणविनिगमनाविरह इति वाच्यं तयोर्व्यापकधर्मत्वेना
न्यथासिद्धत्वान्नित्यस्येत्यादिव्याप्तिसत्त्वे गगनादेरपि फलोपधानप्रसंगाच्चेति भावः। एतच्चाभ्युपगमवादे
नोक्तं वस्तुतस्तु द्रव्यगुणकर्मभिन्नतयसमाधारणजन्यत्वावच्छिन्नं प्रत्येवश्यावश्यकत्वाल्लाघवाच्च सामान्यतो द्रव्य

ग्र. शि. त्वेन समवायिकारणतया द्रव्यं प्रतिपद्य ङ्मृतत्वादिना समवायिकारणत्वे मानाबदतीति ध्येयं। विभ्रमं मतं आह। यवि
१९४ 194 ति। पार्थिवेति। पार्थिवपरमाणुषु पाकजन्यद्रव्येषु च वर्त्तमानेत्यर्थः। जलादिपरमाणूनां स्पर्शस्य नित्यतया पार्थि
वेत्युक्तं। संकरप्रसंगेनेति। जलत्वे तेजस्त्ववायुत्वेन समं संकरप्रसंगेनेत्यर्थः। जलपरमाणावादीत्यादिपदात्तेजःपर
माणुवायुपरमाणुपरिग्रहः। नन्वेवं जलादिपरमाणूनामपि जन्यस्पर्शस्वरूपयोग्यतया तत्र कुपं न स्पर्शोत्पत्तिरित्यत
आह। स्वरूपयोग्येपीति स्पर्शेनेति नित्यस्पर्शेन असमवायिकारणेति विजातीयतेजःसंयोगावयवस्पर्शयोरसमवायि
कारणयोर्विरहादित्यर्थः। नित्यस्पेत्यादि व्याप्तेरप्रयोजकत्वादिति भावः। तद्भिन्नत्वमिति। भिन्नतावीजं च जन्यस्पर्शत्व
स्य कार्यतावच्छेदकत्वे मानाभावः। जन्यरूपरसादिसकलसाधारणजन्यगुणत्वावच्छिन्नं प्रति द्रव्यत्वेनैव समवा
यिकारणत्वात् अन्यथा जन्यरूपरसादिजनकतावच्छेदकतयानंतजातिकल्पनागौरवापत्तेः। अस्तु वा जन्यस्पर्श
त्वावच्छिन्नं प्रति द्रव्यत्वेनैव समवायिकारणत्वं असमवायिकारणविरहादेवाकाशादौ स्पर्शानुत्पत्त्यादिसंभवा

न्या. म.
१९४

रिति ध्येयं । ननु चक्षुरादौ रूपाद्यभावेऽप्यतत्पदवाच्यत्वं तस्माद्बहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्त्वस्याप्यतत्पद
वाच्यतावच्छेदकत्वादित्यत आह । अतत्पदं विवितास्पृथिवीत्वादिमदितिपं चमिश्रितिशेषः । तथा च नानार्थप्रवेत्तदिति
भावः । नानार्थत्वे गौरवादाह । अनुगतेनेति शब्देति शब्दः समानाधिकरणं यन्नित्यमहत्त्वं तदनधिकरणत्वे सतीति मनो
न्यद्रव्यत्वमित्यर्थः । अत्र दिक्कालयोर्वारणाय सत्यन्तं आकाशसंग्रहाय समानाधिकरणान्तं महत्त्वविशेषणं पृथि
व्यादावव्याप्तिवारणाय नित्यमहत्त्वपदं घटादावव्याप्तिवारणाय नित्यपदं परमाणुद्व्यणुकयोरव्याप्तिवारणाय परिमा
णसामान्यमपहाय महत्त्वानुधावनं गुणादावतिव्याप्तिवारणाय विशेष्यदलं तत्र मनस्यतिव्याप्तिवारणाय मनो
न्यत्वं द्रव्यविशेषणमिति भावः । प्रागभावे व्यभिचारवारणाय व्याचष्टे । अनित्यत्वमिति । प्रकाशकारनये साचेत्यस्य
पाकजन्यतावेत्यर्थः । स चानुगतः कार्यतासामान्यस्यैवं एवं प्रकान्ततत्वेन पाकजन्यताया रूपदर्शत्वासंभवात् एवमपि
अनित्यत्वापदस्य परमाणुरूपत्वादिविशिष्टानित्यतापरत्वे कार्यतापदस्य च पाककार्यतापरत्वेऽपदार्थकल्पने स्यतो

पु.शि. ध्या च षष्ठी। सा कार्यतेति। ननु कार्यतासामान्यस्य वह्न्यप्राग्विचित्रताव्याप्यत्वमेव न संभवति जलावयविरूपादेर्व्यभि
१९५ चारादित्यतो व्याचष्टे। रूपादीनामिति। तथा च परमाणुरूपादीनां सा चेति योजना। पाथःपरमाणुरूपादिवृत्तित्वविशिष्ट
195 कार्यतावत्त्वार्थः। तद्विशिष्टकार्यता च न जलावयविरूपादाविति न व्यभिचार इति भावः। रसादेरपि सलिलादिपरमा
णुनिष्ठरसादेरपि तथात्वसिद्धये नित्यत्वसिद्धये ननु कार्यैकद्रव्येऽवृत्तित्वस्य कार्यमेवद्रव्यं प्रसाध्यस्येति युक्त्या कार्य
वृत्ति रूपादिवृत्तित्वार्थः सिद्धयेति च शेषः। तथा च कार्यवृत्तिरूपादिषु सिद्धया विचित्रतया व्याप्तेति समुदितार्थः। सन्नासंग
तः पार्थिवपरमाणुरूपादिविचित्रतायाः सिद्धिसंभवेन कार्यवृत्तिरूपादिपर्यन्तानुधावनस्य व्यर्थत्वादित्यतः प्रा
हाप्रात्यक्षिकी चेति। कार्यताभावादिसाधकानुमानमेव प्रयोगारूढं दर्शयति। तथा चेति। यद्यपि परमाणुरूपवृत्तित्वविशि
ष्टकार्यतायां विचित्रताव्याप्यतया विचित्रताभावेन च विशिष्टकार्यताभाव एव साधयितुमुचितस्तथापि विशिष्टका
र्यताभावसाधने कार्यत्वसामान्याभावसिद्ध्यर्थमनुमानान्तरापेक्षा स्यादिति गौरवभीत्या केवलविशेष्याभाव एव साधि

राम
१९५

तः न चैवं मूले विविशिष्टव्यापकताप्रदर्शनफलमिति वाच्यं। विशिष्टव्यापकताज्ञानस्य विशेषणवत्त्वे सति विशिष्टव्याप
कताभाववत्त्वेन हेतुना केवलविशेष्याभावसाधनेऽनुकूलतर्कतया तत्साफल्यादिति ध्येयं। अवयवसत्तावच्छेदकावच्छेदे
न साध्यसिद्धेरुद्देश्यतांशतो बाधवारणाय अपार्थिवपरमाणुपदं जलादावपि रूपे व्यभिचारवारणाय च हेतौ स
त्यंतं विचित्रत्वं च प्रकाशकृतैव निर्वक्तव्यमिति भावः। मूलम् इति पृथिवीरूपादेर्गंधादेश्च तथात्वसंभवादिति भावः। अ
विनाशित्वेति। अपार्थिवपरमाणुरूपमिति पक्षोऽनुषज्यते प्रागभावे व्यभिचारवारणाय हेतौ सत्यंतमिति भावः। प्र
काशमवतारयति। द्रव्यत्वेतीति। भेदेनेति। अन्यथा गुणत्वरूपत्वशुक्लत्वादिनापादाय जलपरमाणुरूपादावति व्या
प्त्यापतेः गुणत्वरूपत्वशुक्लत्वादेरपि द्रव्यत्वव्याप्यस्य द्रव्यत्वस्यैव व्याप्यतावच्छेदकत्वात् न चास्य पाकजन्यत्वव्या
पकधर्मतया जलपरमाणुरूपादावतिप्रसंगो न दोषायेति वाच्यं। अस्माकं जलपरमाणुरूपादिसाधारण्येन तद
भावेन जलपरमाणुरूपादौ पाकजत्वाभावसाधने स्वरूपासिद्ध्यापत्तेस्तत्साधनस्यैव च प्रकृते उद्देश्यत्वादिति

गु॰ रि॰ भावः। ननु एवमपि रूपत्वादिकमादाय जलपरमाणुरूपादावतिव्याप्तिस्तादवस्थ्यं तस्य द्रव्यत्वेतरद्रव्यत्वव्याप्य
१९६ जातिसमानाधिकरणगुणमात्रवृत्तित्वात् नीलत्वपीतत्वादिनानाजातिव्यापकत्वाद्वेत्यतो व्याचष्टे। द्रव्यत्वव्याप्ये
196 तिम्प्रवच्छेदिकांतो वृत्तं तस्यार्थः द्रव्यत्वव्याप्यजातिव्याप्यतावच्छेदकत्वं तु स्वाश्रयसमानाधिकरणान्योन्याभावप्र
तियोगितानवच्छेदकद्रव्यत्वव्याप्यजातिकत्वं रूपत्वादि च न तथेति भावः। गुणवृत्तिजातिरिति पाठः तेन गुणपद
योर्वैकल्पिकमुपादानमिति संगच्छते। रसत्वादिवारणायेति द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यतावच्छेदकमात्रत्वप
नसत्वादिनानाजातिव्यापकं रसत्वादिकमादाय रसादावतिव्याप्तिवारणायेत्यर्थः। अत्रादिपदजोत ब्राह्मणत्वा
दिपरिग्रहः वृक्षादिवारणायेति पाठः। साधुगुणपदयोरिति गुणवृत्तौ त्वत्रैकं गुणपदमेकं च तद्गुणत्वापित्तत्रेति
भावः। पर्वे गुणवृत्तिजातिरिति पाठो भावे यथाश्रुतग्रकाशाभिप्रायेणेदमिति मंतव्यं। नन्वित्थमपि ज्ञानत्वा
दिमादाय ज्ञानादावतिव्याप्तिर्दुर्वारा न चोक्तविवक्षितत्वात्तायाः पाकजत्वव्यापकत्वाव्यापकत्वाद्यतिप्रसंगो न दोषायेति

राम
१९६

वाच्यं। तन्हि द्रव्यातिप्रसंगस्याप्रदोषतया गुणपदद्वयमेव व्यर्थमत आह। अनुपादानमिति। गुणपदयोरिति
संबध्यते। अप्रदोषत्वादिति। व्यापकव्यभिचारतया अप्रदोषत्वादित्यर्थः। न चैवं जातिमत्त्वमात्रमेव सम्यगिति वाच्यं।
साक्षात्सलिलादिपरमाणुरूपाद्यावृत्तिमानेत्यादिमूलानुरोधेन जलपरमाणुरूपादिव्यावृत्तस्यैव निर्वाच्यत्वा
दिति भावः। जलाद्यवयवीति तथा च व्यभिचारेण तस्य कार्यतासामान्यव्यापकत्वं न संभवतीति भावः। यद्य
प्येवमिति एवं विचित्रत्वस्य पाकजत्वव्यापकत्वे पाकजत्वव्यावृत्तावपीति विचित्रत्वाभावेन जलपरमाणुरूपा
दौ पाकजत्वाभावसिद्धावपीत्यर्थः। न च विचित्रत्वस्य रूपत्वविशिष्टपाकजत्वव्यापकताया एव वक्ष्यमाणतया त
दभावेन पाकजत्वसामान्याभावस्यापि न सिद्धिः संभव इति वाच्यं विशिष्टाभावस्य विशेषणविशेष्याभावोभयरूपत
नू२ याः रूपत्वविशिष्टपाकजत्वाभावः सिध्यन् रूपत्वाभाववाधेन पाकजत्वसामान्याभाव एव सिद्ध्यदिति भावः। न का
र्यत्वव्यावृत्तिरिति न तदभावेन कार्यत्वसामान्याभावसिद्धिरित्यर्थः। तदभावस्य जलावयविरूपादौ कार्यत्वसामा

गु.दी.

१८७

187

न्याभावव्यभिचारित्वात्तत्र चपाकजत्वाभावः सिध्यन्नसमवायिकारणं तदवधिसहकारेण कार्यत्वसामान्या
भावोऽपि सिध्यतीति वाच्यं तदवधिसहकारेणापि व्यापकताश्रयस्यैवानोपगमात् नहि प्रागभावप्रतियो
गित्वरूपकार्यत्वसामान्याभावो रूपत्वविशिष्टपाकजत्वाभावत्वात्मकस्य व्यापकतावच्छेदकस्याश्रयः कारण
विशेषजन्यत्वप्रागभावप्रतियोगित्वयोरत्यंतभेदादिति भावः। यद्यपि कार्यत्वसामान्याभावासिद्धावपि प्रकृते
नक्षतिः प्रकारान्तरेण विचित्रत्वाभावेन पाकजत्वाभावः सिध्यति तदनंतरं च पाकजत्वाभावेन हेतुना परमाणुरू
पत्वादिविशिष्टविनाशित्वाभावः सिध्यन्पक्षधर्मताबलाद्विनाशित्वाभाव एव सिध्यतीत्येवमसत्वापादन्यथात
न्वये यथाश्रुतमसत्वासंगतेस्तथापि प्रकाशकारदनपेक्षियथाश्रुत एवमसत्वापादकत्वाभिमानेनेयमाशंका यद्वा पाकज
त्वाभावेन पक्षधर्मताबलाद्विनाशित्वाभावसिद्धावपि व्यापकानुपलंभबाधवारणाय कार्यत्वसामान्याभावसि
द्धिः। अपेक्षितेति दीधितिकृतोनिगर्वः। तथापीत्यादिग्रंथे व्यभिचारवारणाय भावस्येत्युक्तं तथा च जलपरमाणुरू

रा.प

१८७

पादौ पक्षधर्मताबलात् पाकजत्वाभावसिद्ध्यर्थं तदंशसमव्यापिकारणं तदन्यभावत्वे सति पाकजत्वाभाववत्त्वेन हे
तुना कार्यत्वसामान्याभावः साधनीय इति भावः। ननु निरुक्तविचित्रत्वस्य पाकजत्वव्यापकत्वमपि न संभवति पा
कजत्वस्य तेजःसंयोगजन्यत्वरूपतया जलावयवतेजःसंयोगजन्ये जलावयविते जःसंयोगे व्यभिचारादित्यत
आह। रूपादीति। रूपत्वादिविशिष्टपाकजत्वव्यापिकेत्यर्थः। विवक्षाबीजं स्वयमेव स्फुटयति तेनेति विशेषगु
णेति। रूपरसादिसकलसाधारणतया पाकजत्वपदस्य विशेषगुणपाकजत्वपरत्वेनेत्यर्थः। द्रव्यविभाजकेति
द्रव्यत्वव्याप्यजातिपदेन द्रव्यविभाजकोपाधिर्विवक्षित इत्यर्थः। शब्दस्येति तैजसघटाकाशसंयोगजन्यशब्दस्येत्य
र्थः। स्पृष्टेरिति न व्यभिचार इत्यर्थः। व्यभिचाराभावमेवोपपादयति। तत्रापीति शब्देपीत्यर्थः। गगनत्वव्याप्येति
ति गगनत्वरूपद्रव्यविभाजकोपाधिव्याप्यतावच्छेदकस्येत्यर्थः। ननु निखिलजलीयशुक्लरूपमात्रवृत्तिरेका
जातिरस्ति पाकमात्रया चार्यो यविशेषगुणलक्षणं तत्रसंगमयन्ति सा च उद्भवादिना ना जातिव्यापिकापीति तामादा

गु॰शि॰ यजलत्वेऽतिव्याप्तिरेवं भास्वरत्वमादाय तेजोत्वेऽव्याप्तिर्भास्वरत्वस्याप्युद्भूतत्वादिनानाजातिव्यापकत्वादि
१९८ त्यत आह। नानाजातिमत्त्वेति। उद्भूतत्वादीति। आदिपदादनुद्भूतत्वोत्कर्षापकर्षपरिग्रहः। पृथिवीरूपादौ तु उद्भूतत्वमनु
196 नुद्भूतत्वोत्कर्षापकर्षव्याप्यानि शुक्लत्वादिव्याप्यतावच्छेदकवैजात्यान्येव तथाविधनानाजात्यव्यापकनीलत्वादिकमा
दायैव लक्षणसमन्वय इति भावः। उक्तविवक्षाबीजं स्वयमेव स्फुटयति। तेनेति। सलिलादिरूपानावितिनिखिल
जलीयशुक्लरूपमात्रवृत्तिजातौ मानाभावादिति प्रदीपादौ नानातेजसत्वे तेजोनिष्ठभास्वररूपपरिग्रहः। न च तथापि नाति
व्याप्तिः यद्यपि अनुद्भूतत्वभेदपूर्वेऽनुद्भूतत्वजन्यतावच्छेदकवैजात्यात्मकनानाजातिव्यापकं भास्वरत्वमादाय भास्वररूपेति
व्याप्तिर्दुर्वारेति तद्भेदपूर्वे व्याप्यव्यापकत्वे उद्भूतभेदपूर्वेशो व्यर्थः चाक्षुषसाक्षात्कारजनकतावच्छेदकघटकत्वे
नानुद्भूतत्वस्य जातित्वाव्याप्यकत्वे तदभाववद्रूपत्वेनैवोद्भूतव्यवहारसंभवेनोद्भूतस्य जातित्वे मानाभावात् तत्र
पावकयावन्निष्ठानुद्भूते तरस्फुलिंगादिसमवायिकारणतावच्छेदकतया उद्भूतत्वमपि स्फुलिंगत्वादिव्याप्यजातिरव

राम
१९८

श्यकीशुक्लत्वादिना तत्र समवायिकारणत्वेप्यनुद्भूतशुक्लोत्पत्तिस्थलेपि तदुत्पत्त्यापत्तेः न चानुद्भूततरशु
क्लत्वं न कार्यतावच्छेदकं येनानुद्भूतशुक्लोत्पत्तिस्थले तदवच्छिन्नमापादनीयमिति वाच्यं शुक्लत्वादेः पाकजशु
क्लादिसाधारणतया नित्यसाधारणतया चावयविगतानुद्भूततरशुक्लनिष्ठावयवशुक्लजन्यतावच्छेदकत्वासंभ
वेन पाकजशुक्लव्यावृत्तस्यानुद्भूततरशुक्लमात्रनिष्ठस्य जातिविशेषस्य तन्निष्ठावयवशुक्लजन्यतावच्छेदकत्वाव
श्यकत्वात् न च पाकजशुक्लव्यावृत्तानुद्भूतशुक्लजन्यानुद्भूतशुक्लसाधारणजातिविशेष एव तन्निष्ठजन्यतावच्छेद
कइति वाच्यं अनुद्भूतत्वमापादयसांकर्यापत्तेरिति चेन्न अनुद्भूतरूपस्योत्कर्षापकर्षयोर्मानाभावेन उत्कर्षापकर्ष
योरेवावयविनिष्ठानुद्भूततरशुक्लासमवायिकारणतावच्छेदकत्वसंभवात् उत्कृष्टापकृष्टरूपभेदेन कार्यकार
णभावभेदस्यावश्यकत्वात् उत्कर्षापकर्षजन्यानुद्भूततररूपस्य चाप्रसिद्धत्वादिति तपावियन्मते उद्भव एव जा
तिस्तदभाव एवानुद्भूतत्वं तन्नये उद्भवभेद एव प्रवेशनीयः यन्नये चानुद्भव एव जातिस्तदभाव एवोद्भूतत्वं तन्नयेनु

ग्र.शि. द्रवभेदएवप्रवेशनायइतिमतभेदबोधनायद्वयोःपरिग्रहः। वस्तुतस्तु उद्भवपदमुत्कर्षापकर्षजन्यतावच्छेदकवैजा
१९९ त्यपरं तद्भेदप्रवेशो भास्वरत्वव्याप्योत्कर्षापकर्षयोर्नानात्वेन तत्तज्जन्यतावच्छेदकभास्वरत्वव्याप्यवैजात्यस्यापि ना
199 नात्वात्तत्तद्व्यापकताम्रादावेवातिव्याप्तितादवस्थ्यात् न च तत्तदुत्कर्षापकर्षजन्यतावच्छेदकवैजात्यस्याप्युत्कर्षाप
कर्षात्मकतया तद्भिन्नत्वविशेषणेनैव तद्वारणमिति वाच्यं तस्योत्कर्षापकर्षात्मकत्वे मानाभावात्। न चैवमनुद्भ
वजन्यतावच्छेदकवैजात्यभेदप्रवेशोऽपि उचितस्तस्याप्यनुद्भवात्मकत्वे मानाभावादिति वाच्यं अनुद्भवजन्यताव
च्छेदकवैजात्यस्यैकस्यैव भास्वरत्वव्याप्यतया तन्मात्रमादायातिव्याप्तिविरहादित्येवं तत्त्वं। ननु पृथिवीशुक्लरूपे
ऽव्याप्तिः शुक्लत्वस्य द्रव्यत्वव्याप्यजातिव्याप्यतानवच्छेदकतया तत्र द्रव्यत्वव्याप्यजातिव्याप्यतावच्छेदकनिरुक्त
नानाजातिव्यापकजातिविरहादित्यत आह। सलिलादीति। नानाजातिव्यापकेति अनुद्भवोत्कर्षापकर्षव्याप्यपा
कजन्यतावच्छेदकनानाजातिव्यापकेत्यर्थः। ननु तादृशजातौ मानाभाव इत्यत आह। तदनभ्युपगमे इति एकजाती

राम
१२९

येतिएकजातीयो गुणो गंधादिः तद्वृत्तिनानाजातयः सुरभित्वादयस्तदवच्छिन्नव्याप्यतानिरूपितव्यापकताश्रयद्र
व्यविभाजकोपाधिः पृथिवीत्वं न तत्समानाधिकरणे एव पृथिवीवृत्तिगुणत्वादिरिति तत्र लक्षणसमन्वयः जलत्वा
दिकं तु न तादृशनानाजात्यवच्छिन्नव्याप्यतानिरूपितव्यापकताश्रयः नानाजातिपदेनानुष्णत्वादिभिन्नना
नाजातिग्रहणादिति जलादिरूपादौ नातिव्याप्तिरिति भावः। अत्र स्नेहत्वशीतत्वसांसिद्धिकद्रवत्वादिनानाजा
त्यवच्छिन्नव्यापकताश्रयत्वं जलत्वादेरपीति तत्सामानाधिकरण्याभावाय जलादिरूपादावतिव्याप्तिवारणाय वृत्त्यंतं
नानाजातिविशेषणं न च तथापि सांसिद्धिकद्रवत्वत्वतदवच्छिन्नजन्यतावच्छेदकवैजात्यात्मकजातिद्वयव्या
पकतामादायातिव्याप्तिरिति वाच्यं। उत्कर्षापकर्षादिजन्यतावच्छेदकवैजात्यातिरिक्तस्य सांसिद्धिकद्रवत्वादिज
न्यतावच्छेदकस्याभावादुष्णत्वादिभिन्नत्वविशेषणेनैव तत्खण्डनात् नानाजातिपदं वा अवान्तरजातिपरं न च तथापि
शुक्लभास्वरत्वानुष्णत्वजन्यतावच्छेदकवैजात्यरूपजातिद्वयमादायातिव्याप्तिर्वा इति वाच्यं अनुष्णत्वजन्यताव

गु॰शि॰ च्छेदकवैजात्यभिन्नत्वविशेषणेनैव तद्वारणात् तादृशनानाजात्यवच्छिन्नसामानाधिकरण्यमात्रोक्तौ जलत्वाद
२०० रूपित्वादृशस्नतागुणत्वरूपतोयात्मकनानाजात्यवच्छिन्नसामानाधिकरण्यात्तदोषतादवस्थ्यमतो व्यापकत्वा
२०० नुधावणं तादृशनानाजात्यवच्छिन्नव्याप्यतानिरूपितव्यापकत्वं तु तादृशनानाजातीनां प्रत्येकावच्छिन्नसामानाधि
करण्यान्योन्याभावप्रतियोगितानवच्छेदकत्वं [illegible] साधारण्याय द्रव्यत्वे व्याप्यजातीत्यनुक्तौ द्रव्यविभाजकोपाधीतु
त्वं।अन्योन्याभावस्याव्याप्यवृत्तितानये द्रव्यविभाजकोपाध्येयकाशत्वस्पर्शवद्रूपतयानवक्ताव रवत्वादिनानाजा
त्यवच्छिन्नसामानाधिकरण्यान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वसंभवः प्रतियोग्यवृत्तित्वेनान्यो
न्याभावविशेषणे चमहज्जोरवमित्यस्वरसात्प्रकारं तस्मादिद्रव्यविभाजकेति। प्रत्रद्रव्यविभाजकयदुपाधिसामा
नाधिकरण्यं एकजातीयगुणवृत्तिनानाजातिव्यापकमित्युक्तौ जलत्वादिसामानाधिकरण्यस्यापि प्रमेयत्वादि
नानीलत्वपीतत्वादिनानाजातिव्यापकत्वात् जुलादिरूपादावतिव्याप्तिरतः सामानाधिकरण्यत्वेनेत्युक्तं तत्पावद्द राम

२००

प्यविभाजकउपाधिसामानाधिकरण्यत्वमेकजातीयगुणवृत्तिनानाजातेः प्रत्येकाधिकरणनिष्ठाभावप्रतियो
गितानवच्छेदकं तदुपाधिसामानाधिकरण्यं विवक्षितमिति फलितं ऽआकाशत्वस्याव्याप्यवृत्तित्वेपि तत्सामाना
धिकरण्यं व्याप्यवृत्तीति नोक्तदोष इति भावः। नन्वेकजातीयवृत्तिनानाजातीत्वेवास्तु किं गुणपदेनेत्यत आह। गुण
त्वव्याप्येति। अन्यथा स्नेहसांसिद्धिकद्रवत्वादेरपि सत्तागुणत्वाभ्यामेकजातीयतया तद्वृत्तिस्नेहसांसिद्धिकद्रवत्वा
द्यात्मकनानाजात्यवच्छिन्नव्यापकत्वस्य जलत्वादावपि सत्वाज्जलादिरूपादावतिव्याप्त्यापत्तेरिति भावः। ननु सत्तागु
णत्वेतरजात्यैकजातीयत्वमेव विवक्ष्यतां किं गुणत्वप्रवेशेनेत्यत आह। तेनेति। करकात्वसागरत्वादेरपि जलत्वजा
त्यैकजातीयवृत्तित्वादिति भावः। न दोषः। न विविक्तालक्षणस्य तत्रातिव्याप्तिः। यद्यपि गुणत्वव्याप्यजात्यैकजातीयवृत्ति
त्वं गुणत्वव्याप्यैकजातिमद्वृत्तित्वं तत्र स्नेहसांसिद्धिकद्रवत्वशीतत्वात्मकनानाजातीनामप्रसिद्धत्वेऽकमस्त्येव स्नेहसांसिद्धि
कद्रवत्वत्वस्य तादृशद्रवत्वत्ववद्वृत्तित्वा[illegible]त् शीतत्वादेस्तादृशस्पर्शत्वादिमद्वृत्तित्वादिति जलादिरूपादावतिव्या

पु॰ द्वि॰ न्निष्ठत्वे रूपात्तथापि द्रव्यविभाजकयदुपाधिव्याप्यतावच्छेदिकायां द्रव्यविभाजकयदुपाधिसामानाधिकरण्यव्याप्यतायां स
२०१ मानाधिकरण्यं गुणत्वव्याप्यजातिस्तदुपाधिसामानाधिकरण्यं विवक्षणीयं जलत्वादिव्याप्यतावच्छेदकसांसिद्धिकद्र
२५ वत्वत्वशीततापाख्यकनानाजा[redacted]तिसामानाधिकरण्यं च न क्वापि गुणत्वव्याप्यजातौ द्रवत्वत्वादेस्तादृशसांसिद्धि
दै॰ ४ कद्रवत्वत्वाद्यात्मकजातिसमानाधिकरणत्वेपि तादृशनानाजातिसमानाधिकरणत्वाभावादतो नातिव्याप्तिः व्या
प्यतावच्छेदकत्वं तदभिन्नवृत्तित्ववृत्तित्वं व्याप्यत्वं तु तदभिन्नावृत्तित्वमिति न कोपि दोषः। ननु तथापि जलत्वादिरूपाद्रवति
व्याप्तिः जलत्वादेरपि संयोगनिष्ठनोदनत्वाभिघातत्वशिथिलत्वादिनानाजात्यवच्छिन्नव्यापकत्वसत्त्वादित्यत आह।
संयोगेतेति। जातिभेदाः नोदनत्वाभिघातत्वशिथिलत्वादयः। न जलत्वादिसामानाधिकरण्यव्याप्याः इति एतद्द्विती
ग यलक्षणमपि प्रायेणाप्रथमलक्षणसंतोतु न जलत्वादिव्याप्यतावच्छेदकमिति बोध्यं। ननु नोदनत्वादिमादाय यदोषाभावेपि
नौकादिगमनशब्दविभागपाकविशेषजलीयशरीरादिजनकतावच्छेदकजलसंयोगमात्रनिष्ठवैजात्यमादाया रम २०१

तिव्याप्तिर्दुर्वारेत्यत आह। विशेषगुणो वेति। एकजातीयविशेषगुणवृत्तीति वक्तव्यमित्यर्थः। ननु तथापि जलरूपेऽतिव्याप्तिः
जलत्वस्य स्नेहवृत्तित्वात्तरवैलक्षण्यापत्तेर्नानाजात्यवच्छिन्नव्यापकत्वादित्यत आह। स्नेहेऽपीति जातिभेदात् स्नेहत्वावांत
रजातिभेदः तथा च घृतत्वादिभिन्नत्वेन नानाजातिविशेषणेनैव तद्वारणादिति भावः। उत्कर्षाद्यतिरिक्तस्नेहत्वावांतर
जातेरविस्नेहे सत्त्वे जलरूपेऽतिव्याप्तिर्दुर्वारत्वादाह। नानेति। नानाजात्यवच्छिन्नरूपव्यापकद्रव्यत्वव्याप्यजातिसामाना
धिकरण्यं रूपनिष्ठपाकजत्वव्यापकमित्यादिक्रमेण विशिष्य वक्तव्यमित्यर्थः। पृथिवीस्पर्शे च कोमलत्वकठिनत्वा
दिमादाय लक्षणसमन्वयः। अत्रापि नानाजातिरुद्भूतत्वादिभिन्ना ग्राह्या व्यापकत्वं च तत्सामानाधिकरण्यान्योन्याभाव
प्रतियोगितानवच्छेदकत्वं तेन प्रमेयत्वादिना व्यापकत्वमादाय जलादिरूपे नातिप्रसंगः। जलावयवतेजःसंयोगज
न्ये जलावयवितेजःसंयोगे व्यभिचारवारणाय रूपनिष्ठत्वादिकं पाकजत्वविशेषणमिति भावः। सामानाधिकर
ण्यादिकमित्यादिपदात्तद्द्रव्यत्वव्याप्ययद्गुणादिसामानाधिकरण्यं रूपापन्नानाजातिव्यापकं तत्सामानाधिकरण्यादि

ग्र.सि. परिग्रहः। ननु भास्वरत्वं वहिरिन्द्रियग्राह्यविशेषगुणवत्वं तच्च जलपरमाणौ स्वरूपासिद्धं तदीयविशेषगुणानाम
२०२ तीन्द्रियत्वादित्यत आह। भास्वरत्वमिति। ननु तथापि वाय्वाकाशयोर्व्यभिचार इत्यत आह। शुक्लेति। भास्वरपदस्य
202 लक्षणगाः आवश्यकत्वे लाघवादाह। भास्वरपदं वेति। स्वयमनुमानोत्तरमाशंक्य दूषयति। जलेति। जलावयवि
तद्रूपयोः साध्याभावकत्वादाह। पक्षधर्मत्वादि। निमित्तासमवायिकारणयोर्गुणेन सममन्वये तदपरत्वैकत्वं कार्य
वृत्तिगुणत्वानामसिद्धमित्यतो व्याचष्टे। निमित्तेति। ननु असमवायिकारणस्य गुणत्वप्रसिध्या तद्गुणपरत्वैकत्वमप्यप्रसि
द्धमित्यत आह। असमवायीति। उष्णास्वरसं स्वयमेव प्रकटयति। तेनेति। रूपान्वयिस्मिन् पृथिवीतादात्म्यावच्छेदप
गमेपयः पावकयोः पृथिवीत्वापा[illegible]दनासंभवदुक्त्यतो व्याचष्टे। रूपं रूपमात्रमिति। तथा च एवकारः साकल्यार्थ
क इति भावः। निखिलरूपस्य पृथिवीतादात्म्याभ्युपगमेपि पयःपावकयोः पृथिवीत्वापादनासंभवदुक्त्यतो व्याचष्टे। प
यः पावकाविति। ननु द्रव्यस्य रूपनिष्ठभेदप्रतियोगित्वे सति रूपाभेदाबत्वं भेदाभेदपदार्थः। ननु रूपभेदवत्वे सति रू राम

२०२

पाभेदवत्वे तदर्थः रूपं द्रव्याभेदवत्तावन्मिति विषयो भवतीत्यर्थः कस्य रूपं द्रव्याभिन्नं स्यादित्यग्रिमग्रन्थस्यासंगतेः

द्रव्ये रूपभेदाभेदस्य प्रत्यक्षमानुपपादकत्वात् तादृशत्वे च अत्रान्योन्याभावस्याव्याप्यवृत्तितास्तावदनुपपन्नं तत्रान्योन्याभा

वस्याव्याप्यवृत्तित्वं विना विनिरूक्तभेदाभेदस्य संभवादित्यतो भेदाभेदस्थाने तु भयपदं तथैव व्याचष्टे। भेदइति। भेद

भेदः भेदाभेदपदार्थः रूपादिभिन्नत्वमिति भेदाभेदस्य त्वनुपपद्यते। तद्भाववत्त्वं रूपप्रतियोगिकभेदाभाववत्त्वे भेदाभेद

स्य त्वनुपपद्यते। नन्वेतादृशाभेदाभेदपदार्थद्वयोर्विंमानमित्यत आह। उभयमेवेति। निरुक्तोभयरूपभेदाभेदवैव

त्यर्थः। सैव तादृशीप्रतीतिरेव न तु अभावत्वसाक्षाद्व्याप्यत्वमभावत्वव्याप्याव्याप्यत्वे सत्यभावत्वव्याप्यत्वं तत्रान्योन्या

भावत्वात्संताभावत्वयोरस्तिद्वं तयोरभावत्वव्याप्यस्यासंताभावान्योन्याभावान्यतरत्वस्य व्याप्यत्वात् अत्रत्वं ताभाव

त्वस्याव्याप्यसंसर्गाभावत्वव्याप्यत्वाच्च तथा च स्वरूपासिद्धिर्दृष्टान्तासिद्धिरित्यत आह। अभावत्वेति। नोपादेयमिति

धर्मविशेषणं नोपादेयमित्यर्थः। ननु तदनुपादाने ध्वंसत्वप्रागभावत्वयोरेव व्यभिचार इत्यत आह। अव्याप्यवृत्तीति। त

गु॰ टी॰
२०३

योः ध्वंसप्रागभावयोः स्वाभाववत्त्वादेशपादीति स्वाभाववत्तासामानाधिकरण्यादित्यर्थः। तथा च ध्वंसत्वप्रागभावत्वयोरपि
साध्यसत्त्वान्न व्यभिचार इति भावः। ननु स्वाधिकरणक्षणावच्छेदेन यत् स्वाभावाधिकरणं तद्वृत्तिवृत्तित्वं साध्यं स्व
पदं प्रथमवृत्तिपरमतो ध्वंसप्रागभावयोः प्रतियोगिसमवायिनि स्वाभावसामानाधिकरण्येऽपि ध्वंसत्वप्रागभाव
त्वयोः साध्यासत्त्वाद्व्यभिचारः तत्कारणं यच्च नित्याभाववृत्तित्वमुपादेयमिति। न व्यभिचारो नासंभव इत्यत आह। एकका
लावच्छेदेनेति। स्वाधिकरणक्षणावच्छेदेनेत्यर्थः। विवक्षायाः साध्ये स्वाभावाधिकरणताविवक्षायाः। युगपदिति। इदा
नीमुक्तरूपभिन्नः पाठः मुक्त इति युगपन्न दापेक्षया तीसूपपन्नतय इत्यर्थः। तथापि विवक्षणे साध्ये स्वाधिकरणक्षणावच्छे
देन स्वाभावाधिकरणताविवक्षणे वैयर्थ्यापत्तीहारादिति अत्र व्याप्यवृत्ति ध्वंसप्रागभावावादायैव ध्वंसत्वप्रागभा
वत्वयोः साध्यसत्त्वेन व्यभिचाराभावादिति भावः। नित्यरूपप्रतियोगिकघटाद्यनुयोगिकसमवायस्य नित्यतयाऽतो
ऽनुपगमादाह। नित्येत्यादि। ननु उत्क्रान्तादिकमिति उत्क्रमाएवं तत्प्रवेशादारंभस्वीकारे च गौरवमिति भावः। अग्रे धी

राम
२०३

नत्वादिति। आप्यत्वादित्यर्थः। तेन तन्नयेऽतयोर्नित्यत्वेऽपि नासंगतिः। तस्यापीश्वरस्य ज्ञानादेरपि। योगिनामित्येव
बाह्यकरणाघटितहेतौ बोध्यं। उक्तरूपयोगिनामीश्वरस्य चेति द्वयमपि। नन्वेवमपि सामान्यलक्षणादिजन्यास्मदादि
प्रत्यक्षविषयत्वमादाय भगवत्ज्ञानादौ व्यभिचारो दुर्वार इत्यत आह। अस्मदादीत्यनेन चेति। लौकिकत्वमिति लौ
किकविषयत्वमित्यर्थः। यथाश्रुते सामान्यलक्षणादेर्नव्यावृत्तिरिति भावः। नैरिन्द्रियत्वादिति तन्नये नीलपीतादेरेकैक
त्वादिति भावः। आश्रयमात्रेविनाचेति आश्रयमात्रेण समं संनिकर्षं विना चेत्यर्थः। आश्रयव्यंग्यत्वादिति। आश्रय
घटितसंनिकर्षवेद्यत्वादित्यर्थः॥ ॥इति गुणदीधितिरहस्ये रूपग्रंथरहस्यं॥ ॥अग्राह्येरसाव्याप्तिवारणाय ग्राह्य
त्वस्य धर्मविशेषणता तथा च रूपादिवारणेनैवकारस्य सार्थकत्वान्नाह। एवकारेणेति। यथाश्रुते बहिरिन्द्रियपदानु
रोधेनाह। रसनेतरेति। स्वजातीयेति। स्वजातीयगोचरपदमित्यर्थः। तेनेति। सर्वज्ञानसाधारण्येऽपि विशेषणासिद्धिरू
पाव्याप्तिर्न तदसजातीयविवक्षणेन रसस्य रसत्वव्यंजकत्वेऽपि। रसव्यंजकत्वासिद्धिरूपाव्याप्तिर्नभेदगर्भविवक्षणेन

गु॰ टि॰ २०४ 204

स्वव्यंजकत्वेपि अभिन्नसजातीयव्यंजकत्वासिद्धेरित्यर्थः। नयनमिति तत्र च व्यभिचार इति भावः। व्यभिचारस्या
नौ तरमाह। न चेति। तादृशेति। अभिन्नसजातीयसाक्षात्कारकरणेत्यर्थः। सामान्याकरणे विशेषमात्रायव्यभिचा
रः साध्याप्रसिद्धिश्चेत्याशयेनाह। अत्र चेति सिद्धसाधनमिति अर्थान्तरमित्यर्थः। सामान्यरूपेण सिषाधयिषा
यां दोषत्वं हेतावितिसजातीयव्यंजकव्यंजनपवनस्पर्शजातीयत्वेन व्यभिचाराभावादिति भावः। व्युदास इति। तेन
नार्थान्तरमित्यर्थः। एतच्च हेतुस्थग्राह्यांतव्याख्याने हेतावपरमाह। स्नेहादेरिति रसस्येति हेतौ भेदगर्भस्य वैयर्थ्येण
विवक्षणादिति भावः। सिद्धसाधनं रसनस्यापि पक्षत्वे तद्रूपसजातीयत्वेन जलोत्तरे अर्थान्तरं परिमाणस्येति ता
दृशरूपादिग्राहकोयोगुणः परिमाणं रूपादिन तज्जातीयमिति दृष्टान्तासिद्ध्यादिवारणायेत्यर्थः। महत्त्वस्येति साध्येऽभि
भिन्नसजातीयसाक्षात्कारणत्वं कत्वा तादृशादृष्टत्वव्यंजकमहत्त्वदेनेव दृष्टान्तादिति भावः। द्रव्येति। यन्नतंतत्ता
द